श्रीनेमि-लावण्य-दक्ष-सुशीलग्रन्थमालारत्न-४५ मुं.

# श्री-षड्दर्शन-दर्पणम्

विरचितं—

श्रीजैनधर्मदिवाकर-शासनरत्न-तीर्थप्रभावक-राज-
स्थानदीपक-मरुधरदेशोद्धारक-शास्त्रविशारद-
साहित्यरत्न-कविभूषणेति पदसमलङ्कृतेन
श्रीमद्विजयसुशीलसूरिणा।

-: प्रकाशिका :-

**श्रीज्ञानोपासक समिति :**

बोटाद, सौराष्ट्र गुजरात

श्रीनेमि-लावण्य-दक्ष-सुशीलग्रन्थमालारत्नम्-४५ मुं.

# श्री-षड्दर्शन-दर्पणम्

विरचितं—

शासनसम्राट्-सूरिचक्रचक्रवर्त्ति-तपोगच्छाधिपति-महाप्रभावशालि स्व० प० पूज्य आचार्य श्रीमद्विजयनेमिसूरीश्वरस्य पट्टालङ्कार साहित्यसम्राट्-व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्न स्व० प० पू० आ० श्रीमद्विजयलावण्यसूरीश्वरस्य पट्टधर-व्याकरणरत्न शास्त्रविशारद-कविदिवाकर-देशनादक्ष-पू० आ० श्रीमद्विजयदक्षसूरिवरस्य पट्टधराचार्य श्रीमद्विजयसुशीलसूरिणा ।


-: प्रकाशिका :-

**श्रीज्ञानोपासक समिति :**

बोटाद जि. सौराष्ट्र, गुजरात

प्रकाशक :—

**श्रीज्ञानोपासकसमित्याः**

कार्यवाहक :

**शा० हसमुखलाल दीपचन्द बगडीया**

**बोटाद [[सौराष्ट्र] गुजरात।**

सम्पादक :—

**श्रीजैनधर्मदिवाकर-तीर्थप्रभावक-राजस्थानदीपक**

**प० पू० आ० श्रीमद्विजयसुशीलसूरीश्वरस्य**

पट्टधर :

**वाचकश्रीविनोदविजयो गणी**

**वीर सं० २५०२]** **नेमि सं० २७** **[विक्रम सं० २०३२**

**नकल १०००** **卐 प्रथमावृत्तिः 卐** **मूल्यम् ३-८-०**

*प्राप्तिस्थानम्-*

[१] आ० श्री विजयलावण्यसूरीश्वर ज्ञान मन्दिर,
बोटाद [सौराष्ट्र] गुजरात।

[२] सरस्वती पुस्तक भण्डार,
रतनपोल हाथी खाना,
अहमदाबाद (गुजरात)

[३] श्री भैरूबाग जैन तीर्थ
सरदारपुरा, जोधपुर मारवाड़-(राजस्थान)।

[४] शा० ऊर्जनलाल फतहलाल मनावत
बड़ा बाजार,
उदयपर (मेवाड़)-राजस्थान।

# वन्दनीया गुरुदेवाः



# * स....म....र्प....ण....म् *

यत्प्रेरणास्पदवचांसि प्रयुञ्जते स्म,
पाठोन्मुखाय च तपश्चरणाय नित्यम् ।
पञ्चातिमान्य व्रत-पालनहेतु-दीक्षा,
शिक्षाप्रदं प्रगुरुमर्चितुमञ्जलि मे ॥१॥

शिष्य प्रशिष्य शुभसाधुबुधान् विधाय,
ये स्वर्गता विमल कीर्तिधनानि मुक्त्वा ।
ये मां ससोदरमुरुं प्रति सावधानाः,
तेभ्यः प्रणामकुसुमाञ्जलिमर्पयामि ॥२॥

## युग्मकम्

सौराष्ट्र मध्यनगरेषु विभातिशीर्षं,
बोटादनामकपुरं प्रथितं समन्तात् ।
उत्पद्य तत्रजनुषैव विरक्तचेताः,
जेताऽभवद्गुणिगणस्य सदैव तस्य ॥३॥
लावण्यसूरिप पदैः प्रथितस्य लोके,
श्रीमद्गुरूपमगुरुप्रवरस्यभक्त्या ।
मोदाय तत्करकुशेशययोर्नवीनं,
ग्रन्थं समर्पयतिसादरदक्षशिष्यः ॥४॥

विनीत :

**श्रीमतां प्रशिष्यः सुशीलसूरिः**

# प्रस्तावना

सर्वदा सर्वेषां कृते सौम्या शान्ता च भारतीया भूमिः सर्वरत्नानां खनिः जनयित्री वा विद्यतेऽतोऽयं भारतवर्षः संपूर्णसंसारस्य प्रदर्शनागार इत्येवं भूमण्डले प्रसिद्धोऽस्ति । तस्मादेवेदं राष्ट्रं प्रकृतेः प्रियतमं निकेतनं जेगीयते । यतः प्रकृतिदेव्या विभिन्नाया मूर्त्तेरेकत्र समावेशः पूर्णरूपेण विकसितो भावः यत्र तत्र दृश्यते ।

तद्यथा-क्वचिदुत्तुङ्गशृङ्गसमन्विता हिमधवलमाला, क्वचिदुत्तालतरङ्गो भीषणोनीलवर्णः सलिलपूर्णःसमुद्रः, क्वचिदतिदूरप्रवाहिनी महावर्त्तमयी विस्तीर्णाऽनेका स्रोतस्विनी, क्वचिद्वालुकाराशिनिर्मिता विभीषिकायाः साक्षान्मूर्त्तिर्मरुभूमिः, क्वचिन्महादुर्दान्तहिंस्रकश्वापद संकुल बुद्धिजीविद्विपदजन-विहीना महारण्यानी, क्वचित्सौधमालापरिशोभिता कोलाहलपूर्णा सुन्दरी-नगरी, क्वचिन्नानाविध सुन्दरमधुरफलपुष्प सुशोभितं नयनाभिरामं सुरम्य-मुपवनं, क्वचिच्च लघुगुरुलतावेष्टित-सुमधुरवाक्पक्षिनिनादपूर्णः सुविशाल-वृक्षराजिः, क्वापि श्यामलशस्यपरिशोभितकृषकजनपरिलक्षितानि विविध-शस्यक्षेत्राणि, क्वापि योगमग्नतपस्विमहात्मनां शान्तिरसास्पदं तपोवनमादि सर्वदा सर्वेषां दृष्टिपथमलङ्करोति ।

अयमस्माकं देशो विभिन्नभाषाभाषिणां विभिन्नधर्मावलम्बिनां विभिन्नजातीनामावासभूमिरित्यनेकजातिवर्णभाषाधर्मस्वभावाचारविचार-

भेदानामेकत्रास्मिन्नेव देशेऽविरोधेन सन्निवेशः परिलक्ष्यते । तस्मात्सहर्षं भारतवर्षं पृथिवीमात्रस्यादर्शं वक्तुं प्रभवत्येव विचारवान् विद्वान्जनः ।

भारतस्यातुलैश्वर्येषु विमोहिताः सन्त एव नानादेशीया नानाजातीया विजयिनो जना भारतं स्वकरतलगतं विधातुं विभिन्नसमयेऽनेकवार-माक्रम्यात्रत्यान् शान्तमानवान् उत्पीडितान् कान्दिशीकाँश्च व्यदधुः ।

एतेषां विदेशीयानां दस्युलुण्टकानांपुनःपुनराक्रमणं भारतवर्षो विध्वस्तो विपर्यस्तो भूत्वा दीर्घकालं यावन्निःस्वो निरीहः शान्तोऽवर्त्तत । तदन्तरेऽपि अस्य देशस्यानुपमेयानि धनधान्यरत्नादिवस्तूनि वारं वारं लुण्टितान्येव यानिच वैदेशिका अपि भ्रमणशीला विचारशीला वहवःखलु परिव्राजकाः समये २ समागत्य स्वस्वभाषायां समुल्लिख्य भारतस्य मनोमुग्धकरीं यशोगीतिं जगज्जनानां पुरतः संस्थाप्य स्वीयानुदारतटस्थ-भावानदीदृशन् ।

प्राचीनतमोऽयं देशः पुरा पूर्णरूपेण समृद्धः सन् संसारे सर्वतः श्रेष्ठ आसी-दित्यत्र नास्ति केषामपि जनानां विचिकित्सा । यदा पृथिव्याः अधिकांशा देशा असभ्या मांसभोजिनोऽरण्यचारिणो दुर्दान्ताः निष्कृपा आसन् तदापि भारतः सभ्यतायाः परामेव काष्ठामारूढः सन् स्वसौभाग्येन जगज्जनान् मुग्धान् पुलकिताँश्चकरोतिस्मैव यदाचेदं जगद् घोरतमेनाज्ञानान्धकारेण समाच्छन्नमासीत् तदाप्ययं देशःसद्विद्याबुद्धिवैभवेन निजसभ्यतायाः पूर्णालोकेन विश्वमालोकितं कुर्वन् अविनश्वर गौरवेण महिम्नाच दीप्तएवासी दितिश्रूयते एव ।

धर्मेषु विज्ञानेषुदर्शनज्योतिषादिषट्शास्त्रेषु भैषज्यतत्त्वेषु पुराणेतिहास शिल्पवाणिज्यादिसर्वविषयेषु सर्वथा सर्वतः शीर्षस्थानमलञ्चकारायमेव

देश: । येचास्माकं पूर्वजा अतुलसाहसेन धैर्येण विक्रमेण सर्वशास्त्रवैदुष्येण तेजस्वितया मनस्वितया समस्तसंसारेऽक्षयां कीर्तिमलभन्त येच खलु भारतीयाः पृथिव्यां सर्वतः श्रेष्ठाः सन्तः प्रथिताः विमलालोकेन जगदुल्ला-सितमकार्षुः ससम्मानं सर्वशास्त्रशिक्षा गुरुपदं प्रापुस्त एव कालचक्र-कृतदशा-विपरिणामेन कदाचन स्वाधीनताया अभावेन विद्यायां वुद्धौ विज्ञाने धर्मेषु कीर्तिषु लघुतामाप्नुवन्तो दोदूयमानमानसा अभवन्नित्यपि नाविदितं विपश्चिताम् ।

तथापि परमपुरुषार्थे मोक्षाऽमृतप्राप्तिजिज्ञासया वद्धपरिकरा यूरोपीयाः पण्डितजनाः भारतस्यानुपम गौर व निदानसंस्कृतसाहित्य समुद्रमन्थनमद्यापि कुर्वन्त्येव । भारतस्यापूर्वविद्याऽध्यात्मवाद गौरवाणां महिमानं स्वस्वदेशे मुक्तकण्ठेन सप्रचारं गायन्ति प्रशंसन्ति तेन च कृतकृत्याश्चमत्कृता भवन्तीत्यत्र नाधुनापि केषाञ्चित् संशयलेशः ।

भारतीयसंस्कृतिसंस्कृतसाहित्यदर्शनतुल्यमनन्तरत्नराजिपूर्णमन्यत्र प्रदेशे दुर्लभमेवेति निश्चप्रचम् तस्मादेव संस्कृतशास्त्रप्राणभूतान्यनेक दर्शनानि आत्मसाक्षात्कार परमानन्दपराणि सर्वत्र सर्वेषां हृदयेषु पदं प्राप्य विजयन्तेतराम् ।

तदत्रध्यात्मवाद-दर्शनग्रन्थलेखकेषु– सप्ताशीत्या संस्कृतपद्यैराचार्य श्रीहरिभद्रसूरीश्वरेण षड्दर्शनसमुच्चयनामको निबन्धो व्यरचि । दर्शन शब्दार्थश्चात्र दृश्यते-ज्ञायते आत्माऽनेनेति ज्ञानसामान्यक–दृश्धातोः करणल्युट्प्रत्येयन निष्पन्नदर्शनपदजन्यज्ञानविषयं चेतनवस्तुविचार प्रवणात्मकं शास्त्रं भवति । तच्च दर्शनशास्त्रं विचाराणां भेदेन बहुविधं प्रख्यातमस्ति । यथा– चार्वाकदर्शनं बौद्धदर्शनं जैनदर्शनं रामानुजदर्शनं

पूर्णप्रज्ञदर्शनं नकुलीयदर्शनं पाशुपतदर्शनं वेदान्तदर्शनं शैवदर्शनं प्रत्यभिज्ञान दर्शनं रसेश्वरदर्शनं जैमिनीयदर्शनमौलुक्यदर्शनमक्षपाददर्शनं पाणिनिदर्शनं पातञ्जलदर्शनमादि सर्वदर्शन सग्रहादौ निबद्धानि सन्ति ।

एतेषु सत्स्वपि पण्डितानां परमप्रियाणि षडेव दर्शनानि संमतानि तदत्र केचित्–

वेदान्तदर्शनं मीमांसादर्शनं सांख्यदर्शनं पातञ्जलदर्शनं कणाद दर्शनमक्षपाददर्शनमितिषट्सख्याक संगिरन्ते । केचिच्च बुधजनाः– सौत्रान्तिक वैभाषिक येगाचार माध्यमिक (बौद्ध) जैन चार्वाकाणामपि दर्शनानि मत्वा पूर्वदर्शनेन षट्केन सह द्वादश संख्यकानि दर्शनानि मन्यन्ते ।

कतिचनाचार्य श्री हरिभद्रसूरीश्वरादयः–बौद्ध सांख्य मीमांसा न्याय जैन वैशेषिकाणां दर्शनान्यैव षड्दर्शनपदेन प्रख्यापयन्ति–यथा–

बौद्धं नैयायिकं सांख्यं जैनं वैशेषिकं तथा ।
जैमिनीयञ्चनामानि–दर्शनानाममून्यहो ।।

आ० श्री हरिभद्रसूरिः स्वपरसम्प्रदाये प्रख्यातो दार्शनिक आसीत् । तस्य च जन्मपञ्चम्या विक्रमशताब्दयाः परभागे स्वर्गारोहणञ्च षष्ठयाः विक्रमशताब्द्याः पूर्वभागेऽभूदिति श्रूयते । तत्कृत षड्दर्शन समुच्चयस्या धारेणैवेम षड्दर्शनदर्पणा नामकं ग्रन्थं विशदं प्राञ्जलं सुसरलञ्च कर्तुं यत्नवान् विद्वानेषजनः प्रतिभाति ।

जैनजगति प्रसिद्धतमानां जगद्गुरूपनाम्नां गुर्जरदेशोत्पन्नानां श्रीमद्विजयनेमिसूरीश्वराणां समुदायेऽष्टदिग्गजानामिव शास्त्रधुरन्धराणां तच्छिष्याणामन्यतमस्य विदितव्याकरणादिवैदुष्यव्याकरण वनव्याघ्रोपनाम

श्रीमद्विजयलावण्य सूरीश्वरस्य प्रशिष्येण तथा विद्वद्वर्य्ये पण्डितजनादर-भरणाकदर्य्य-सर्वशास्त्रज्ञानदानदक्ष श्रीमद्विजयदक्षसूरीश्वरस्य सहोदरेण पट्टधरेण शिष्येण सरलस्वान्तेन तीर्थङ्करचरित्राद्यनेकग्रन्थसर्जकेन सदाचार-विचारवैदुष्यसाधुतादिगुणैः समलङ्कृतेनान्वर्थनामधेयश्रीमद्विजयसुशील-सूरिणा कृतः सर्वबोधगम्यः सरलतमोऽयं षड्दर्शन दर्पणाख्यो ग्रन्थः पाठकानां पुरतः प्रमोदाय समुपस्थितः ।

तदनेन ग्रन्थेनोपरि समुद्दिष्टदर्शनानां सर्वेषामेव प्रसिद्ध पदार्थानां बोधः सुखेनाध्येतॄणां भवत्विति मनसिकृत्य सञ्जातो ग्रन्थसर्जकस्य प्रयासः प्राशस्त्यमञ्चत्येव समन्तादित्यलं बहुना विज्ञेषु—

इति विद्वज्जाभिधेयः ।

विक्रम संवत् २०३२
कार्त्तिक शुक्ल पूर्णिमायाम्.
मङ्गल दिने.

**सुरेश झा.** (वरिष्ठाध्यापकः)
व्या. सा. आ. तर्कतीर्थः सा. रत्न शिक्षा शास्त्री
ग्राम० सांढा पो. सिरसीया (परिहार)
जि. सीतामढ़ी ।

दि. १८-११-१९७५.

( सम्प्रति—जोधपुरस्थः )

# किञ्चिद् वक्तव्य
## [ कार्य का प्रारम्भ और पूर्णाहूति ]

विश्व में आस्तिक अनेक दर्शनो विद्यमान हैं। अनास्तिक याने नास्तिक चार्वाक दर्शन भी विद्यमान हैं। इस में आस्तिक षड्दर्शनों की विशेषता विशेष हैं। जिन के नाम निम्नलिखित हैं।

[१] जैन दर्शन, [२] बौद्धदर्शन, [३] साङ्ख्यदर्शन, [४] न्यायदर्शन, [५] वैशेषिकदर्शन, और [६] जैमिनीदर्शन।

ए छए दर्शनों में भी जैनदर्शन अद्वितीय, अलौकिक, अनेरा और अनोखा हैं।

ये छः दर्शनों के विषय में १४४४ ग्रन्थ के रचयिता सुगृहीत नामधेय याकिनी महत्तरा धर्मसूनु प० पू० आचार्य प्रवर श्रीमद्हरिभद्र-सूरीश्वरजी म० श्री ने 'श्री षड्दर्शनसमुच्चय' ग्रन्थ की रचना ८७ श्लोक में सुन्दर की हैं। इस ग्रन्थ को देखकर मुझे भी षड्दर्शन के सम्बन्ध में संस्कृत भाषा में एक स्वतन्त्र ग्रन्थ सर्जन की भावना स्वर्गीय–साहित्य सम्राट्–व्याकरण वाचस्पति–शास्त्र विशारद–कविरत्न–परम शासन प्रभावक–परम पूज्य–परमोपकारी प्रगुरुदेव–आचार्य प्रवर–श्रीमद्विजयलावण्यसूरीश्वरजी म० सा० की विद्यमानता में हुई थी। पूज्यपाद प्रगुरुदेव ने भी प्रोत्साहित किया था, लेकिन अन्य अन्य कार्यवश से मैं इस ग्रन्थ का सर्जन नहीं कर सका।

विक्रम सं. २०२८ और २०२९ के वर्ष का चातुर्मास मेरा उदयपुर [मेवाड़] में हुआ। वहां पर इस ग्रन्थ को प्रारम्भ करके पूर्ण किया।

प्रकाशित यह ग्रन्थ में मुझसे या प्रेस दोषादि कारण से रही हुई गलती को सुधार के मुझ को सूचित करें। जिससे द्वितीया वृत्ति में सुधारा होवे।

—ग्रन्थकर्त्ता

# द्रव्यसहायक सद्गृहस्थों की शुभ नामावली—

[१] ३५१) रु० श्रीमान् स्व० संघवी उर्जनलालजी के सुपुत्र फतेहलालजी और उन्हीं के सुपुत्र नरेन्द्रकुमार, शान्तिलाल, मदनसिंह मुनावत उदयपुर-(मेवाड़)-राजस्थान।

[२] २०१) रु० श्रीमान् किशनलालजी मोतीलालजी दलाल, उदयपुर-(मेवाड़)-राजस्थान।

[३] २०१) श्रीमान् सुन्दरलाल, मोहनसिंह, चन्द्रसिंह, विरेन्द्रसिंह, इन्द्रसिंह, नरेन्द्रसिंह पिता ख्यालीलालजी दलाल, उदयपुर-(मेवाड़)-राजस्थान।

[४] २०१) रु० श्रीमान् दिवानसिंह, महेन्द्रसिंह, संपतकुमार पिता बहोतलालजी बाफणा, उदयपुर-(राज०)।

[५] २०१) रु० श्रीमान् इन्दरसिंह, गणपतसिंह, जोरावरसिंह पिता कनैयालालजी कोठारी, उदयपुर-(राज.)।

[६] १५१) रु० श्रीमान् वसंतीलाल, मोतीसिंह, चपलोत उदयपुर वाले, भीलवाड़ा-(मेवाड़)-राज०।

[७] १०१) रु० श्रीमान् विजयसिंह पिता फूलचन्दजी सामर, उदयपुर-मेवाड़-(राजस्थान)।

# प्रकाशकीय-निवेदन

'आ० श्रीमद्विजयलावण्यसूरीश्वरज्ञानमन्दिर' बोटाद की 'श्रीज्ञानोपासक समिति' की तरफ से पूर्व अनेक ग्रन्थ प्रकाशित हो गये हैं।

अब प्रस्तुत यह 'षड्दर्शनदर्पणम्' नाम का दार्शनिक ग्रन्थ को प्रकाशित करते हुए हमारी समिति को और हमको अत्यन्त खुशी है।

इस ग्रन्थ के प्रणेता शासन सम्राट् समुदाय के सुप्रसिद्ध-जैनधर्मदिवाकर-शासनरत्न-तीर्थप्रभावक-राजस्थानदीपक-मरुधरदेशोद्धारक-शास्त्रविशारद-साहित्यरत्न-कविभूषण-बालब्रह्मचारी प० पू० आचार्यदेव श्रीमद्विजय-सुशीलसूरीश्वरजी म० सा० हैं। इन्हों ने इस ग्रन्थ में षड्दर्शन का वर्णन संस्कृत भाषा में अति सुन्दर किया है। दर्पण में प्रतिबिम्ब की तरह यह ग्रन्थ होने से 'षड्दर्शनदर्पणम्' नाम सार्थक हैं।

इस ग्रन्थ का सम्पादन कार्य प० पू० आ० म० श्री के पट्टधर पू० उपाध्याय श्रीविनोदविजयजी गणिवर म० सा० ने सुन्दर किया हैं।

इस ग्रन्थ की सुन्दर प्रस्तावना लिखने वाले न्यायतीर्थ-व्याकरण-साहित्याचार्य पण्डितप्रवर मैथिल श्रीसुरेशझाजी ने प्रुफ संशोधन कार्य भी अच्छा किया है इसलिये धन्यवाद पात्र है।

इस ग्रन्थरत्न के प्रकाशन में द्रव्य सहायकों का आभार मानते हैं।

—प्रकाशक

卐 प० पू० आचार्यदेव 卐

श्रीमद् विजयसुशीलसूरीश्वरजी म० सा०



# विषयानुक्रमणिका


| क्रमाङ्काः | – विषय सूची – | पृष्ठ नं० |
|---|---|---|
| | ❀ मङ्गलाचरणम् ❀ | १–२ |
| [ १ ] | जैनदर्शनम् । | ३–३१ |
| [ २ ] | साङ्ख्यदर्शनम् । | ३२–६० |
| [ ३ ] | अक्षपाद–न्यायदर्शनम् । | ६१–८८ |
| [ ४ ] | काणाद–वैशेषिकदर्शनम् । | ८९–१०३ |
| [ ५ ] | मीमांसादर्शनम् । | १०४–१२५ |
| [ ६ ] | बौद्धदर्शनम् । | १२६–१३२ |
| [ ७ ] | प्रशस्तिः । | १३३–१३५ |
| [ ८ ] | श्रीसुशीलसूरिश्वराष्टकम् । | १३६ |
| [ ९ ] | शुद्धिपत्रम् । | १३७–१३९ |

॥ 卐 ॐ ह्रीँ अर्हं नमः 卐 ॥

॥ विश्ववन्द्य-विश्वविभु श्रीवर्द्धमानस्वामिने नमः ॥

॥ अनन्तलब्धिनिधान-गणधर श्रीगौतमस्वामिने नमः ॥

॥ शासनसम्राट् श्रीमद्‌विजयनेमिसूरिश्वरपरमगुरवे नमः ॥

॥ साहित्यसम्राट् श्रीमद्‌विजयलावण्यसूरीश्वरप्रगुरवे नमः ॥

श्रीमद्‌विजयसुशीलसूरिणा विरचितम्-

# श्री-षड्दर्शन-दर्पणम्

मङ्गलाचरणम्—

[ शार्दूलविक्रीडित-वृत्तम् ]

यत्साक्षात्कृतिगोचरत्वनियतं वस्तुत्वमन्यादृशं,
यत्साक्षात्कृतिगोचरत्ववियुतंनोकान्तमेकान्तगम् ॥
तं वीरं भवहेतुलेशवियुतं भुक्त्यङ्गनालिङ्गितं,
वन्दे पूज्यतमं विपक्षविफलं मान्यागमं सर्वदा ॥१॥

वाणी कापि विचारसारमनना तत्त्वप्रथाभासुरा,
पूज्यापूज्यतमैर्जिनागमरतै र्नित्यप्रवाहाऽमला ॥
जीयाच्छ्रीजिनदेवदेवगदिता षट्दर्शनी संश्रिता,
मानानां प्रवरा नयैरनुगताऽनेकान्तसिद्धान्तभूः ॥ २ ॥

स्याद्वादामृतपानलालसधियां ये कामपूर्त्तौ क्षमाः,
युक्तिव्रातसमर्थितागमलसद् गूढोक्तिकान्ताशयाः ॥
तान् मान्यान् हरिभद्रसूरिप्रमुखान् सिद्धान्तवाचस्पतीन्,
ज्ञाताशेषमताशयाननुपमान् शास्त्रार्थगत्यै नुमः ॥ ३ ॥

श्रीमन्तो गुरवो गुरोरपिगुरो र्नेमीश्वरा यत्कृतिः,
सम्मत्यादिकतर्कशास्त्रविवृतौ मोदप्रदा धीमताम् ॥
तीर्थोद्धारमुखाञ्च धर्मकरणे शुद्धप्रयत्नाशयान्,
तान् भूयः प्रणमामि सङ्गतिमितान् स्वान्ते नितान्तं सदा ॥४॥

लावण्यद्रविडव्ययो बहुविधो यत् काव्यकृत्ये वरे,
यच्छास्त्रार्थविचारमग्नहृदये नो लौकिकी तर्कणा ॥
तं सूरिप्रवरं गुरोरपिगुरुं लावण्यसूरिं स्तुमो,
व्याख्यानैकविचक्षणं सुकठिन- ग्रन्थौघवृत्तिक्रियम् ॥५॥

दक्षं धर्मप्रधानकार्यकरणे सत्पक्ष संस्थापने,
कामक्रोधमुखारिसङ्घदलनेऽपीष्टार्थसंवादने ॥
रत्नं व्याकरणे कवौ दिनपतिं, व्याख्यातृचूडामणिं,
पूज्यं शास्त्रविशारदं गुरुमहं, श्रीदक्षसूरिं स्तुवे ॥ ६ ॥

[ अनुष्टुब्-वृत्तम् ]

जैनं साङ्ख्यं चाक्षपादं, काणादं सौगतं तथा ॥
मीमांसाभिधमित्येवं, षट्दर्शनमुदीरितम् ॥ ७ ॥

संक्षेपतः सुशीलाख्यः, सूरि स्तेषामनुक्रमात् ॥
वर्णनं दर्पणाख्यं सद्, वच्मि बालक बोधदम् ॥ ८ ॥

# ॥ अथ जैन दर्शनम् ॥

प्रमाणे द्वे नयाः सप्त, सप्त तत्त्वानि वा नव ॥
निःक्षेपा जैनराद्धान्ते, चत्वारः कथिता बुधैः ॥ ६ ॥

जिनः रागद्वेषमोहक्रोधरहितः केवलज्ञानदर्शनवान् सुरासुरेन्द्र-पूज्यः सद्भूतार्थोपदेशकः कृत्स्नकर्मक्षयात् परमानन्दस्वरूपा-वाप्तिलक्षणमोक्षपदो देवो येषां ते जैनास्तेषां राद्धान्ते सिद्धान्ते जैनदर्शने इति यावत्, बुधैः जैनसिद्धान्तज्ञैः, कथिताः कीर्तिताः, के इत्याकाङ्क्षानिवृत्तये प्रमाणे द्वे इत्यादि स्पष्टम् ॥

प्रमाणाधीना हि सकलपदार्थव्यवस्थेति प्रमाणस्य प्रथममुद्देशः, अत एव सप्ततत्त्वेषु नव तत्त्वेषुवाऽवश्यमन्तर्भूतस्य प्रमाणस्य पृथगुद्देशः, अनन्तधर्मात्मकवस्त्ववगाहित्वात् तत् सिद्धिनिबन्धनमपि प्रमाणं विधिनिषेधरूपत्वेन परस्परविरुद्धानामनन्तधर्माणामेकत्रा-ऽवस्थानलक्षणाविरोधनिमित्तापेक्षाभेदाधिगतये वस्त्वेकदेशाव-गाह्यभिप्रायविशेषरूपान्नयानपेक्षत इति प्रमाणसहकारित्वात् यस्य पृथगुद्देशः, प्रमाणनयैरधिगम्यानां तत्त्वानां तदनन्तरमुद्देशः, तत्वानां नाम-स्थापना-द्रव्य-भावनिक्षेपैश्चतुःप्रकारता सुव्याख्येयेति व्याख्याङ्गत्वान्निक्षेपस्य तदनन्तरमुद्देश इति ॥ ६ ॥

यद्यपि प्रकर्षेण संशयाद्यभावस्वभावेन मीयते परिच्छिद्यते वस्तु येन तत् प्रमाणमिति व्युत्पत्त्या संशयाद्यनात्मकवस्तुनिश्चय-करणं प्रमाणमिति सामान्यतः प्रमाणशब्दतः प्रमाणलक्षण मवगम्यते, तथापि तत् सन्निकर्षेन्द्रियादिकमज्ञानस्वरूपमेवेति नैयायिकाः, निर्विकल्पज्ञानमपिप्रमाणमिति बौद्धाः अर्थमात्रव्यवसायिज्ञानं

तथेति मीमांस्य संवेदनैकस्वभावं ज्ञानं मानमिति पारमार्थिक-पदार्थसार्थापलापिनो ज्ञानाद्वैतादिवादिन इति तदेतत्परमतनि-करव्यपोहायोच्यते ।

स्वपरव्यवसायि स्याज्ज्ञानं मानं नचापरम् ॥
उत्पत्तौ परतस्तस्य, तत्त्वं ज्ञप्तौ स्वतोऽपि तत् ॥ १० ॥

अत्र मानमिति लक्ष्यम् स्वपरव्यवसायिज्ञानमिति लक्षणम्, तत्र अज्ञानरूपस्य व्यवहारपथानवतारिणः सन्मात्रगोचरस्य स्व-समयप्रसिद्धस्य दर्शनस्य नैयायिकादिकल्पितस्य चेन्द्रियसन्निकर्षादेः प्रामाण्यापाकरणार्थं ज्ञानमिति विशेष्यम् तच्च राद्धान्ते मतिश्रुता-वधिमनः पर्यवकेवलभेदेन पञ्चविधमपि ग्राह्यम्, तत्र मतिश्रुता-वधयो भ्रमरूपामत्यज्ञान-श्रुताज्ञानविभङ्गज्ञानव्यपदेश्याः स्वपरव्य-वसायीति विशेषणेन व्यवच्छेद्याः, मनःपर्यवकेवलज्ञाने भ्रमरूपे भवत एव नेति, मनःपर्यवस्य दर्शनभिदा नास्ति, किन्तु मतिश्रुता-वधिकेवलानां दर्शनभिदा समस्ति, परन्तु ।

"साकारः प्रत्ययः सर्वो विमुक्तः संशयादिना ॥
साकारार्थपरिच्छेदात्, प्रमाणं तन्मनीषिणाम् ॥१॥"

इति वचन प्रामाण्यात्साकारोपयोगरूपस्य ज्ञानस्यैव प्रामाण्य-मिष्यते, नतु निराकारोपयोगरूपस्य दर्शनस्येति ज्ञानपदेन तद् व्यवच्छेदो युक्त एवेति तत्र असर्वपर्यायं सर्वद्रव्यं मतिश्रुतयो विषयः, असर्वपर्यायं रूपिद्रव्यमवधिविषयः, अवधिज्ञानस्यानन्त भागो मनःपर्यायविषयः सर्वद्रव्य-सर्वपर्यायाः केवलविषयः,

मतिज्ञानमिन्द्रियनिमित्तकमनिन्द्रियनिमित्तकमिति द्विविधम्, तद्-भेदा अवग्रहेहापायधारणा अर्थविषयाः, तत्रावग्रहोऽव्यक्तं ज्ञानम्, अवगृहीतार्थविशेषाकाङ्क्षणमीहा, ईहित विशेषनिर्णयोऽपायः, तस्यैव कञ्चित्कालमवस्थानं धारणा। व्यञ्जनस्यावग्रह एव भवति, व्यञ्जनावग्रहोऽप्राप्यकारिणोश्चक्षुर्मनसो नं भवति अन्येषां तु प्राप्यकारिणां स्पर्शनादीन्द्रियाणां भवति, श्रुतं मतिपूर्वकं, तदङ्ग-बाह्यमङ्गप्रविष्टश्च, तत्र सामायिकं चतुर्विंशतिस्तवो वन्दनं प्रति-क्रमणं कायव्युत्सर्गः प्रत्याख्यानं दशवैकालिकं उत्तराध्यायाः कल्पव्यवहारौ निशीथमृषिभाषितानीत्येवमादिकमनेकविधमङ्ग-बाह्यम्, आचारः सूत्रकृतं स्थानं समवायः व्याख्याप्रज्ञप्तिः ज्ञात-धर्मकथा उपासकाध्ययनदशा अन्तकृद्दशा अनुत्तरोपपातिकदशाः प्रश्नव्याकरणम् विपाकसूत्रम् दृष्टिवाद इत्येवं द्वादशविधमङ्गप्रविष्ट मिति, भव प्रत्ययः क्षयोपशमनिमित्तश्चेत्येवं द्विविधोऽवधिः, तत्र नारकाणां देवानाञ्च भवप्रत्ययोऽवधिः, नारकदेवेभ्यो भिन्नानां तिर्यग्योनिजानां मनुष्याणां च क्षयोपशमनिमित्तः, स च अनानुगमिकानुगमिकहीयमानकवर्द्धमानकानवस्थितावस्थितभेदेन षड्विधः, ऋजुमति-विपुलमतिभेदेन मनःपर्यवज्ञानं द्विविधमिति, केवलं पुनः परिपूर्णं समग्रमसाधारणं निरपेक्षं विशुद्धं सर्वभावज्ञापकं लोकालोकविषयमनन्तपर्यायमिति, पञ्चानामपि ज्ञानानां तत्त्वार्था-धिगमसूत्रादितो विशेषजिज्ञासुभिरधिगमः कर्त्तव्यः,प्रकृतमनुसरामः, ज्ञानमपिनिर्विकल्पकप्रत्यक्षं स्वलक्षणविषयकं प्रमाणतया बौद्धै-रुपेयते तस्य संशयविपर्ययानध्यवसायानाञ्च प्रमाणत्वापाकरणार्थं

व्यवसायीति विशेषणम्, संशयविपर्ययानध्यवसायानां समारोपत्वेन साजात्यम्, समारोपश्च अतस्मिँस्तदध्यवसायः, अतत्प्रकारे पदार्थे तत्प्रकारतानिर्णयः समारोप इति यावत्, एतल्लक्षणाक्रान्तता संशयादित्रयाणामपि, तत्र "साधकबाधकप्रमाणाभावादनवस्थितानेककोटिसंस्पर्शिज्ञानं संशयः, यथाऽयं स्थाणुर्वा पुरुषो वेति । विपरीतैककोटिनिष्टङ्कनं विपर्ययः, यथा शुक्तिकायामिदं रजतमिति, किमित्यालोचनमात्रमनध्यवसायः, यथा गच्छत् तृणस्पर्शज्ञानमिति, संशयादनात्मकत्वे सति निश्चयत्वं व्यवसायत्वमत्र बोध्यम्, पारमार्थिकपदार्थसार्थापलापि ज्ञानाद्वैतादिवादिमतापकरणाय परेति, ग्राहकाज्ज्ञानादन्योऽचेतनस्सचेतनो वाऽर्थः परपदेनात्र विवक्षितः, नित्यपरोक्षबुद्धिवादिनां मीमांसकधुरन्धराणां भाट्टानामेकात्मसमवायि ज्ञानान्तरप्रत्यक्षज्ञानवादिनां वैशेषिकनैयायिकानां मतापकरणाय स्वेति, सम्पूर्णञ्चेदं लक्षणवाक्यं परोपकल्पितस्यार्थोपलब्धिहेतुत्वादेः प्रमाणलक्षणत्वप्रतिक्षेपार्थम् । अर्थोपलब्धिसाधनत्वादेः प्रमाणलक्षणत्वप्रतिक्षेपे संवादकं श्रीरत्नप्रभसूरिवचनं यथा—

"अर्थस्य प्रमितौ प्रसाधनपटु प्रोचुः प्रमाणं परे<br>
तेषामञ्जनभोजनाद्यपि भवेद्वस्तुप्रमाणं स्फुटम् ॥<br>
आसन्नस्य तु भानता यदि तदा संवेदनस्यैव सा<br>
स्यादित्यन्धभुजङ्गरन्ध्रगमवत् तीर्थ्यैःश्रितं त्वन्मतम् ॥१॥"

इति, पराभिमतलक्षणव्यवच्छित्तय एवोक्तं नचापरमिति, स्वपरव्यवसायिज्ञानभिन्नं न च प्रमाणमित्यर्थः, प्रमाणाप्रमाणयोः परस्पर विरुद्धधर्मयोगित्वात् प्रमाणस्वभावेऽवष्टते तदितरस्त्व-

प्रमाणमिति सुखावबोधम्, एवञ्च प्रमेयाव्यभिचारिज्ञानं प्रमाणं, प्रमेयव्यभि चारिज्ञानमप्रमाणमिति, सर्वंज्ञानं स्वप्रकाशं स्वस्वरूपेऽव्यभिचारित्वात्प्रमाणमेव, तेन संशयादिकमपि स्वस्वरूपांशे प्रमाणमेव, अर्थ एव तु व्यभिचरितत्वादप्रमाणमिति बोध्यम् ।

प्रामाण्यमुत्पत्तौ ज्ञप्तौ च ज्ञानानां स्वत एव, अप्रमाण्यन्तु परत एवोत्पत्तौ चेति मीमांसककदाग्रहव्यपोहायाह उत्पत्ताविति तस्य ज्ञानस्य, तत्त्वं प्रामाण्यम्, उत्पत्तौ परतः सर्वं वाक्यं सावधारणमिति उत्पत्तौ परत एव, प्रामाण्यञ्चाप्रामाण्यस्याप्युपलक्षकं, तेन ज्ञानस्य प्रामाण्यमप्रामाण्यं च ज्ञानकारणगतगुणदोषरूपं ज्ञानसामान्यकारणभिन्नकारणमपेक्ष्योत्पद्यत इत्युत्पत्तौ परतस्तस्य तत्त्वमिति सूक्तम्, ज्ञप्तौ स्वतोऽपितत् प्रामाण्यमुपलक्षणादप्रामाण्यञ्च, ज्ञप्तौ स्वनिश्चये, स्वतोऽपीत्यपिना परत इत्यस्याम्रेडनम्, तेन प्रामाण्यमप्रामाण्यञ्च स्वतोऽभ्यासदशायां निश्चीयेते, अनभ्यासदशायां पुनः परतो निश्चीयेते, तत्र ज्ञानस्याभ्यासदशायां प्रमेयाव्यभिचारि, तदितरच्चास्मीति प्रामाण्याप्रामाण्यनिश्चयः संवादक-बाधकज्ञानमनपेक्ष्य प्रादुर्भवन् स्वतो भवतीत्यभिधीयते, अनभ्यासदशायां तु तदपेक्ष्य जायमानोऽसौ परतो भवतीत्यभिधीयते इति, अत्र मीमांसकमतस्योपदर्शनपुरस्सरं खण्डनं रत्नाकरावतारिकादितोऽवसेयम् ॥ १० ॥

चार्वाकः प्रत्यक्षमेवैकं प्रमाणं, सौगतवशेषिकौ प्रत्यक्षानुमाने द्वे प्रमाणे, साङ्ख्यः प्रत्यक्षानुमानागमाख्यानि त्रीणि प्रमाणानीति, नैयायिकाः प्रत्यक्षानुमानोपमानागमसंज्ञकानि चत्वारि प्रमाणानि,

अर्थापत्त्या सह तानि पञ्च प्राभाकराः अनुपलब्ध्या सह तानि षडिति भट्टवेदान्तिनौ, अन्ये च सम्भवैतिह्यादिकमप्यधिकमामनन्ति, तत्र प्रमाणे द्वे इत्युक्तौ सामान्यतः प्रमाणस्य द्वित्वसङ्ख्याधिगतावपि वैशेषिकसौगताभ्यां सह वैलक्षण्यं नाधिगतं भवतीत्यत उच्यते
"प्रत्यक्ष च परोक्षञ्चेत्येवं मानं द्विधा मतम् ।।

सांव्यवहारिकं पार-मार्थिकमेव माद्यञ्च ।। ११ ।। "

अक्षमिन्द्रियं प्रतिगतम् इन्द्रियाधीनतया यदुत्पद्यते तत्प्रत्यक्षमिति तत्पुरुषः, तथाचेन्द्रियाधीनोत्पत्तिकत्वं प्रत्यक्षपदव्युत्पत्तिनिमित्तं, तच्चमनसोऽनिन्द्रियत्वेन तज्जन्यप्रत्यक्षाव्यापकमिति स्पष्टत्वमेव प्रत्यक्षपद प्रवृत्ति निमित्तं तदेवच प्रत्यक्षस्य लक्षणम्, तच्च अनुमानाद्याधिक्येन विशेषप्रकाशम्, इन्द्रियसन्निकर्षजन्यज्ञानत्वन्तु प्रत्यक्षस्य लक्षणं न सम्भवति, अव्याप्त्यतिव्याप्त्यसम्भवदोषरहितस्यैव लक्ष्यतावच्छेदकसमनियतधर्मस्य लक्ष्ये तदितरभेदानुमापकतया लक्षणत्वस्यान्यत्र व्यवस्थापितत्त्वेनाप्राप्यकारि चक्षुर्मनोजन्यप्रत्यक्षागतत्वेनाव्याप्तिदोषाघ्रातत्वात्, यथा च चक्षुर्मनसोरप्राप्यकारित्वं तथोपपादितं रत्नाकरावतारिकादौ, लक्ष्यैकदेशावृत्तित्वमव्याप्तिः, अलक्ष्यवृत्तित्वमतिव्याप्तिः, लक्ष्यमात्रावृत्तित्वमसम्भव इत्येवमव्याप्त्यादीनां लक्षणमवसेयम्, अक्षाणां परमक्षव्यापारनिरपेक्षं मनो व्यापारेणासाक्षादर्थपरिच्छेदकं परोक्षम्-अनन्तराभिहितस्पष्टत्वशून्यं प्रमाणं परोक्षमिति यावत्, स्पष्टत्वाऽस्पष्टत्वे विषयताविशेषे अन्यत्र निर्णीते । चकारद्वयेन द्वयोस्तुल्यकक्षत्वावेदनेनान्याभिमतप्रत्यक्षप्रमाणज्येष्ठताऽपाकृता, प्रामाण्यं प्रति द्वयोरपि विशेषाभावात्, इत्येवम्=एवं प्रकारेण, मानं

द्विधा द्विप्रकारम्, मतम्, जैनाचार्यैरिष्टम्, न तु प्रत्यक्षानुमानभेदेनेति वैशेषिकबौद्धमतवैलक्षण्यं निर्वहति। तत्र आद्यं प्रत्यक्षम्, संव्यवहारो बाधारहितप्रवृत्तिनिवृत्तीप्रयोजनमस्येति सांव्यवहारिकं, बाह्येन्द्रियादिसापेक्षत्वादपारमार्थिकमस्मदादिप्रत्यक्षम्, परमार्थेभवं पारमार्थिकं मुख्यम्, आत्मसन्निधिमात्रापेक्षमवध्यादिप्रत्यक्षम्, एवममुना प्रकारेण, चकाराद्द्विधामतमित्यन्वेति, न तु लौकिकसन्निकर्षजन्यभेदेन तद् द्विविधम्, सामान्यलक्षणाद्यलौकिकसन्निकर्षजन्यत्वेनाभिमतज्ञानस्येहाख्यप्रमाणव्यापारप्रभवत्वेन परोक्षतर्कस्वरूपतयैव जैनैरभ्युपगमात्, चाक्षुषमानसप्रत्यक्षयोः सन्निकर्षजन्यत्वस्यैवानभ्युपगमादिति, सांव्यवहारिकप्रत्यक्षमपीन्द्रियनिबन्धनानिन्द्रियनिबन्धनभेदेन द्विविधम्, चक्षुः स्पर्शनरसनघ्राणश्रोत्राणि पञ्चेन्द्रियाणि, तान्युपकरणेन्द्रिय-निर्वृत्तीन्द्रियभेदेन द्विविधानि द्रव्येन्द्रियशब्दव्यपदेश्यानि, उपयोगेन्द्रियं भावेन्द्रियम्, प्रकृते द्रव्येन्द्रियमेवेन्द्रियशब्देन गृह्यते, अनिन्द्रियं मनः, मनस इन्द्रियजन्यज्ञाने व्यापारेऽपीन्द्रियाणामसाधारणत्वात् तेन तद् व्यपदेशः, एतद् द्वयमप्यवग्रहेहापायधारणाभेदात् प्रत्येकं चतुर्भेदम्। तत्र व्यञ्जनावग्रहार्थावग्रहभेदेनावग्रहस्य द्वैविध्यम्, ईहादयोऽर्थस्यैव न व्यञ्जनस्येति।

विषयविषयिसंनिपातानन्तरसमुद्भूतसत्तामात्रगोचरदर्शनाज्ञातमाद्यमवान्तरसामान्याकारविशिष्टवस्तुग्रहणमवग्रहः, अवगृहीतार्थविशेषाकाङ्क्षणमीहा, ईहितविशेषनिर्णयोऽपायः, स एव दृढतमावस्थापन्नो धारणा, इति प्रमाणनयतत्त्वालङ्कारसूत्रचतुष्ट-

यमेषां स्वरूपावेदकम् । पारमार्थिकप्रत्यक्षं विकलं सकलं चेति द्विप्रकारम्, तत्र विकलमवधिमनःपर्यायज्ञानभेदेन द्विप्रकारम्, तयोः स्वरूपविषयादिकं प्रदर्शितं प्राक्, प्रमाणनयतत्त्वालोकालङ्कारे च

"अवधिज्ञानावरणविलयविशेष समुद्भवं भवगुणप्रत्ययं रूपिद्रव्यगोचरमवधिज्ञानम्,'

"संयमविशुद्धिनिबन्धनाद्विशिष्टावरणविच्छेदाज्जातं मनोद्रव्यपर्यायालम्बनं मनःपर्यायज्ञानम्"

इति अवतारिकायां संयमेत्यादि सूत्रव्याख्यानं यथा–
विशिष्टचारित्रवशेन योऽसौ मनःपर्यायज्ञानावरणक्षयोपशमस्तस्माद्दुद्भूतं मानुषक्षेत्रवर्त्तिसंज्ञिजीवगृहीतमनोद्रव्यपर्यायसाक्षात्कारि यज्ज्ञानं तन् मनःपर्यायज्ञानमित्यर्थः, सकलं तु केवलज्ञानं, तत् स्वरूपविषयादिकमावेदितं प्राग्, प्रमाणनयतत्त्वालोकालङ्कारसूत्रं तदुपदर्शकमिदम्–

" सकलं तु सामग्रीविशेषतः समुद्भूत समस्तावरणक्षयापेक्षं निखिलद्रव्यपर्यायसाक्षात्कारिस्वरूपं केवलज्ञानम् "

मीमांसकः सर्वज्ञं न स्वीकरोति तन्मतस्योपदर्शनपुरस्सरमपाकरणं रत्नाकरावतारिकादौ, केवलज्ञानवान् अर्हन्नेव, प्रमाणाविरोधिवाक्त्वेन तस्य निर्दोषत्वम्, जैनैस्तद्व्यतिरिक्तो जगत्कर्त्ता सर्वज्ञ ईश्वरो नाभ्युपेयते, जगत्कर्त्तुरीश्वरस्य खण्डनं रत्नाकराद्याकरग्रन्थतोऽवसेयम्,

कवलाहारसर्वज्ञत्वयोरविरोधेन केवलिनः कवलाहारः सम्भवति केवलिनि कवलाहारापहारप्रवणा दिक्पटा रत्नाकराद्युपदर्शितकवलाहारव्यवस्थापकयुक्तितः प्रामाणिकसभातो निष्काशनीयाः, एवञ्च पञ्चविधज्ञानमध्यादवध्यादिज्ञानत्रयं प्रत्यक्षप्रमाण एवान्तर्भूतम्, मतिज्ञानन्तु किञ्चित् सांव्यवहारिकप्रत्यक्षे, किञ्चिच्चानुमादौ परोक्षे, श्रुतज्ञानं तु परोक्षप्रमाणमेवेति बोध्यम् ॥ ११ ॥

परोक्षप्रमाणं यद्यनुमानैकस्वरूपं तदाप्युक्तिवैचित्र्यमात्रं न तु वैशेषिकसौगताभ्यां वैलक्षण्यम्, एवमनुमानागमोभयरूपत्वे अनुमानोपमानागमार्थापत्त्यादिभिदायामपि साङ्ख्यनैयायिकप्राभाकरादितो न विशेष इति उच्यते—

स्मरणं प्रत्यभिज्ञानं तर्कोऽनुमानमागमः ॥
एवं पञ्चविधं जैनैः परोक्षं मानमिष्यते ॥ १२ ॥

स्पष्टम्, तत्र संस्कारप्रबोधजन्यं ज्ञानं स्मरणम् तच्चानुभूतार्थविषयकं तदित्याकारम्, यथा तज्जिनविम्बमिति, यत्तु 'अव्याप्तेरधिकव्याप्ते रलक्षणमपूर्वदृग् ॥ यथार्थानुभवोमानमनपेक्षतयेष्यते ॥ ॥ 'इत्येवमुदयनाचार्येणानधिगतार्थाधिगन्तृप्रमाणमिति मीमांसकलक्षणं धारावाहिकबुद्धावव्याप्त्या भ्रमेऽतिव्याप्त्या निरस्य यथार्थानुभवत्वं मानत्वमिति लक्षणमुररीकृत्य स्मरणस्य मानत्वमपाकृतम्, तन्न युक्तम्, व्याप्तिज्ञानापेक्ष्योत्पत्तिकस्याप्यनुमानस्य स्वविषयपरिच्छेदे स्वातन्त्र्यात् प्रमाणत्वस्य सम्भवेन यथार्थज्ञानत्वस्यैव प्रमाणलक्षणत्वौचित्यात् । 'अनुभवस्मृतिहेतुकं तिर्यगूर्ध्वता-

सामान्यादिगोचरं संकलनात्मकं ज्ञानं प्रत्यभिज्ञानम्,' इतिसूत्रलक्षितं प्रत्यभिज्ञानमवधार्यम्, तज्जातीय एवाय गोपिण्डः, गोसदृशो गवयः, स एवायं जिनदत्त इत्यादिज्ञानं प्रत्यभिज्ञानम्, इदं च स्थैर्ये प्रमाणम्, अत्रैव नैयायिकमीमांसकाद्यभिमतोपमानप्रमाणस्यान्तर्भावः, अस्मादयं विसदृशोऽस्मादय ह्रस्वोदीर्घ इत्यादिज्ञानमपि प्रत्यभिज्ञानमेवेति ।

" उपलम्भानुपलम्भसम्भवं त्रिकालीकलितसाध्यसाधनसम्बन्धाद्यालम्बनमिदमस्मिन्सत्येव भवतीत्याद्याकाक्ष संवेदनमूहापरनामा तर्कः " इति सूत्रलक्षितं तर्कप्रमाणमवगन्तव्यम्, इदञ्च व्याप्तिग्राहकं कार्यकारणभावग्राहकं वाच्यवाचकभावग्राहकञ्च, सामान्यलक्षणप्रत्यासत्तेरनङ्गीकारात् तज्जन्यतयाऽभिमतं प्रत्यक्षमपि तर्कप्रमाणजन्यं तर्क एवेति ।।

यावान् कश्चिद्धूमः स सर्वो वह्नौ सत्येव भवतीति तस्मिन्न सत्यसौ न भवत्येवेत्यादिज्ञानं तर्कः । आद्यमन्वयव्याप्तौ, द्वितीयं व्यतिरेकव्याप्तावुदाहरणम् । स्वार्थंपरार्थभेदेनानुमानं द्विप्रकारम्, तत्र हेतुग्रहणसम्वन्धस्मरणहेतुकं साध्यविज्ञानं स्वार्थानुमानम् यथा पर्वतेधूमग्रहणं, यावान् कश्चिद् धूमः स सर्वो वह्नौ सत्येव भवति तस्मिन्नसति न भवत्येवेत्यादितर्कात्मकव्याप्त्यनुभवजन्योक्तव्याप्तिस्मरणं तदुभयहेतुकं पर्वतो वह्निमानित्याकारकं पर्वतरूपपक्षविशेष्यक वह्निरूपसाध्यप्रकारकं ज्ञानमनुमानम्, अन्यथानुपपत्तिश्चेदस्ति तत्र त्रयेण किम् ? ।। नान्यथानुपपत्तिश्चेदस्ति तत्र त्रयेण किम् ? ।।१।। इति वचनात् निश्चितान्यथानुपपत्त्यैकलक्षणो

हेतुः, नतु पक्षसत्त्व-सपक्षसत्त्व-विपक्षसत्त्वैतत्त्रिलक्षणकः सौगत-सम्मतः, नवा पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वाबाधितत्वासत्-प्रतिपक्षत्वैतत् पञ्चलक्षणो नैयायिकसम्मतः, स श्यामः तत् पुत्रत्वात् प्रेक्ष्यमाणैतत्पुत्रवदित्यत्र हेत्वाभासेऽपि तत् पुत्रत्वे निरुक्तत्रिलक्षणादेः सद्भावात्, अत्र पूर्वपक्षसमाधानप्रकारौ रत्नाकरावतारिकादितोऽवसेयौ। अप्रतीतमनिराकृतमभीप्सितं साध्यम्, तेन शङ्कितादेः प्रत्यक्षादिबाधितस्यानभिमतस्य च साध्यत्वव्यवच्छेदः, व्याप्तिग्रहणसमयापेक्षया धर्मः साध्यम्, आनुमानिकप्रतीत्यवसरापेक्षया पुनः पक्षापरपर्यायस्साध्यविशिष्टः प्रसिद्धो धर्मी साध्यम्। विकल्पतः प्रमाणतो विकल्पप्रमाणाभ्याञ्च धर्मिणः प्रसिद्धिः क्रमेण समस्ति समस्तवस्तुवेदी, क्षितिधरकन्धरेयं धूमध्वजवती, ध्वनिः परिणतिमानित्यत्र ज्ञेया, पक्षहेतुवचनात्मकं परार्थमनुमानमुपचारात्, तत्र पर्वतो वह्निमानिति पक्षवचनं परेण प्रतिज्ञेत्यभिधीयते, धूमादितिहेतुवचनम्, व्युत्पन्नमिति प्रतिवाद्यपेक्षयैतज्ज्ञेयम्, व्युत्पन्नस्य प्रतिवादिनः कृशानुमानयं पाकप्रदेशः सत्येव कृशानुमत्त्वे धूमवत्त्वस्योपपत्तेः असत्यनुपपत्तेर्वेति पक्षहेतुवचनाभ्यामेवायं प्रदेशोवह्निमानित्यनुमानस्योदयात्, तदप्यनुमानं हेतुग्रहणव्याप्तिस्मरण कारणकमेव, न दृष्टान्तवचनं परप्रतिपत्तये प्रभवति, नोपनयनिगमनेऽपि तथा, पक्षहेतुप्रयोगादेव तस्याः सद्भावात्, बहिर्व्याप्तिग्रहणार्थस्य दृष्टान्तवचनस्यान्तर्व्याप्त्यैवानुमानोपपत्तौ वैयर्थ्यमेवामन्दमतिप्रतिवादिव्युत्पादनार्थन्तु दृष्टान्तोपनयनिगमनान्यपि प्रयोक्तव्यानि, प्रतिबन्धप्रतिपत्तेरास्पद दृष्टान्तः साधर्म्यवैधर्माभ्यां द्विधा, यत्र यत्र धूमस्तत्रतत्र वह्नि र्यथा महानस

इति साधर्म्यं दृष्टान्तः अग्न्यभावे न भवत्येव धूमो यथा महानसे इति वैधर्म्यं दृष्टान्तः हेतोः साधर्म्यधर्मिण्युपसंहरणमुपनयः, यथा धूमश्चात्र प्रदेशे, साध्यधर्मिणि साध्यधर्मस्योपसंहरणं निगमनम्, यथा तस्मादग्निरत्र। एते पञ्चाप्यवयवसंज्ञया प्रतीताः, पञ्चावयववाक्यं न्यायः, उपलब्ध्यनुपलब्धिभ्यां द्विप्रकारो हेतुः, तदुभयमपि विधिनिषेधसिद्धिनिबन्धनम्, विधिनिषेधौ सदंशासदंशौ, तत्रासदंशः प्रागभावप्रध्वंसाभावेतरेतराभावात्यन्ताभावभेदेन चतुर्धा, यन्निवृत्तावेव यस्य समुत्पत्तिः स तस्य प्रागभावः, यथा मृत्पिण्डनिवृत्तावेवसमुत्पद्यमानस्य घटस्य मृत्पिण्डः, यदुत्पत्तौकार्यस्यावश्यं विपत्तिः सोऽस्य[1] प्रध्वंसाभावः, यथा कपालकदम्बकोत्पत्तौ नियमतो विपद्यमानस्य कलशस्य कपालकदम्बकम्, स्वरूपान्तरात्स्वरूपव्यावृत्तिरितरेतराभावः, यथा स्तम्भस्वभावात् कुम्भस्वभावव्यावृत्तिः। कालत्रयापेक्षिणी हि तादात्म्यपरिणामनिवृत्तिरत्यन्ताभावः, यथा चेतनाचेतनयोः, अविरुद्धोपलब्धिविरुद्धोपलब्धिभेदेनोपलब्धिहेतोर्द्वैविध्यम्, तत्राविरुद्धोपलब्धिहेतोर्विधिसिद्धौ षड्विधत्वम्, विरुद्धोपलब्धिहेतोः प्रतिषेधप्रतिपत्तौसप्तप्रकारत्वम्, अनुपलब्धिहेतोरप्यविरुद्धानुपलब्धिविरुद्धानुपलब्धिभ्यां द्विविधत्वं तत्राविरुद्धानुपलब्धेः प्रतिषेधावबोधे सप्तप्रकारत्वं, विरुद्धानुपलब्धेस्तु विधिप्रतीतो पञ्चप्रकारत्वं च प्रमाणनयतत्त्वालोकालङ्कारसूत्रतोऽवसेयम्। स्वज्ञातयथावस्थितार्थवक्तृलक्षणाप्तवचनाविर्भूतार्थसंवेदनमागमः, निरुक्ताप्तवचनन्तूपचारात्, क्षीणदोषो ह्याप्तः स्वज्ञातयथावस्थितार्थमेव ब्रूते, तदुक्तम्—

'आगमो ह्याप्तवचनमाप्तिं दोषक्षयं विदुः ।। क्षीणदोषोऽनृतं वाक्यं न ब्रूयाद्धेत्वसम्भवात् ।। १ ।।' इति लौकिकालौकिकभेदेनाप्तस्य द्वैविध्यात् तद्वचनस्य द्वैविध्यम्, जनकादिर्लौकिकोऽलौकिकस्तीर्थंकरादिः, वर्णपदवाक्यात्मकं वचनम्, अकारादीनां पौद्गलिकानां वर्णानामन्योन्यापेक्षाणां निरपेक्षसंहतीनां पदानां निरपेक्षसहतिरूपस्य वाक्यस्यानित्यत्वेन तत् समुदायरूपस्य वेदस्याप्यनित्यत्वमेव, तन्नित्यत्वप्रदर्शनपराण्यपौरुषेयत्वसमर्थकानि

"वेदस्याध्ययनं सर्वं गुर्वध्ययन पूर्वकम् ।
वेदाध्ययनवाच्यत्वादधुनाऽध्ययनं यथा ।। १ ।।
अतीतानागतौ कालौ वेदकार विवर्जितौ ।
कालत्वात् तद्यथा कालो वर्त्तमानः समीक्ष्यते ।। २ ।।
शब्दे दोषोद्भवस्तावद् वक्त्रधीन इति स्थितिः ।
तदभावः क्वचित्तावद् गुणवद्वक्तृकत्वतः ।। ३ ।।
तद् गुणैरपकृष्टानां शब्दे संक्रान्त्य सम्भवात् ।
वेदे तु गुणवान् वक्ता निर्णेतुं नैव शक्यते ।। ४ ।।
ततश्च दोषाभावोऽपि निर्णेतुं शक्यतां कथम् ।
वक्त्रभावे तु सुज्ञानो दोषाभावो विभाव्यते ।। ५ ।।
यस्माद्वक्तुरभावेन न स्यु र्दोषा निराश्रयाः ।

इत्यादि भट्टवचनानि विस्तरतः शब्दानित्यत्वसाधकयुक्तिस्तोमाविर्भावानेन सम्मत्यादावपाकृतानि, स्वाभाविकार्थप्रतिपत्त्यनुकूलशक्तिसमयाभ्यामर्थबोधनिबन्धन शब्दः, अस्मात्पदादयमर्थो बोद्धव्य इत्येवं रूपादिदं पदममुमर्थं बोधयत्वियेवं रूपाद्वा

पुरुषशङ्कितलक्षणसमयादेव केवलाच्छब्दोऽर्थमवबोधयतीति नैयायिकमतस्यातीन्द्रियातिरिक्तार्थप्रतिपत्यनुकूलशक्तिव्यवस्थापनेन प्रतिबन्धकाभावस्य स्वातन्त्र्ये दाहंप्रतिकारणत्वं न तु दाहानुकूलशक्तिमत्त्वेन वह्ने दाहं प्रति काणत्वमिति तदभिमतामकरणेन च यथाखण्डनं तथोपपादितं रत्नाकरे, शब्दस्यार्थप्रकाशकत्वं स्वाभाविकं प्रदीपवत्, यथार्थत्वायथार्थत्वे पुनः पुरुषगुणदोषनिबन्धने। विधिनिषेधोभयात्मकबहिरन्तः पदार्थप्रतिपादने सप्तभङ्गात्मकवाक्यमेव प्रगल्भते, एकत्र वस्तुनि एकैकधर्मपर्यनुयोगवशादविरोधेन व्यस्तयोः समस्तयोश्च विधिनिषेधयोः कल्पनया स्यात्काराङ्कितः सप्तधा वास्यप्रयोगः सप्तभङ्गीति सप्तभङ्गीस्वरूपप्रतिपादकं प्रमाणनयतत्वालङ्कारसूत्रम्, अनन्तधर्मात्मकस्य वस्तुनः प्रतिधर्मं विधिनिषेधाभ्यां सप्तधैव संशयः, ततश्च सप्तधैव जिज्ञासा, ततस्सप्तधैव प्रतिप्राश्यपुरुषपर्यनुयोग इति ततस्तदपाकरणपरमुत्तरवाक्यस्वरूपं सप्तभङ्गात्मकमेव महावाक्यम्, तदुक्तम्–

'या प्रश्नाद्विधिपर्युदासभिदया बाधच्युता सप्तधा
धर्मं धर्ममपेक्ष्यवाक्यरचनाऽनेकात्मके वस्तुनि।
निर्दोषानिरदेशिदेव भवता सा सप्तभङ्गी यया
जल्पन् जल्परणाङ्गणे विजयते वादी विपक्षं क्षणात्॥१॥'

इति १ स्यादस्त्येव सर्वं, २ स्यान्नास्त्येव सर्वम्, ३ स्यादस्त्येव स्यान्नास्त्येव सर्वम्, ४ स्यादवक्तव्यमेव सर्वम्, ५ स्यादस्त्येव स्यादवक्तव्यमेव सर्वम्, ६ स्यान्नास्त्येव स्यादवक्तव्यमेव सर्वम्, ७ स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेव सर्वम् इत्येवं सप्तभङ्गानां समाहार-

लक्षणा सप्तभङ्गी, तत्र प्रथमो भङ्गो विधिकल्पनया, द्वितीयो निषेधकल्पनया, तृतीयः क्रमतो विधिनिषेधकल्पनया, चतुर्थो युगपद् विधिनिषेधकल्पनया, पञ्चमो विधिकल्पनया युगपद् विधिनिषेधकल्पनया च, षष्ठो निषेधकल्पनया युगपद् विधिनिषेधकल्पनया च सप्तमः क्रमतो विधिनिषेधकल्पनया युगपद्विधिनिषेधकल्पनया च। सर्वत्र स्यादित्यनेकान्तावद्योतकमव्ययम्, तथा चानेकान्तात्मके वस्तुनि स्वप्रतिपक्षधर्मयुक्ते स्वसद्भावो नापेक्षामन्तरेणेति स्यात् पदोपादानात् कथञ्चिदिति लभ्यते तथा च स्यादस्त्येवसर्वमित्यस्य सर्वं कुम्भादिवस्तु स्व द्रव्यक्षेत्रकालभावरूपेणास्त्येव, न पुनः परद्रव्यक्षेत्रकालभावरूपेण, तेनाप्यस्तित्वे स्वरूपहानिप्रसङ्गः, स्यान्नास्त्येव सर्वमित्यस्य परद्रव्यक्षेत्रकालभावरूपेण कुम्भादिवस्तु नास्त्येवेति, एवं तृतीयादिभङ्गानामप्यर्थो ज्ञेयः, भङ्गमात्रेऽनभिमतार्थ व्यावृत्त्यर्थमवधारणार्थकैवकारोपादानम्, तदुक्तम्–

'वाक्येऽवधारणं तावदनिष्टार्थनिवृत्तये। कर्त्तव्यमन्यथाऽनुक्तसमत्वात् तस्य कुत्रचित् ॥१॥' इति, प्रतिनियतस्वरूपप्रतिपत्तये स्यादितिपदं भङ्गमात्रे प्रयोक्तव्यम्, यत्राप्यसौ न प्रयुज्यते तत्रापि बुद्धिमद्भिः प्रतीयत एव, तदुक्तम्–

'सोऽप्रयुक्तोऽपि वा तज्ज्ञैः सर्वत्रार्थात्प्रतीयते। यथैवकारोऽयोगादिव्यवच्छेदप्रयोजनः ॥ १ ॥' इति, अस्तेवेत्युक्तौ सर्वप्रकारेणास्तित्वं नास्त्येवेत्युक्तौ सर्वप्रकारेण नास्तित्वं प्रसज्येतेति प्रतिनियतावच्छेदकप्रतिपत्तये स्यादित्युपादेयमिति यावत्, क्वचिद् विधेः क्वचिन्निषेधस्य क्वचित् क्रमेण विधिनिषेधयोः क्वचिद् युगपद् विधि-

निषेधोभयात्मकावक्तव्यत्वस्य क्वचिद्विधिसम्बलितावक्तव्यत्वस्य क्वचिन्निषेधसम्बलितावक्तव्यत्वस्य क्वचिद् क्रमिकविधिनिषेधोभयसम्बलितस्यावक्तव्यत्वस्य विवक्षातः प्राधान्येन तत् तद् भङ्गतः प्रतीते स्तदन्यस्य गौणतोऽवगमाद् विधिप्रधान एव ध्वनिरित्याद्येकान्तोनेकान्तः, युगपत् प्रधानतयार्ऽपिताभ्यामस्तित्वनास्तित्वाभ्यामेकस्य वस्तुनोऽभिधित्सायां तथा प्रतिपादकस्य कस्यचिच्छब्दस्याभावात् स्यादवक्तव्यं जीवादिवस्त्विति योज्यं भङ्गोऽत्र चतुर्थतया दर्शितः, तं तृतीयतयाकेचित् पठन्ति, स्यादस्त्येव सर्वं, स्यान्नास्त्येव सर्वम्, स्यादवक्तव्यमेव सर्वमिति भङ्गत्रयं सकलादेशतया तदन्यभङ्ग चतुष्टयं च विकलादेशतया व्यवहरन्ति, देवसूरिमते सप्तापि भङ्गाः सकलादेशाविकलादेशाश्च, प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुनः कालादिभिरभेदवृत्तिप्राधान्यादभेदोपचाराद्वा यौगपद्येन प्रतिपादकं वचः सकलादेशः, तद्विपरीतस्तु विकलादेशः, इतिसूत्रद्वयलक्षितौ तावववधार्यौ। कालादयश्च।

"कालात्मरूपसम्बन्धाः संसर्गोपक्रिये तथा। गुणिदेशार्थशब्दाश्चेत्यष्टौकालादयः स्मृताः ॥ १॥" इति वचनसन्दर्शिताः, एतेषां सम्यगनुगमनं रत्नाकरावतारिकातो विधेयम्। प्रथमो भङ्गः सङ्ग्रहनयेन, द्वितीयभङ्गो व्यवहारनयेन, तृतीयभङ्गो निरुक्तनयाभ्यां, तुर्य ऋजुसूत्रनयेन, पञ्चमः सङ्ग्रहर्जुसूत्राभ्यां, षष्ठो व्यवहारर्जुसूत्राभ्यां, सप्तमस्संग्रहव्यवहारर्जुसूत्रैरात्मानमासादयन्तीत्येवं विषयोपदर्शन तत् तदवच्छेदकभेदसमर्थनेन प्रमाणेप्युपयुज्यन्ते नया इति प्रमाण-स्वरूपावेदनानन्तरं नयाः सप्तेति नयस्वरूपावेदनम्, श्रुताख्यप्रमाणविषयीकृतस्यानन्तधर्मात्मकवस्तुन इतरांशोदासीन्येवैकदेशावधारणात्मकप्रतिपत्रभिप्रायविशेषो नयः, एतत् संवादकमिदं पद्यद्वयम्।

" अहो ? चित्रं चित्रं तव चरितमेतन्मुनिपते ।
स्वकीयानामेषां विविधविषयव्याप्तिवशिनाम् ॥
विपक्षापेक्षाणां कथयसि नयानां सुनयतां ।
विपक्षक्षेप्तृणां पुनरिह विभो? दुष्टनयताम् ॥१॥
निशेषांशजुषां प्रमाणविषयीभूयं समासेदुषां ।
वस्तूनां नियतांशकल्पनपराः सप्तश्रुतासङ्गिनः ॥
औदासीन्यपरायणास्तदपरे चांशे भवेयु नया– ।
श्चेदेकान्तकलङ्कपङ्ककलुषास्तेस्यु स्तदा दुर्नयाः ॥२॥"

इति, वस्त्वेकदेशस्य न वस्तुत्वं किन्तु वस्त्वंशत्वं, तदुक्तं–

नायं वस्तु न चा वस्तु वस्त्वंशः कथ्यते बुधैः ।
नासमुद्रः समुद्रोवा समुद्रांशो यथैव हि ॥१॥
तन्मात्रस्य समुद्रत्वे शेषांशस्यासमुद्रता ।
समुद्रबहुतावा स्यात् तत्त्वे क्वास्तु समुद्रवित् ॥२॥ इति,

तत्र वस्त्वंशे प्रवर्त्तमानोऽभिप्रायविशेषोऽपि स्वार्थैकदेशव्यवसाय-लक्षणो न प्रमाणं नाप्यप्रमाणं किन्तु प्रमाणांशो नयः, तदुक्तं–

" ना समुद्रः समुद्रोवा समुद्रांशो यथैवहि ॥
नाप्रमाणं प्रमाणं वा प्रमाणांशस्तथा नयः ॥१॥"

ननु जैनमत एव प्रमाणभिन्नतया नयस्योपदर्शनं नान्यत्रेति चेत्, न, मतशब्दवाच्यस्य नयातिरिक्तस्य दुर्वचत्वात्, यत्र जैनमत इत्युच्यते तत्र जननये इत्यप्यभिधीयते एवं वैशेषिकेनये वैशेषिके मते, नव्यनये नव्यमते इत्यादेर्बहुलं दर्शनात् ।

ननु पुरुषाभिप्राय विशेषाणां नयानां पुरुषानन्त्यमेव स्यात् कथं सप्तसङ्ख्यत्वमिति, उच्यते–

नैगमः सङ्ग्रहश्चैव व्यवहारर्जुसूत्रकौ ॥

शब्दः समभिरूढश्चैवंभूतौ मते ऽत्रनयाः ॥१३॥

अत्र नैगमसङ्ग्रहव्यवहारा द्रव्यार्थिकाः, ऋजुसूत्र-शब्दसमभिरूढैवंभूताः पर्यायार्थिका इति द्रव्यार्थिकपर्यायार्थिकभेदेन द्वैविध्यम् एवं ऋजुसूत्रान्ताश्चत्वारोऽर्थनयाः शब्दाद्यास्त्रयः शब्दनयाः, तत्र परसङ्ग्रहनैगमौ निश्चयः, अन्ये व्यावहारिक इत्येवं द्वैविध्यं नयानां प्रतिपत्तव्यम्, तत्र धर्मयोर्धर्मिणो धर्मधर्मिणोश्च प्रधानोपसर्जनभावेन यद्विवक्षणं सनैकगमो नैगम इति प्राधान्येन सामान्यविषयकबोधवृत्तित्वे सति प्राध्यनेन विशेषविषयकबोधवृत्ति नयत्वव्याप्यजातिमत्त्वं नयत्वमिति बोध्यम्, धर्मद्वयादीनामेकान्तिकपार्थक्याभिसन्धि नैगमाभासः इति, तयोराकरत उदाहरणान्यवसेयानि । सामान्यमात्रग्राही परामर्शः संग्रहः, सपरोऽपरश्च, अशेषविशेष्वौदासीन्यं भजमानः शुद्धद्रव्यं सन्मात्रमभिमन्यमानः परामर्शः परसङ्ग्रहः । विश्वमेकं सदविशेषादितियथा । विशेषनिराकरणपरत्वे तु तदाभासत्वम्, द्रव्यत्वादीन्यवान्तरसामान्यानि मन्यमानस्तद्भेदेषु गजनिमीलिकामवलम्बमानः परामर्शोऽपरसंग्रहः । यथा धर्मादिद्रव्याणामैक्यं द्रव्यत्वाभेदादित्यादिः, तद्विशेषापह्नवेतु तदाभासत्वम् । प्राधान्येन विशेषानवगाहिप्राधान्येन सामान्यावगाहिमात्रेवृत्ति जातिमत्त्वं सङ्ग्रहस्य लक्षणम् । संग्रहेण गोचरीकृतानामर्थानां विधिपूर्वकमवहरणं येनाभिसन्धिना क्रियते सोऽभिप्रायविशेषो व्यवहारः, यथा यत् सत् तद् द्रव्यं पर्यायोवेत्यादिः, अपारमार्थिकद्रव्यपर्यायविभागाभ्युपगन्त्रभिप्रायो व्यवहाराभासः, यथा चार्वा-

कदर्शनम् । प्राधान्येन विशेषमात्रावगाहिपरामर्शमात्रवृत्तिजातिमत्त्वं व्यवहारस्य लक्षणम्, प्राधान्येन सामान्यमात्रावगाहिनो नैगमस्य सङ्ग्रहे, प्राधान्येन विशेषमात्रावगाहिनस्तस्य व्यवहारे चान्तर्भावमुररीकृत्य नैगमनयो नातिरिक्त इति सिद्धसेनानुयायिनः, प्राधान्येन वर्त्तमानक्षणस्थायिपर्यायमात्राग्राही द्रव्ये गजनिमीलिकामवलम्बमानोऽभिप्रायविशेषा ऋजुसूत्रः, यथा सौगतदर्शनम् । कालकारकलिङ्गसङ्ख्यापुरुषोपसर्गभेदेन ध्वनेरर्थभेदमभिमानो द्रव्यरूपतयाऽभेदे तु गजनिमीलिकामवलम्बमानोऽभिप्रायविशेषः शब्दः स च साम्प्रतइत्याख्यायते, तत्र कालभेदे बभूव भवति भविष्यति सुमेर्वादिः, अत्र शब्दनयोऽतीतवर्त्तमानभविष्यलक्षणकालत्रयभेदात् सुमेरो भेंद प्रतिपद्यते, कारकभेदे करोति क्रियते कुम्भ इति, लिङ्गभेदे तटस्तटीतटमिति, सङ्ख्याभेदे दाराः कलत्रमिति, पुरुषभेदे एहि मन्ये रथेन यास्यसि नहि यास्यसि यातस्ते पितेति, उपसर्गभेदे सन्तिष्ठते अवतिष्ठते इत्युदाहरणमवबोद्धव्यम् । कालादिभेदेन ध्वनेरर्थभेदमेवाभिमानोऽभिप्रायः शब्दाभासः, उदाहरणं पूर्वोक्तमेवैकान्तभेदसमर्थनपरम् । पर्यायशब्देषु निरुक्तिभेदेनार्थभेदमभिमानोऽर्थगतमभेदन्तूपेक्ष्यमाणोऽभिप्रायविशेषः समभिरूढः, यथा इन्दनादिन्द्रः शकनाच्छक्रः पूर्दारणात् पुरन्दर इत्यादिषु । एकान्तार्थभेदाभिदानस्तेषान्तदाभासः, यथेन्द्रः शक्रः पुरन्दर इत्यादयः शब्दा भिन्नाभिधेया एव भिन्नशब्दत्वात्, करिकुरङ्गादिशब्दवत्, शब्दानां स्वप्रवृत्तिनिमित्तभूतक्रियाविष्टमर्थं वाच्यत्वेनाभ्युपगच्छन्नभिप्रायविशेष एवम्भूतः, सर्वे शब्दाः क्रिया शब्दा एव, पञ्चतयी तु शब्दानां व्यवहारमात्राद् न निश्चयादित्ययं

नयः स्वीकुरुते । यथेन्दनमनुभवन्निन्द्रः शकनक्रियापरिणतः शक्रः पूर्दारणप्रवृत्तः पुरन्दर इति । क्रियानाविष्टं वस्तु शब्दवाच्यतया प्रतिक्षिपँस्तु तदाभासः, यथा विशिष्टचेष्टाशून्यं घटाख्यं वस्तु न घटशब्दवाच्यं घटशब्दप्रवृत्तिनिमित्तभूतक्रियाशून्यत्वात् पटवदित्यादिः । एतेषु पूर्वः पूर्वोनयः प्रचुरगोचरः परः परस्तु परिमितविषयः, नयाभास रूपाण्यन्यदर्शनानीति नयाभासा उपदर्शिताः, प्रमाणाभासास्त्वप्रमाणस्वरूपसन्निविष्टा एवेति न दर्शिताः, रत्नाकरावतारिकादितोऽवसेयाः, अनुमानाभासस्य हेतुवस्तु पक्षाभाससाधनाभासदृष्टान्ताभासा ग्रन्थगौरवभयान्नोपदर्शिताः, रत्नाकरावतारिकातोऽवसेयाः, सप्त तत्त्वानीति यदुक्तं प्रमाणनयाधिगम्यानि तत् परिभावनायोच्यते–

स्यात् सामान्यविशेषाभ्यां सापेक्षाभ्यां समन्वितम् ॥
वस्तु जात्यन्तरंतत्त्वमुत्पादव्ययध्रौव्ययुग् ॥१४॥

अनुवृत्ति स्वभावं सामान्यम् अनुगताकारप्रतीतिविषयः, तच्चतिर्यक्सामान्योर्ध्वतासामान्यभेदेन द्विविधम्, तत्र प्रतिव्यक्तिसमानाकारपरिणामः तियक्सामान्यम्, यथा शबलशाबलेयादिपिण्डेषु गोत्वम्, पूर्वापरपर्यायानुगतं द्रव्यमुर्ध्वतासामान्यं, यथा कटककङ्कणाद्यनुगतं सुवर्णम् । व्यावृत्तस्वभावोविशिष्टाकारप्रतीतिविषयो विशेषः, सच गुणपर्यायभेदेन द्विविधः, तत्र सहभावी धर्मो गुणः, यथाऽऽत्मनि विज्ञानव्यक्तिशक्तिसुखपरिस्पन्दयौवनादयः, क्रमभावी धर्मः पर्यायः, यथाऽऽत्मनिसुखदुःखहर्षविषादादयः, ताभ्यां सामान्यविशेषाभ्यामित्यर्थः, निर्विशेषस्य सामान्यस्य

सामान्यरहितस्य विशेषस्य च खरविषाणकल्पत्वादुक्तं सापेक्षाभ्यामिति, समन्वितं तादात्म्येन युक्तम् सामान्यविशेषोभयात्मकमिति यावत्, तदुक्तं ।

'स्वतोऽनुवृत्तिव्यतिवृत्तिभाजो भावा न भावान्तरनेयरूपाः ।।
परात्मतत्त्वादतथात्मतत्त्वाद्वयं वदन्तोऽकुशलाः स्खलन्ति ।।१।।'
इति अत एव न केवलसामान्यात्मकं न केवलविशेषात्मकं, किन्तु सामान्यविशेषोभयात्मकत्वेन जात्यन्तरम् नरसिंहवत्,

भागे सिंहो नरोभागे योऽसौ भागद्वयात्मकः ।।
तमभागं विभागेन नरसिंहं प्रचक्षते ।।१।। इति

एवंविधं वस्तु तत्त्वमित्युच्यते, यच्च सत् तदेव तत्त्वं, उत्पादव्ययध्रौव्ययुक्तं च सदिति मनसिकृत्याह उत्पादव्ययध्रौव्ययुगिति उत्पादव्ययध्रौव्यात्मकमित्यर्थः, प्रतिक्षणं वस्तु उत्तरपर्यायरूपेणोत्पद्यते पूर्वपर्यायरूपेण विनश्यति पूर्वापरपर्यायानुगतद्रव्यरूपेणावतिष्ठते, यथा सौवर्णो घटो यदा सुवर्णकारव्यापारेणविनश्यति तदैवमुकुटाद्याकारेणोत्पद्यते सुवर्णरूपेणावतिष्ठते तदानीं घटार्थिनः शोको भवति, मुकुटार्थिनः प्रमोद उत्पद्यते, सुवर्णार्थिनश्च माध्यस्थ्यमेव तदेतदेकदाकार्यत्रयभावः कारणत्रयमन्तरेण न सम्भवतीत्येकस्यापेक्षाभेदेनोत्पादव्ययध्रौव्यात्मकत्वम् तदुक्तम्—

" घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम् ।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ।।१।। इति,
तत्त्वस्य सप्तविधत्वं कथमित्याकाङ्क्षायामुच्यते ।

जीवोऽजीव आश्रवश्च बन्ध-संवर-निर्जराः ॥
मोक्षस्तत्त्वं पुण्यपापे अपितत्त्वन्तु केचन ॥१६॥

तत्र जीवः औपशमिक-क्षायिक-मिश्रोदयिक-पारिणामिक-भावान्वितः साकारानाकारोपयोगलक्षणोऽमूर्त्तस्वभावः, तत्र औपशमिकभावः सम्यक्त्वचारित्रभेदेन द्विविधः, क्षायिकभावो ज्ञान-दर्शन-दान-लाभ-भोगोपभोगवीर्य-सम्यक्त्वचारित्रभेदेन नवविधः, मिश्रः क्षायौपशमिकः स मति-श्रुतावधिमनः पर्यायज्ञानात्मकचतुर्विधज्ञान-मत्यज्ञानश्रुताज्ञान-विभङ्गज्ञानेति त्रिविधिज्ञान-चक्षुर्दर्शनाचक्षुर्दशनावधिदर्शनस्वरूपत्रिविधदर्शन-दानलब्धि-लाभलब्धि-भोगलब्ध्युपभोगलब्धिवीर्यलब्ध्यात्मकपञ्चलब्धि-सम्यक्त्व-चारित्र-संयमासंयमभेदेनाष्टादशविधः, औदयिकभावो नारक-तैर्यग्योन-मानुषदेवभेद चतुर्विधगति क्रोध-मान-माया-लोभभेदचतुर्विधकषाय स्त्रीपुन्नपुंसकभेदत्रिविधलिङ्ग मिथ्यादर्शनाज्ञानासंयतासिद्धत्व कृष्ण-नील-कापोत-तेजः पद्म-शुक्ललेश्येतिभेदषड्विधलेश्येत्येकविंशति-विधः। पारिणामिको भावो जीवत्व भव्यत्वाभव्यत्वभेदेन त्रिविधः, साकारोपयोगो विशेषविषयकं ज्ञानम्, अनाकारोपयोगो दर्शनम्, स च जीवः संसारिमुक्तभेदेन द्विविधः, तत्र संसारिणा समनस्कामनस्कभेदेन द्वैविध्यम्, त्रस-स्थावरभेदेन च, द्रवभावोभयविधेन मनसा सहितः समनस्कः, द्रव्यमनो रहितोऽमनस्कः, पृथिव्यम्बुवनस्पतयः स्थावराः, तेजोवायुद्वीन्द्रियादयस्त्रसाः, इन्द्रियाणि स्पर्शन-रसन-घ्राण-चक्षुःश्रोत्राणि, स्पर्श-रस-गन्धवर्णशब्दास्तेषां विषयाः, द्वीन्द्रियादिजीवानां विस्तरतोधिगमस्तत्त्वार्थाधिगमसूत्रतो विधेयः,

कृत्स्नकर्मक्षयलक्षणमोक्षान्वितो मुक्तः, तस्य प्रथमसमयसिद्धादि-विधानं तत्त्वार्थादितोऽवसेयम्, अजीवः जीवादन्योऽजीव इति पर्युदासप्रतिषेधोऽत्र, तेन साकारानाकारोपयोगलक्षणचैतन्यात्मकं द्रव्यमजीवः, स च धर्मास्तिकायाधर्मास्तिकायाकाशास्तिकायपुद्गलास्तिकायभेदेन चतुर्विधः, अस्ति शब्देन ध्रौव्यं कायशब्देनोत्पाद व्ययौ सर्वत्रावगम्यते, तेनोत्पादव्ययध्रौव्यलक्षणं सत्त्व सुदृढनिरूढं भवति, जीवोऽप्युत्पादव्ययध्रौव्ययुक्तत्वाज्जीवास्तिकायशब्दव्यपदेश्यः। गुणपर्यायवद् द्रव्यमिति द्रव्यलक्षणयोगाद्धर्मादयश्चत्वारोजीवाश्च पञ्चद्रव्याणि, नित्यावस्थितान्यरूपाणि पुद्गलव्यतिरिक्तान्येतानि, पुद्गलास्तु रूपवन्तः, धर्माधर्माकाशा एकद्रव्याणि निष्क्रियाणि च, पुद्गलजीवास्त्वनेकद्रव्याणि क्रियावन्तश्च, अस्तिकायेत्यत्र कायशब्देन प्रदेशबहुत्वमवयवबहुत्वं वोच्यत इति तत्र धर्माधर्माकाशजीवानां प्रदेशबहुत्वं, प्रदेशो नामापेक्षिकः सर्वसूक्ष्मवस्तु परमाणोरवग्राहः, परमाणुभिन्नानां स्कन्धात्मकानां पुद्गल नामवयवबहुत्वम्, प्रदेशः प्रदेशिवियुक्तो न भवति, अवयवस्त्ववयविवियुक्तोऽपि भवतीत्यनयो वैलक्षण्यम्, तत्र धर्माधर्मयोरसङ्ख्येयप्रदेशाः सततं वितताविस्थताः, एकजीवस्यासङ्ख्येयप्रदेशाः सङ्कोचविकाशस्वभावाः, तत्वादेव जातुचिन्निकृष्टकुन्थुशरीरग्राहिणः विकाशित्वादिति, आकाशस्यानन्ताः प्रदेशाः आलोकाकाशसमाश्रयणेन, लोकाकाशस्यत्वसङ्ख्येयाः प्रदेशाः, सङ्ख्येयाः असङ्ख्येया अनन्ताश्च प्रदेशाः, अणुव्यतिरिक्तानां पुद्गलानाम्, परमाणुस्त्वादिमध्यान्त्यप्रदेशरहितः, धर्माधर्मद्वयाधारआकाशोलोकाकाशः, तत्र कृत्स्ने धर्माधर्मयोरवगाहः, तस्यैकप्रदेशादिषु पुद्गलानामवगाहो

भाज्यः, लोकाकाशप्रदेशानामसङ्ख्यावभागादिषु प्रदेशसङ्कोच-विकासाभ्यां जीवानामवगाहः गतिमतां गतेरपेक्षाकारणं धर्मः, स्थितिमतां स्थितेरपेक्षाकारणमधर्मः, अत एव लोकाकाश एव धर्माधर्मयोः सद्भावाद् गतिस्थितिमतां गतिस्थिती नालोके, अवगाहोपष्टम्भकत्वस्वाभावादाकाशत्वन्तस्यापि, अवगाहिनां धर्माधर्मजीवपुद्गलानामवगाहनिमित्तमाकाशः, औदारिक-वैक्रियाहारकतैजसकार्मणाख्यपञ्चविधशरीरवाङ्मनःप्राणापानाः पुद्गलानामुपकारः, सुखदुःखजीवितमरणोपग्रहाश्च पुद्गलानामुपकारः, हिताहितोपदेशाभ्यां परस्परस्योपग्रहो जीवानामुपकारः, एकीयमतेन धर्मास्तिकायादिद्रव्यपञ्चकान्तर्भूतव्यतिरिक्तो वा कालोऽपि द्रव्य, तस्य वर्त्तना परिणामः क्रियापरत्वापरत्वे चोपकारः, उपकारो नाम प्रयोजनं तेन तत्कारणत्वं तल्लक्षणमवसेयम्, एतेषाममूर्त्तत्वम्। स्पर्शरसगन्धवर्णत्वं पुद्गलानां लक्षणम्, तत्र कठिन-मृदु-गुरु-लघु शीतोष्ण-स्निग्ध-रूक्षभेदात् स्पर्शोऽष्टविधः, तिक्त-कटु-कषायाम्ल-मधुरभेदेन रसः पञ्चप्रकारः, गन्धोद्विविधः सुरभिरसुरभिश्च, कृष्ण-नील-लोहित-पीत-शुक्लभेदेन वर्णः पञ्चविधः, स्निग्धरूक्ष-शीतोष्णाश्चत्वार एव स्पर्शा अणुषु, स्कन्धेष्वष्टावपि यथासम्भवम्, लवणो मधुरान्तर्गतः संसर्गजो वा मतभेदेनासंसर्गजत्वाच्चित्रवर्णोऽपि नातिरिक्तः। एवं शब्द-बन्ध-सौक्ष्म्य-स्थौल्य-संस्थान-भेद-तमश्छायातपोद्योतवन्तश्च पुद्गलाः। पुद्गलपरिणामानां शब्दादीनां प्रभेदादिकं तत्त्वार्थसूत्रवृत्तितोऽवसेयम्। अणु-स्कन्धभेदेन पुद्गलस्य द्वैविध्यम्, तत्राकारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः।

एकरसगन्धवर्णो द्विस्पर्शः कार्यलिङ्गश्च ॥ १ ॥ इति वचनादणोः स्कन्धतो वैलक्षण्यमवसेयम्। अणवोऽबद्धाः बद्धा एव स्कन्धाः सङ्घातभेदेभ्य उत्पद्यन्ते, भेदादेवाणुरुत्पद्यते, स्कन्धेषु चाक्षुषाणां भेदसङ्घाताभ्यामुत्पत्तिरन्येषां सङ्घाताद् भेदात् सङ्घातभेदाच्च, धर्मादीनामशेषाणामप्युत्पादव्ययध्रौव्ययुक्तत्वं सत्त्वं त्रिसूत्रीवृत्तितोऽवसेयम्, स्निग्धरूक्षत्वाद् बन्धो भवति न जघन्यगुणानाम्, तथा गुणसाम्ये सदृशानां बन्धो न भवति, द्व्यधिकादिगुणानां तु सदृशाशानामपि बन्ध,, एवमन्योऽप्येतद् विषये विचार स्तत्त्वार्थतोऽवसेयः गुणपर्यायवत्त्वं द्रव्यस्य लक्षणम्, एकीयमते द्रव्यतयाऽभ्युपगतः कालोऽनन्तसमयः, तत्र वर्त्तमानसमयएकः, अतीतानागतयो स्त्वानन्त्यमिति, आस्रूयतेयेन गृह्यते कर्म स आश्रवः, शुभाशुभकर्मादानहेतुः, कायवाङ्मनः कर्मयोगः, तत्प्रकृतयश्च द्वाचत्वारिंशत्, पञ्चेन्द्रियाणि, चत्वारः कषायाः, पञ्च व्रतानि, मनोवचनकायाः, पञ्चविंशतिक्रियाश्च कायिक्यादय इति। आश्रवद्वारनिरोधः संवरः, संवरप्रकृतयस्तु सप्तपञ्चाशत्, तथाहि ईर्या-भाषा-एषणा-आदान-परिष्ठापनिकाः पञ्चसमितयः सम्यग् व्यापारणाः, मनो-वचन-कायानां तिस्रो गुप्तयः कुशलाकुशल व्यापाराव्यापाररूपाः, क्षुधा-पीपासा-शीत-उष्ण-डांस-अचेल-अरति-स्त्री-चर्या-निषद्या-शय्या-आक्रोश-बंध-याचना-अलाभ-रोग-तृण-स्पर्श-मल-सत्कार-प्रज्ञा-अज्ञान-सम्यक्त्व-विषयेऽधिशयनं परीषहा द्वाविंशतिः, क्षमा-मृदुता-आर्जव-त्याग-तप-संयम-सत्य-शौच-अकिञ्चनत्व-ब्रह्मचर्याणां पालनं दश यतिधर्माः, अनित्यत्व-अशरणत्व-संसार-एकत्व-अन्यत्व-अशुचित्व-आश्रव-संवर-निर्जरा-लोक-स्वभाव-बोधिदुर्लभ-धर्मभावनानां

मुहुर्मुहुर्भावनं द्वादशभावनाः, सामायक-च्छेदोपस्थापनीय-परिहार-विशुद्धक-सूक्ष्मसंपराय-यथाख्यातैश्चरणाच्चरित्र पञ्चविधम् इत्येवं सप्तपञ्चाशत्संख्यकत्वं संवरप्रकृतीनां बोध्यम् । जीव-कर्मणोः परस्परं क्षीरनीरन्यायेनानुगमात् संयोगविशेषलक्षणस्सम्बन्धो बंधः, तत्र ज्ञानावरणीय-दर्शनावरणीय-वेदनीय-मोहनीय-आयुः-नाम-गोत्र-अन्तरायभेदेनाष्टविधानि कर्माणि मूलभेदतः, उत्तरप्रकृतिभेदतस्तु अष्टपञ्चाशदधिकशतभेदान्यवगन्तव्यानि, सच बन्धः प्रकृति-स्थित्यनुभागप्रदेशभेदाच्चतुर्धा,

'स्वभावः प्रकृतिः प्रोक्तः स्थितिः कालावधारणम् ॥
अनुभागो रसो ज्ञेयः प्रदेशो दलसञ्चयः ॥ १ ॥

इत्यादिवचनात् तत्स्वरूपमवधार्यम् ।

बद्धस्य स्पृष्टबद्धनिधत्तनिकाचितादिरूपेणार्जितस्य कर्मणस्तपश्चरणध्यानजपादिभिः क्षपणं निर्जरा, सा सकामाकामभेदेन द्विविधा, अष्टविधकर्मणामात्यन्तिको वियोगो मोक्षः, तदानीं द्रव्यप्राणाभावेऽपि ज्ञानादिलक्षणभावप्राणलक्षणजीवनवत्त्वाज्जीवत्वं मुक्तस्य युज्यते, तदुक्तम्—

"यस्मात् क्षायिकसम्यक्त्व—वीर्यसिद्धत्वदर्शनज्ञानैः ।
आत्यन्तिकैः सयुक्तो निर्द्वन्द्वेनापि च सुखेन ॥१॥
ज्ञानादयस्तु भावप्राणा मुक्तोपि जीवति स तर्हि ।
तस्मात् तज्जीवत्वं नित्यं सर्वस्य जीवस्य ॥२॥ इति ।

एवं सप्तविधं तत्त्वम्, केचन आचार्याः पुण्यपापेऽपि तत्त्वान्तरं स्वीकुर्वन्ति तन्मते नवविधं तत्त्वम् तत्र पुण्यं सत्कर्मपुद्गलम्, तत्प्रकृतयो द्विचत्वारिंशत्, तद्यथा-

'नरतिरिसुराउउच्चं, सायं परघाय आयवुज्जो यं ।
तित्थुस्सासनिमेणं, पणिदिवयरसमव उरंसं, इति,

पुण्यप्रकृतिविसदृशं पापं, मिथ्यात्वादीनि तस्य कारणानि, तत् प्रकृतश्च द्वयशीतिः, तद्यथा-

" थावरदसचउजाई अपशमसंठाणखगइसंघयणा ।
तिरिनरयदुगुवद्यायं वन्नचउनामचउतीसा ॥
नरयाउ नीय अस्सायद्यायपणयालसाहिव वासीइ " इति

पुण्यप्रकृतिव्यतिरिक्ताः पापप्रकृतयो द्वयशीतिः । पुण्य-पापयोस्तत्त्वान्तरत्वमतेऽपि जीवाजीवपुण्यपापाश्रवसंवरबन्धनिर्जरा-मोक्षा नवतत्त्वानीत्येवं तत्त्वोपदेशात् मोक्षस्यैव परमपुरुषार्थत्वेनान्ते उपादानं साक्षात् परम्परया वा तत् प्रयोजकत्वेनान्यतत्त्वानां पूर्वमुपादानम्, सम्यग्दर्शन-ज्ञान-चारित्राणि तु मिलितानि तत् कारणमिति बोध्यम्, चत्वारो निक्षेपा इत्युक्तं तत् कथमित्या-काङ्क्षा निवृत्तये उच्यते—

इदं वस्तु कतिविध-मितिपृष्टे तदुत्तरम् ॥
नामादिभिस्तन्न्यसनं निक्षेपत्वेन कीर्त्तितम् ॥ १६ ॥

एकैकमपिवस्तु घटपटादिकं प्रत्यक्षादि प्रमाणोपनतं कतिविधं कियत् प्रकारकमित्येवं परेण पृष्टे प्रश्नविषयीकृते सति, तदुत्तरं

तत्प्रश्न प्रतिविधानं नाम-स्थापना-द्रव्य-भावैः, तन्न्यसनं नाम जीवः स्थापनाजीवो द्रव्यजीवो भावजीव इत्येवं न्यासः, निक्षेपत्वेन निक्षेपरूपतया, कीर्त्तितं जैनाचार्यैस्तद्‌वस्त्वगमाय कथितम्, तत्र

"यस्य कस्यापि द्रव्यस्य जीव इति नाम बुधैः ।।
क्रियते तत्तुविज्ञेयं नाम जीव इति स्फुटम् ।। १७ ।।
काष्ठपुस्ताक्षनिक्षेप चित्रकर्मादिकं च यत् ।।
स्थाप्यते जीव इति स स्थापनाजीव इष्यते ।।१८।।
गुणपर्यायवियुक्तः प्रज्ञास्थापितमात्रकः ।।
द्रव्यजीवो मतोऽनादि- पारिणामिकभावभाग् ।।१९।।
शून्योवाऽयं मतोजीवेऽजीवोयद्येति जीवताम् ।।
द्रव्यजीवस्तदायं स्यात्, नैवमिष्टं तु कर्हिचित् ।। २० ।।
औपशमिकादिभाव- युक्तोपश्चोपयोगपान् ।।
भावजीवो मतो जीवः संसारी मुक्त इत्यपि ।।२१।।
एवं द्रव्येऽपिनामादि-योजनाऽभिमता बुधैः ।।
द्रव्यद्रव्यं तु तत्रापि पूर्ववत् कल्प्यविग्रहम् ।। २२ ।।
केचिदाहु र्द्रव्यद्रव्यं पुद्‌गलद्रव्यमेवहि ।।
उत्पद्यन्तेऽणवः स्कन्धा यस्मात् सङ्घातभेदतः ।। २३ ।।
गुणपर्यायसंयुक्तं धर्मादिद्रव्यमिष्यते ।।
भावद्रव्यं व्यापकं तत् स्यान्निक्षेपचतुष्टयम् ।। २४ ।।
द्रव्यार्थिकनये इष्टा निक्षेपा भाववर्जिताः ।।
भावनिक्षेप एवैकः पर्यायार्थिकसम्मतः ।। २५ ।।
अन्ये शब्दनये भावः चत्वारोऽर्थनये मतः ।।
इति प्राहुः परे प्रोचुः स्थापना नैव सङ्ग्रहे ।। २६ ।।

व्यवहारे स्थापना नो इति केचित् प्रचक्षते ।।
ऋजुसूत्रे नैव द्रव्य- मित्येवं बहुधा मतम् ।। २७ ॥

तत्तन्मतखण्डनं च धीमन्न्यायविशारदैः ।।
नयोपदेशे प्रथितं विलोक्यं तच्च धीधनैः ।। २८ ।।

इत्येष जैनराद्धान्तः संक्षेपेणात्र दर्शितः ॥
भक्त्यालावण्यसूरीणां सुशीलेन विपश्चिता ।। २९ ।।
देव-गुरुप्रसादाच्च, सुशीलसूरिणा मुदा ।। २९ ।।

।। इति जैनदर्शनम् ।।



# ॥ अथ साङ्ख्यदर्शनम् ॥

पञ्चविंशतितत्त्वानि कपिलेन महात्मना ॥
मूत्रितानि च तान्येव पाताञ्जलमतान्यपि ॥ १ ॥

निरीश्वर-सेश्वरभेदेन साङ्ख्यो द्विविधः, तत्र कपिलमुनिप्रणीतं निरीश्वरसाङ्ख्यदर्शनं तत्त्वसाङ्ख्यदर्शनशब्देनोच्यते, पतञ्जलिमुनिप्रणीतं सेश्वरसाङ्ख्यदर्शनम्, तत्पातञ्जलदर्शनमित्यभिधीयते, पञ्चविंशतितत्त्वोपगम उभयोरपि समानः, केवलमेकेनेश्वरो नाभ्युपेयते अपरेण सोऽभ्युपेयत इति । पद्यं स्पष्टम् ॥

मूलप्रकृतिः प्रकृति-विकृतयोऽथ च सप्त ॥
षोडशकश्च विकारः पुरुषश्च ततो भिन्नः ॥ २ ॥

मूलप्रकृतिः सर्वेषां विकृत्यात्मकतत्त्वानां मूलकारणम्, प्रधाननाम्नाऽभिधीयते, प्रकृतिश्च सत्त्व-रज-स्तमसां त्रयाणां गुणानां साम्यावस्था, तत्र सत्त्वं लघु प्रकाशकञ्च प्रसादकार्यानुमेयम्, उपष्टम्भकं चलञ्च तोषकार्यानुमेयम्, तोषश्चानन्दः, तमो गुरुवरणकं च दैन्यदुःखकार्यानुमेयम्, दैन्यं च वदनविच्छायतानेत्रसंकोचादिव्यङ्ग्यम्, दुःखञ्च आध्यात्मिकाधिदैवताधिभौतिकभेदेन त्रिविधम्, तत्राध्यात्मिकं शारीरं मानसं च, वात-पित्तश्लेष्मणां वैषम्यनिमित्तं शरीरम्, कामक्रोध-लोभ-मोहेर्ष्याविषयादर्शननिबन्धनं मानसम्, आधिदैवतं यक्ष-राक्षसग्रहाद्यावेशनिमित्तकम्, मानुषपशुमृगपक्षिसरिसृपस्थावरनिमित्तकमाधिभौतिकमिति, उक्तञ्च–'सत्त्वं' लघुप्रकाशकमिष्टमुपष्टम्भकं चलञ्चरजः ।

गुरुवरणकमेवतमः प्रदीपवच्चार्थतो वृत्तिः ॥ १ ॥' इति यथा वर्त्तितैलाग्नयः परस्परविरुद्धस्वभावा अपि दीपरूपेण परिणताः परस्परोपकारिणः सन्तः प्रकाशलक्षणमर्थक्रियांकुर्वन्ति तथा लाघवोपष्टम्भकगौरवेति परस्परविरुद्धस्वभावा अपि सत्त्वरजस्तमो गुणाः साम्यावस्थालक्षणप्रकृतिस्वरूपतामापन्नाः परस्परसहकारितां भजन्तः पुरुषार्थंनिवर्त्तयन्ति, प्रकृतिश्च नित्यत्वान्नकस्यापि विकृतिः, प्रकृति-विकृतयः सप्त, महदहङ्कार-पञ्चतन्मात्राणि सप्तप्रकृति-विकृतयः प्रकृते र्महत्तत्त्वं बुद्धिरुत्पद्यते, बुद्धेश्चाहङ्कारोऽहङ्कारात् पञ्चतन्मात्राणि शब्दस्पर्शरूपरसगन्धात्मकानि इन्द्रियाणि चैकादशोत्पद्यन्त इति बुद्धिरहङ्कारकारणत्वात् प्रकृतिः मूलप्रकृतिकार्यत्वाद् विकृतिश्च, अहङ्कारोऽपि पञ्चतन्मात्रैकादशेन्द्रियकारणत्वात् प्रकृति बुद्धिकार्यत्वाद्विकृतिः, पञ्चतन्मात्रेभ्यश्च पञ्चभूतान्युत्पद्यन्ते यथा शब्दतन्मात्रादाकाशं शब्दगुणं, शब्दतन्मात्रसहितात् स्पर्शतन्मात्राद् वायुः, शब्दस्पर्शगुणः, तद्द्वयसहिताद् रूपतन्मात्रात् तेजः, शब्द-स्पर्शरूपगुणं, तत्त्रितयसहिताद् रसतन्मात्राद् आपः,शब्दादिचतुर्गुणा गन्धतन्मात्राच्छब्दतन्मात्रादिसहिताच्छब्दादिपञ्चगुणा पृथिवीति, पञ्चतन्मात्रापि पञ्चभूतकारणत्वात् प्रकृतिः, अहङ्कारकार्यत्वाच्च विकृतिरिति, षोडशकश्च विकारःएकादशेन्द्रियाणि पञ्चभूतानि पञ्चतन्मात्रकार्यत्वाद् विकारो विकृतिः, तत्त्वान्तरस्य कारण-त्वाभावाच्च प्रकृतिस्तु न भवति तदुक्तं-

प्रकृते र्महान् महतोऽहङ्कार स्तस्माद्‌गुणश्च षोडशकः ।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि ॥१॥ इति

पुरुषश्च कुटस्थ नित्योऽकर्त्ता चैतन्यलक्षणः, ततः मूलप्रकृत्यादि चतुर्विंशतितत्त्वेभ्यः भिन्नः कस्यापि कारणत्वाभावात् प्रकृतिर्न भवति, कस्यापि कार्यत्वाभावाद् विकृतिश्च न भवति, तदुक्तम्-
'मूलप्रकृतिरविकृति र्महदाद्याः प्रकृति विकृतयः सप्त ।

षोडशकश्च विकारो न प्रकृति र्न विकृतिः पुरुषः ॥१॥ इति अत्र महच्छब्दवाच्या बुद्धिः घटः पट इत्याद्यध्यवसायलक्षणा, अहं सुभगोऽहं दर्शनीय इत्याद्याकारोऽहङ्कारः, सङ्कल्पलक्षणं मनः, यथा कस्यचिद् बटो ग्रामान्तरे भोजनमस्तीति शृण्वतः सङ्कल्पः स्यात् यास्यामि किं तत्र दधिस्यादुत दुग्धमिति, श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पञ्चज्ञानेन्द्रियाणि,वाक्पाणिपादपायूपस्थसंज्ञकानि पञ्चकर्मेन्द्रियाणि, उभयात्मकन्तु मनः, महदादयश्च प्रधानात् प्रवर्त्तमाना न कारणादत्यन्तभेदिनो भवन्ति, किन्तु त्रैगुण्यादिना प्रधानात्मान एव, तथाहि यथाप्रधानं त्रिगुणात्मकं तथा बुद्ध्यहङ्कारतन्मात्रेन्द्रियभूतात्मकं व्यक्तमपि त्रिगुणात्मकम्, कृष्णादितन्त्वारब्धपटादेः कृष्णादित्वस्यैवोपलम्भेन कारणगुणानुरूपगुणस्यैव कार्यस्य सिद्धेः, किञ्च इमे सत्त्वादयोगुणा इदं च महदादिव्यक्तमिति न शक्यते विवेक्तुम्, किन्तु ये गुणा स्तद् व्यक्तं यद् व्यक्तं ते गुणा इत्यविवेकचवोभयम्, तथोभयमप्यविशेषतो विषयो भोग्यस्वभावत्वात्, सर्वपुरुषाणामविशेषेण भोग्यत्वात्, पण्यस्त्रीवत्, अचेतनं च, सुखदुखमोहावेदकत्वात्, प्रसवधर्मि च, यतः प्रधानं बुद्धि सामान्यं च जनयति, साप्यहङ्कारम्, सोऽपि तन्मात्राणीन्द्रियाणि च, तन्मात्राणि च महाभूतानि जनयन्तीति तस्मात् त्रैगुण्यादिना तद्रूपा एव कार्यभेदाः प्रवर्त्तन्ते, तदुक्तम्-

'त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥१॥' इति,
अथ यदि तद्रूपा एव कार्यभेदाः कथं शास्त्रे व्यक्ताव्यक्तयो वैल-
क्षण्योपवर्णनं "हेतुमदनित्यमव्यापि, सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं, व्यक्तं विपरीतमव्यक्तम् ॥१॥ इति

क्रियमाणं शोभेत, अत्र ह्ययमर्थः, हेतुमत् कारणवद् व्यक्तमेव, बुद्ध्यादीनामेव प्रधानादिहेतुमत्त्वात्, नत्वेवमव्यक्तं कुतश्चित्, यतोऽनित्यम्, अन्यतो हेतुमत्त्वासिद्धेरेतद्धेत्वभिधानमिति न पौनरुक्त्यम्, तथा प्रधानपुरुषौ यथा विभुत्वेन व्याप्त्या वर्त्तते इति तौ व्यापिनौ नैवं व्यक्तमिति तदव्यापि, यथा च संसारकाले बुद्ध्यहङ्कारेन्द्रियसंयुक्तं सूक्ष्मशरीराश्रितं व्यक्तं संसारि, नैवमव्यक्तं, तस्य विभुत्वेन सक्रियत्वायोगात्, बुद्ध्यहङ्कारादिभेदेन चानेकविधं व्यक्तमुपलभ्यते, नाव्यक्तम्, तस्यैकस्यैव सतस्त्रैलोक्यकारणत्वात्, आश्रितं च व्यक्तं, यद् यत्रोत्पद्यते तस्य तदाश्रितत्वात्, नत्वेवमव्यक्तं, अकार्यत्वात् तस्य, लयं गच्छतीति कृत्वा लिङ्गं च व्यक्तं, तथाहि प्रलयकाले भूतानि तन्मात्रेषु लीयन्ते, तन् मात्राणीन्द्रियाणि चाहङ्कारे, सोऽपि बुद्धौ, साऽपि प्रधाने, नत्वेवमव्यक्तं क्वचिद् विलयं गच्छति, लीनं वाऽव्यक्तलक्षणमर्थं गमयतिकार्यत्वादिति लिङ्गं व्यक्तं, नत्वेवमव्यक्तं, अकार्यत्वात् कार्योन्मुखरूपानुपलम्भेन तस्य कारणलिङ्गत्वाभावाच्च, सावयवं व्यक्तं, शब्दस्पर्शरूपरस-गन्धात्मकैरवयवै र्युक्तत्वात्, नचैवमव्यक्तम्, तत्र शब्दादिव्यक्ती-नामनुपलब्धेः, तथा यथा पितरि जीवति पुत्रो न स्वतन्त्रः तथा

व्यक्तं सदाकारणापत्तत्वात्परतन्त्रं, नैवमव्यक्तम्,अकारणाधीनत्वात् सर्वदा तस्येति न, परमार्थतस्ताद्रूप्येऽपि प्रकृतिविकृतिभेदेन तयो र्भेदा विरोधात्, विकाराणां स्वभावतस्त्रैगुण्यरूपेण प्रकृतिरूपत्वेऽपि सत्त्वरजस्तमसामुत्कटत्वविशेषात् महदादिभेदेन सर्गवैचित्र्यसिद्धेः, वैधर्म्यं ह्येतन्नतुभेद इति कारणात्मनि कार्यमस्तीति प्रतिज्ञातं भवति, अत्रेदं हेतुकदम्बमुद्भावयन्ति "असदकरणादुपादान ग्रहणात् सर्वसम्भवाभावात् । शक्तस्य शकचकरणात् कारणभावाच्च सत्कार्यम् ॥ १ ॥'

यद्यसत्क्रियेत तदा नभोनलिनमपिक्रियेत, नचैवं भवति, तस्माद्यत्क्रियते तिलादिभिस्तैलादिकार्यं तत् तस्मात् प्रागपि शक्तिरूपेण सिद्धं, व्यक्तिरूपेण तु तत् तदा कापिलैरपि नेष्यते इति न व्यवहारबाधः, तथा यद्यत्सत्कारणे कार्यं भवेत् तदा पुरुषाणां प्रतिनियतोपादानग्रहणं न स्यात्, शालिफलार्थिनश्च शालिबीजमेवोपाददते, न कोद्रवबीजम्, शालिबीजादिषु शालिफलादीनामसत्त्वे च तद्वत् कोद्रवबीजानामपि ग्रहणप्रसङ्गः, नचैवं भवति, तस्मात् तत्र तत् कार्यमस्तीति गम्यते, तथा यद्यसदेव कार्यमुत्पद्यते तदा तृणपांश्वादेः सर्वस्वर्णरजताद्युत्पत्तिप्रसङ्गः, पूर्वं कारणमुखेन प्रसङ्ग उक्तः सम्प्रति तु कार्यमुखेनेति विशेषः, न च सर्वं सर्वतो भवति, तस्मादयं नियमः तत्रैव तत् सद्भावादिति गम्यते । स्यादेतत्- कारणानां प्रतिनियतेष्वेव कार्येषु शक्तयः प्रतिनियताः तेन कार्यस्यासत्त्वेऽपि किञ्चिदेवकार्यं क्रियते न नभो नलिनम्, किञ्चिदेवोपादानमुपादीयते यदेव समर्थम्, किञ्चिदेव

कुतश्चिद् भवति नतु सर्वं सर्वस्मादिति नोक्त प्रसङ्गेभ्यः सत्कार्य-सिद्धिरिति, असदेतत्, यतः शक्ता अपि हेतवः कार्यं कुर्वाणाः शक्यक्रियमेव कुर्वन्ति नाशक्यक्रियम्, असच्च कार्यं शशविषाणवद-नाधेयातिशयत्वादशक्यक्रियम्, न च प्रागसदपि सामग्रीसम्पत्तौ सद्वावस्थाप्रतिपत्ते र्विक्रियत इति शक्यक्रियम्, तस्य विकृताविष्य-माणायां निरुपाख्या सद्रूपहानिप्रसङ्गात्, नह्यसतः स्वभावा-परित्यागे सद्रूपतापत्तिर्युक्ता, परित्यागे वा नासदेव सद्रूपतां प्रति-पन्नमिति सिद्धयेत्, अन्यदेव हि सद्रूपमन्यच्चासद्रूपम्, परस्परपरि हारेण तयो र्व्यवस्थितत्वात्, तस्माद्यदसत् तदशक्यक्रियमेव, तथा भूतकार्यकारित्वाभ्युपगमे च कारणानामशक्यकारित्वमेवा-भ्युपगतं स्यात्, तच्चातिप्रसङ्गापयुक्तमिति शक्तिप्रतिनियमाद् सत्कार्यप्रतिनियम इत्यनुत्तरम्, एतेन शक्तस्य शक्यकरणादिति चतुर्थो हेतु र्व्याख्यातः,

"कार्यस्यैव नयोगाच्च किं कुर्वत्कारणं भवेत् ।
ततः कारणभावोऽपि बीजादे र्न विकल्प्यते ॥१॥"

इति पञ्चमहेतुसमर्थनस्यार्थः, यथोक्तहेतुचतुष्टयादसत् कार्य-वादे सर्वथा कार्यस्यायोगात् किं कुर्वद्बीजादिकारणं भवेत्, तथा चैवं शक्यते वक्तुं- न कारणं बीजादिकमविद्यमान कार्यत्वाद् गगनाब्जवत्, नचैवं, तस्माद् विपर्यय इति सिद्धं प्रागुत्पत्तेः कार्यं सत् । स्यादेतत्–एवं हि नाम सत्कार्यं सिध्यतु, प्रधानादेव महदा-दिकार्यभेदा इत्येतत्तु कथं सिध्यति, उच्यते–

"भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तश्च ।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥ १॥"

भेदानां महदादीनां, परिमाणं दृश्यते-एकाबुद्धिरेकोऽहङ्कारः पञ्चतन्मात्राण्येकादशेन्द्रियाणि पञ्चमहाभूतानीति, ततस्तत् कारणमेकमेष्टव्यं, परिमितत्वेनोपलभ्यमानघटादेरिव मृदादि, तदेव प्रधानम् । तथा भेदानां समन्वयात् कारणजात्यनुवृत्तिदर्शनात्, यज्जाति समन्वितं यदुपलभ्यते तत् तन्मयकारणसम्भूतम्, यथा घट शरावादयो मृज्जात्यन्विता मृदात्मककारणसम्भूताः, सुखदु:खमोहादिजातिसमन्वितं चेदं व्यक्तमुपलभ्यते, प्रसादतापदैन्यादिकार्योपलब्धेः, तथाहि लाघवाभिष्वाङ्गाद्धर्षप्रीतयः सत्त्वस्य कार्यम्, सुखमिति च सत्त्वमेवोच्यते, तापशोषभेदस्तम्भोद्वेगा रजसः कार्यं, रजश्चदुःखम्, दैन्यावरणसादनावध्वंसबीभत्सगौरवाणि तमसः कार्यं, तमश्च मोहशब्देनोच्यवे, एषां च महदादीनां सर्वेषां प्रसादतापदैन्यादिकार्यमुपलभ्यत इति सुखदुःखमोहानां त्रयाणामेते सन्निवेशविशेषा इत्यवसीयते, तेन सिद्धमेतेषां प्रसादादिकार्यतः सुखाद्यन्वितत्वम्, तदन्वयाच्च तन्मयप्रकृतिसम्भूतत्वमिति प्रधानसिद्धिः । तथेह लोके यो यस्मिन्नर्थे प्रवर्त्तते स तत्र शक्तो यथा तन्तुवायः पटकारणं, अतोव्यक्तोत्पादनार्थं प्रवर्त्तमानं किञ्चित्कारणं शक्तिमदेष्टव्यं, तदेव प्रधानमिति शक्तितः प्रधानसिद्धिः, तथेह लोके कार्यकारणयो र्विभागो दृष्टः, तद्यथा मृत्पिण्डः कारणं घटः कार्यं, स च मृत्पिण्डाद्विभक्तः, तथाहि घटो मधूदकपयसां धारणसमर्थो न मृत्पिण्डः, एवमिदं महदादिकार्यमपि विभक्तमुपलभ्यमानं प्रधानं कारणं साधयतीति तथा वैश्वरूप्यं नाम त्रयो लोकाः तदविभागात् प्रधानसिद्धिः, तथाहि

प्रलयकाले पञ्चभूतानि पञ्चसु तन्मात्रेष्वविभागं गच्छन्ति, तन्मात्राणीन्द्रियाणि चाहङ्कारे, अहङ्कारस्तु बुद्धौ, बुद्धिः प्रधान इति, अविभागोऽविवेको यथा क्षीरावस्थायामन्यतत्क्षीरमन्यद् दधीति विवेको न शक्योऽभिधातुम्, तद्वत् प्रलयकाले 'इदं व्यक्तमिदमव्यक्तम्' इति विवेकोऽशक्यक्रियत इति मन्यामहेऽस्ति प्रधानं यत्र महदादिलिङ्गमाविभागं गच्छतीति, उक्तदिशा कार्यत उपलब्धेरेवानुपलम्भो न प्रकृतेरभावात् तदुक्तम्—

"अतिदूरात् सामीप्यादिन्द्रियघातान् मनोऽनवस्थानात् ।
सौक्ष्म्याद् व्यवधानादभिभवात् समानाभिहाराच्च ॥१॥
सौक्ष्म्यात् तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धेः ।
महदादि तच्च कार्यं प्रकृतिस्वरूपं विरूपञ्च ॥२॥" इति,

प्रकृतिपरिणामभूतायाबुद्धेरष्टौ रूपाणि धर्मज्ञानवैराग्यैश्वर्य-रूपाणि चत्वारि सात्विकानि, तत्प्रतिपक्षभूतानि- अधर्माज्ञाना वैराग्यानैश्वर्याणि चत्वारि तामसानीत्यष्टौ, पञ्चविपर्ययाष्टाविंशत्यशक्तिनवविधतुष्ट्यष्टसिद्ध्यात्मकपञ्चाशद् धर्मवती च बुद्धिः, तत्परिणामा प्रकृतिरेव कर्त्री भोक्त्री बध्यते मुच्यते च, पुरुषस्तु कूटस्थनित्यः चेतनो न कर्त्ता नापि भोक्ता न बध्यते न न मुच्यते तदुक्तं—

'तस्मान्न संसरति नापि मुच्यते कश्चित् ।
संसरति मुच्यते च नानाश्रया प्रकृतिः ॥१॥' इति,

अमूर्त्तश्चेतनोऽभोगी नित्यः सर्वगतोऽक्रियः ।
अकर्त्ता निर्गुणः सूक्ष्म आत्माकपिलदर्शने ॥१॥ इति च,

आत्माहि स्वं बुद्धेरव्यतिरिक्तं मन्यते, सुखदुःखादयश्च विषया इन्द्रियद्वारेण बुद्धौ संक्रामन्ति, बुद्धिश्चोभयमुखदर्पणाकारा, ततस्तस्यां चैतन्यशक्तिः प्रतिबिम्बते, ततः सुख्यहं दुख्यहमित्युपचर्यते, उक्तञ्चपतञ्जलिना—

"शुद्धोऽपि पुरुषः प्रत्ययं बौद्धमनुपश्यति तमनुपश्यन्नतदात्माऽपितदात्मक इव प्रतिभासते" इति, मुख्यतस्तु चिच्छक्तिर्विषयपरिच्छेदशून्या, बुद्धेरेव विषयपरिच्छेदस्वभावत्वात्, चिच्छक्तिसन्निधानाच्चाचेतनाऽपिबुद्धिश्चेतनावतीवावभासते, तदुक्तं—

"तस्मात् तत् संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्त्तृत्वे च तथाकर्त्तेव भवत्युदासीनः ॥१॥" इति,

वादमहार्णवोऽप्याह-बुद्धिदर्पणसंक्रान्तमर्थप्रतिबिम्बकं द्वितीयदर्पणकल्पे पुंस्यधिरोहति, तदेव भोक्तृत्वमस्य, न तु विकारापत्तिः' इति, तथाचासुरिः—

"विविक्ते दृक्परिणतौ बुद्धौ भोगोऽस्य कथ्यते ।
प्रतिबिम्बोदयः स्वच्छे यथा चन्द्रमसोऽम्भसि ॥१॥" इति,

विन्ध्यवासीत्येवं भोगमाह—

'पुरुषोऽविकृतात्मैव स्वनिर्भासमचेतनम् ।
मनः करोति सान्निध्यादुपाधिः स्फटिकं यथा ॥१॥" इति,

ईश्वरश्चाचेतनप्रेरकः कापिलैर्नेष्यते अचेतनस्य चेतनाधिष्ठितस्यैवप्रवृत्तिरिति नियमानभ्युपगमात् स्वभावादेव प्रकृतिः पुरुषार्थसिद्धये प्रवर्त्तते, तदुक्तम्—

"वत्स विवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्ति रज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥१॥" इति,

एतन्मते, प्रमाणं प्रत्यक्षानुमानागमभेदेन त्रिविधम्, तत्र चक्षुरादीन्द्रियजन्यं ज्ञानं निर्विकल्पकम्, आलोचनमित्याख्यायते, मानसन्तु सविकल्पकम्, साध्यहेत्वविनाभावज्ञानजन्यं ज्ञानमनुमानम्, तत् पूर्ववत् शेषवत् सामान्यतो दृष्टश्चेति त्रिविधम् कारण लिङ्गकमनुमानं पूर्ववत्, कार्यलिङ्गकमनुमानं शेषवत्, तदुभयभिन्नमनुमानं सामान्यतो दृष्टः, आप्तश्रुतिरागमः तदुक्तम्—
"प्रतिविषयाध्यवसायोऽध्यक्षं त्रिविधमनुमानमाख्यातम् ।

तल्लिङ्गलिङ्गिपूर्वक-माप्तश्रुतिराप्तवचनञ्च ॥१॥" इति, उक्तप्रकृत्यादिप्रक्रियायामस्मदाद्यप्रत्यक्षभूतायां प्रत्यक्षपूर्वकानुमानाविषयीभूतायामाप्तश्रुतिरक्षणागम एव प्रमाणम्, तदुक्तम्—
"सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् ।

तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम् ॥१॥" इति, उक्त पञ्चविंशतितत्त्वमजानतः पुंसः प्रकृत्यासहाभेदज्ञानलक्षण संयोगात् संसारो भवति, प्रकृतिर्जडाऽपि कर्त्तृस्वभावा पुरुषोऽकर्त्ताऽपिचेतनस्वभावः तयो र्दर्शनकैवल्यार्थिनोरुक्तस्वरूपसंयोगात् पङ्ग्वन्धयोः संयोगादभीष्टदेशगमनवत् संसार उपपद्यते तदुक्तं—
"पुरुषस्य दर्शनार्थं कैवल्यार्थं प्रधानस्य ।

पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः" ॥१" इति, पञ्चविंशतितत्त्वज्ञस्य पुनः प्रकृतिपुरुषभेदख्यातौ केवलज्ञानपर्यवसानायां त्रिविधबन्धविच्छेदात् प्रकृतिवियोगलक्षणो मोक्षोभवति, तदुक्तं—

"पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे रतः ।

शिखी मुण्डी जटी वापि मुच्यते नात्र संशयः ॥१॥" इति, बन्धश्च प्राकृतिकवैकारिकदाक्षिणभेदात् त्रिविधः, तत्र प्रकृतावात्मज्ञानाद्ये प्रकृतिमुपासते तेषां प्राकृतिको बन्धः, ये विकारानेव भूतेन्द्रियाहङ्कारबुद्धीः पुरुषबुद्धयोपासते तेषां वैकारिको बन्धः, इष्टापूर्ते दाक्षिणः, पुरुषतत्त्वानभिज्ञो ह्येष्टापूर्त्तकारी कामोपहतमनावबुद्धयत इति । इति संक्षेपेण कापिलदर्शन दिग्दर्शनम्, तान्येव चतुर्विंशति तत्त्वान्येव, पाताञ्जलमतान्यपि पतञ्जलिमुन्यनुयायि योगाचार्यमतान्यपि, एतावाँस्तु विशेषः क्लेशकर्मविपाकाशयै रपरामृष्टो निर्माणकायमधिष्ठाय संप्रदायप्रद्योतकोऽनुग्राहक श्चेश्वरः पतञ्जलिनाऽभ्युपगतः, तत्र अविद्याऽस्मिता रागद्वेषाभिनिवेशाः क्लेशाः, अविद्यामिथ्याज्ञानम् अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिः, अस्मिता बुद्धयात्मनोरेकत्वेन ज्ञानमित्येके, अहङ्कार इत्यन्ये, रागद्वेषौ कामक्रोधौ, अभिनिवेशो मरणभयम्, यद्यपि तन्मते क्लेशादीनामन्तः करणधर्मत्वात् क्षेत्रज्ञानमपि तदपरामृष्टत्वमस्त्येव, तथापि अन्तः करणवर्त्तिभिरपि क्लेशादिभि र्न परामृश्यते स भगवानीश्वर इति व्यक्तं योगभाष्ये इति मकरन्दः, कर्मधर्माधर्महेतुर्भावनासाध्यं यागहिंसादि, विपाको जात्यायुर्भोगाः, फलपर्यन्तमाशेरत इत्याशया धर्माधर्माः तै रपामृष्टः, शरीरैकनिष्पाद्यवेदादिनिर्माणार्थंकायो निर्माणकायस्तमधिष्ठायोपादाय, सम्प्रदीयते गुरुणा शिष्यायेति सम्प्रदायो वेदस्तस्य प्रद्योतकः प्रकाशको यतोवेदोऽनादिरेव भगवता द्योत्यते, वेदे

निष्पाद्यत्वमुच्चार्यत्वं न तूत्पाद्यत्वम्, भगवतश्चादृष्टाभावेऽपि तच्छरीरसाध्यघटादिजन्यभोगजनकादस्मदाद्यदृष्टैरेव तच्छरीरं निष्पाद्यते, अनुग्राहकः शिक्षाद्वारा घटादि निर्माणे कुलालादीनामनुग्रहकारीत्यर्थः, क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर इति तत् सूत्रम्, तत्र पुरुषविशेष इत्यनेन निर्माणकायमधिष्ठाय सम्प्रदाय प्रद्योतकोऽनुग्राहकश्चेत्यस्य सूचनम्, पातञ्जलयोगदर्शनस्य समाधिवाद साधननिर्देशवादविभूतिवाद-कैवलवाद-भेदेन चत्वारः वादाः, तत्र प्रथम वादे 'अथ योगानुशासनम् ॥१॥ योगश्चित्तवृत्तिनिरोधः ॥२॥ सर्वचित्तवृत्तिनिरोधत्वस्यासम्प्रज्ञातसमाधौ सत्त्वेऽपि सम्प्रात समाधावभावादव्याप्तिदिति क्लिष्टचित्तवृत्तिनिरोधो योग इति लक्षणं ज्ञेयम् । तदा द्रष्टुः स्वरूपेऽवस्थानम् ॥३॥ चित्तवृत्तिनिरोधकाले द्रष्टा स्वस्वरूपेऽवतिष्ठते । वृत्तिसारूप्यमितरत्र ॥ ४ ॥ इतरत्र अन्यकाले, वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः ॥ ५ ॥ प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ॥ ६ ॥ तत्र प्रत्यक्षानुमानागमाः प्रमाणानि ॥ ७ ॥ विपर्ययो मिथ्याज्ञान मतद्रूपप्रतिष्ठम् ॥८॥ शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ॥९॥ अभावप्रत्ययालम्बनावृत्ति र्निद्रा ॥१०॥ अनुभूतविषया सम्प्रमोवः स्मृतिः ॥११॥ विकल्पनिद्रास्मृतिषु न्यायविशारदस्येत्थं तर्कणम्–

अत्र विकल्पः शब्दात्राखण्डालोकनिर्भासः असत्ख्यात्यसिद्धेः, किन्तु 'असतो णात्थि णिसेहो' इत्यादि भाष्यकृद् वचनात् खण्डशः प्रसिद्धपदार्थानां संसर्गारोप एव, अभिन्ने भेदनिर्भासादिस्तु नयात्मा प्रमाणैक देश एव ॥ ९ ॥

निद्रातु सर्वानाभावालम्बना, स्वप्ने करितुरगादिभावानामपि प्रतिभासनात्, नापि सर्वामिथ्यैव, संवादिस्वप्नस्यापिबहुशो-दर्शनात् ॥ १० ॥

स्मृतिरप्यनुभूते यथार्थतत्ताख्यधर्मावगाहिनी, संवादविसंवादाभ्यां द्वैविध्यदर्शनात् इति तिसृणामुत्तरवृत्तीनां द्वयोरेव यथायथमन्तर्भावात् पञ्चवृत्त्यभिधानं स्वरुचितप्रपञ्चार्थम्, अन्यथा क्षयोपशमभेदादसङ्ख्यभेदानामपि सम्भवादित्याहृत सिद्धान्त-परमार्थविदः इति ।

अभ्यास-वैराग्याभ्यां तन्निरोधः ॥१२॥ तन्निरोध इति चित्त-वृत्ति निरोध इत्यर्थः, तत्रस्थितौ यत्नोऽभ्यासः ।: १३ ॥ स्थितौ मनसः एकस्मिन् विषयेऽवस्थाने, सतु दीर्घकालनैरन्तर्यसत्कारासेवितोदृढभूमिः ॥१४॥ स तु अभ्यासः पुनः, दृष्टानुश्रविकविषय-वितृष्णस्यवशीकारसंज्ञा वैराग्यम् ॥ १५ ॥ दृष्टः प्रत्यक्षादिलौकिकप्रमाणविषयः, कामिनीकाञ्चनादिः, आनुश्रविको वैदिकोयागादिः, अत्रोपाध्यायस्य परामर्शः–

'विषयदोषजनितमापातधर्मसन्न्यासलक्षणं प्रथममिति, प्रथमं वशीकारसंज्ञात्मकं वैराग्यम् । तत्परं पुरुषख्याते र्गुणवैतृष्ण्यम् ॥१६॥

'स तत्त्वचिन्तया विषयौदासीन्येन जनितं द्वितीयापूर्वकरण-भावितात्त्विकधर्मसन्न्यासलक्षणं द्वितीयं वैराग्यम्, यत्र क्षायोपशमिका धर्मा अपि क्षीयन्ते क्षायिकाश्चोत्पद्यन्ते इत्यस्माकं सिद्धान्तः इत्युपाध्यायाः,

द्वितीयं गुणवैतृष्ण्यारूपम् । अस्माकं जैनानाम्, वितर्कविचारानन्दास्मितारूपानुगमात् सम्प्रज्ञातः ॥१७॥

विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः ।।१८।। अत्रेत्थमुपाध्यायैश्चर्चितम्– द्विविधोऽप्ययं अध्यात्मभावनाध्यानसमतावृत्तिक्षयभेदेन प्रञ्चधोक्तस्य योगस्य पञ्चभेदेऽवतरति–

वृत्तिक्षयोह्यात्मनः कर्मसंयोगयोग्यतापगमः, स्थूलसूक्ष्माह्यात्मनश्चेष्टा वृत्तयः, तासां मूलहेतुः कर्मसंयोगयोग्यता, सा चाकरणनियमेन ग्रन्थिभेदे उत्कृष्टमोहनीयबन्धव्यवच्छेदेन तत् तद्गुणस्थाने तत् तत् प्रकृत्यान्तिकबन्धव्यवच्छेदस्य हेतुना क्रमशो निवर्त्तते, तत्र पृथक्त्ववितर्कसविचारैकत्ववितर्काविचाराख्यशुक्लध्यानद्वयभेदे सम्प्रज्ञातः समाधिः वृत्त्यर्थानां सम्यग्ज्ञानात्, तदुक्तं—

'समाधिरेष एवान्यैः सम्प्रज्ञातोऽभिधीयते ।

सम्यक्प्रकर्षरूपेण वृत्त्यर्थज्ञातस्तथा ।।१।।'

निर्वितर्कविचारानन्दास्मितानिर्भासस्तु पर्यायविनिर्मुक्तशुद्धद्रव्यध्यानाभिप्रायेण व्याख्येयः, यन्नयमालम्ब्योक्तम् 'का अरइ के आणंदे इत्थं पि अगाहे चरे' इत्यादि,

क्षपकश्रेणिपरिसमाप्तौ केवलज्ञानलाभस्त्वसम्प्रज्ञातः समाधिः, भावमनोवृत्तीनां ग्राह्यग्रहणाकारशालिनीनामवग्रहादिक्रमे तत्र सम्यक् परिज्ञानाभावात्, अत एव भावमनसा संज्ञाऽभावाद् द्रव्यमनसा च तत् सद्भावात्, केवलिनो संज्ञीत्युच्यते, तदिदमुक्तं योगबिन्दौ–'असम्प्रज्ञात एषोऽपि समाधिर्गीयते परैः ।

निरुद्धाशेषवृत्त्यादि तत् स्वरूपानुवेधतः ।।१।।

धर्ममेघोऽमृतात्मा च भवशत्रुः शिवोदयः ।

सत्त्वानन्दः परश्चेति योज्योऽत्रैवार्थयोगतः ॥२॥' इत्यादि, संस्कारशेषत्वञ्चात्र भवोपग्राहिकर्मांशरूपसंस्कारापेक्षया व्याख्येयम्, मतिज्ञानभेदस्य संस्कारस्य तदा मूलत एव विनाशात्, इत्यस्मन्मत निष्कर्ष इति दिक्' इति । भवप्रत्ययो विदेहप्रकृतिलयानाम् ॥१९॥ भवप्रत्ययः भवकारणकः, अत्र 'उपशान्तमोहत्वेनोक्तानां लयसप्तमानां ज्ञानयोगरूपसमाधिमधिकृत्येदं प्रवृत्तमेतदस्मत्मतमित्युपाध्यायाः । श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् ॥२०॥

इतरेषां विदेहप्रकृतिलयभिन्नानाम् । तीव्रसंवेगानामासन्नः ।२१। समाधिरित्यनुवर्त्तते । मृदुमध्याधिमात्रत्वात् ततोऽपि विशेषः ।२२। ईश्वरप्रणिधानाद्वा ॥ २३ ॥ समाधिः सम्बध्यते, क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ॥२४॥ पूर्वमेवैतद्व्याख्यातम् । तत्र निरतिशयं सर्वज्ञवीजम् ॥ २५ ॥ तत्र पुरुषविशेषे, पूर्वेषामपि गुरुः कालेनानवच्छेदात् ॥२६॥ ईश्वरः सम्बध्यते । कालेनानवच्छेदादित्यनेन नित्यमुक्तत्वमावेदितं, तदपाकरणं च कृतमुपाध्यायेन । तस्य वाचकः प्रणवः ॥२७॥ तस्य ईश्वरस्य । तज्जपस्तदर्थभावनम् ॥ २८ ॥ तत् पदेन प्रणवस्यौँकारस्य परामर्शः । ततः प्रत्यक्चेतनाधिगमोऽपि, अन्तरायाभावश्च ॥२९॥ ततः प्रणवार्थभावनतः, प्रत्यक्चेतनाधिगमः शरीरादिव्यतिरिक्तात्म स्वरूपज्ञानम्, चकरात् तत इति सम्बध्यते प्रणवजपतदर्थ भावनतोऽन्तरायाभावो भवति । के अन्तराया इत्याकाङ्क्षायामाहव्याधिस्त्यानसंशय प्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः ॥३०॥ दुःखदौर्मनस्याङ्ग मेजयत्वश्वास-

प्रश्वासा विक्षेपसहभुवः ।। ३१ ।। तत् प्रतिषेधार्थमेकतत्त्वाभ्यासः ।।३२।। तत् पदेन चित्तविक्षेप तत् सहभुवां परामर्शः । मैत्रीकरणामुदितो पेक्षाणां सुखदुःख पुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम् ।। ३३ ।। उपाध्यायैः स्वसिद्धान्तसिद्धमैत्र्यादि स्वरूपमुपवर्णितम्, प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ।।३४।। अथवा प्राणस्य प्रच्छर्दनं निष्कासनं, विधारणं गतिप्रतिबन्धेनैकत्रावस्थापनं ताभ्यां चित्तप्रसादनं भवतीत्यर्थः, अत्र स्वमतमुपाध्यायै र्दर्शितं यथा–'अनैकान्तिकमेतत्, प्रसह्य ताभ्यां मनोव्याकूलीभावात्, 'उसासंण णिकंभइ' इत्यादि पारमर्षेण तन्निषेधाच्च, इति वयम्' इति ।

विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी ।।३५।। चित्तप्रसादनमिति सम्बध्यते, एवमग्रेऽपि, विशोका वा ज्योतिष्मती ।।३६।। वीतरागविषयं वा चित्तम् ।।३७।। स्वप्ननिद्राज्ञानालम्बनं वा ।। ३८ ।। यथाभिमतध्यानाद्वा ।। ३९ ।। परमाणुपरममहत्त्वान्तोऽस्य वशीकारः ।।४०।। अस्य चित्तस्य । क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृ ग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः ।।४१।। क्षीणवृत्तेरित्यत्र मनस इति सम्बध्यते । तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः ।।४२।। स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ।।४३।। एतयैव सविचारा निर्विचारा च सूक्ष्म विषया व्याख्याता ।।४४।। सूक्ष्मविषयत्वञ्चालिङ्गपर्यवसानम् ।।४५।। ता एव सबीजः समाधिः ।।४६।। ता एव उपदर्शितास्समापत्तय एव । अत्रोपाध्यायैरिद स्वसिद्धान्तरहस्यमा-

वेदितम् "पर्यायोपरक्तानुपरक्तस्थूलसूक्ष्मद्रव्यभावनारूपाणामेतासां शुक्लध्यानजीवानुभूतानां चित्तैकाग्र्यकारिणीनामुपशान्तमोहापेक्षया सबीजत्वम्, क्षीणमोहापेक्षया तु निर्बीजत्वमपि स्यादितित्वार्हतसिद्धान्तरहस्यम्" इति, निर्विचारवैशारद्येऽध्यात्मप्रसादः ॥४७॥ ऋतम्भरा नाम्नी प्रज्ञोपजायते । श्रुतानुमानाभ्यामन्यविषया विशेषार्थत्वात् ॥४९॥ ऋतम्भराप्रज्ञायां श्रुतानुमानभिन्नविषयत्वे हेतुः विशेषार्थत्वात् विशेषविषयत्वादित्यर्थः । तज्जः संस्कारोऽन्यसंस्कार प्रतिबन्धी ॥५०॥ तज्जः ऋतम्भराप्रज्ञाजन्यः । तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः ॥५१॥ तस्यापि ऋतम्भराप्रज्ञाजन्यसंस्कारस्यापि ऋतम्भराप्रज्ञास्वरूपे उपाध्याया इत्थमामनन्ति ।

सन्ध्येव दिनरात्रिभ्यां केवलाच्च श्रुतात्पृथग् ।
बुधैरनुभवो दृष्टः केवलार्कारुणोदयः ॥१॥

इत्यस्मदुक्तलक्षणलक्षितानुभवापरनामधेया शास्त्रोक्तायां दिशि, तदतिक्रान्तमतीन्द्रियं विशेषमवलम्बमानात्तत्त्वतो द्वितीयापूर्वकरणभाविसामर्थ्ययोगप्रभवेयं समाधि प्रज्ञा, इति युक्तः पन्थाः इति समाधिपादः ।

अथ साधननिर्देशपादः । तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ॥१॥ अत्रोपाध्यायाः—

'बाह्यं तपः परमदुश्चरमाचरध्व–माध्यात्मिकस्य तपसः परिबृंहणार्थम्' इत्यस्मदीयाः, सर्वत्रानुष्ठाने मुख्यप्रवर्तकशास्त्रस्मृतिद्वारा तदादिप्रवर्त्तकपरमगुरोर्हृदये निधानमीश्वरप्रणिधानम्, तदुक्तम्–

'अस्मिन् हृदयस्थे सति हृदयस्थस्तत्त्वतो मुनीन्द्र इति ।

हृदयस्थिते च तस्मिन् नियमात् सर्वार्थ संसिद्धिः ॥१॥'

इत्यादीत्यस्मन्मतम् ' इति ।

समाधिभावनार्थः क्लेशतनूकरतार्थश्च ॥२॥ क्रियायोग इति सम्बध्यते, अविद्याऽस्मितारागद्वेषाभिनिवेशाः क्लेशाः ॥३॥ अविद्याक्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम् ॥४॥ अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ॥५॥ दृग्दर्शनशक्त्योरेकात्मतैवास्मिता ॥६॥ सुखानुशायी रागः ॥७॥ दुःखानुशायी द्वेषः ॥८॥ स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः ॥९॥ अत्राविद्यादीनां प्रसुप्तत्वादीनां च स्वरूपनिर्वचनं स्वसिद्धानुसारिकृतमुपाध्याये जिज्ञासुभिरवलोकनीयंतत् । ते प्रतिप्रसवहेयाः सूक्ष्माः ॥१०॥ ते अविद्यादयः, प्रतिप्रसवहेया इति क्षीणमोहसम्बन्धियथाख्यातचरित्र हेया इत्यर्थो जैनमतानुसारी । ध्यानहेयास्तद्वृत्तयः ॥ ११ ॥ तद् वृत्तयः अविद्यादिवृत्तयः । क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः ॥ १२ ॥ सतिमूले तद्विपाको जात्यायुर्भोगाः ॥ १३ ॥ अत्रोपाध्याये जैनराद्धान्तो विस्तरेण प्रतिपादितो विशेषजिज्ञासुभिरवलोकनीयः । ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ॥ १४ ॥ ते जात्यायुर्भोगाः । परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः ॥ १५ ॥ हेयं दुःखमनागतम् ॥१६॥ द्रष्टृदृश्ययोः संयोगो हेयहेतुः ॥१७॥ प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् ॥१८॥ विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि ॥ १९ ॥ अत्रो-

पाध्यायाः–निश्चयनयमतमेतद्, यदुपजीव्याह स्तुतौ महावादी-'भवबीजमनन्तमुज्झितं विमलज्ञानमनन्तमर्जितम् । न च हीन-कलोऽसि नाधिकः समतां नाप्यतिवृत्त्यवर्त्तसे ॥ १ ॥' इति । प्रागभाव-प्रध्वंसाभावानभ्युपगमे सर्वमेतदुक्तमनुपपन्नम् तदुक्तमकलङ्केन-'कार्यद्रव्यमनादिस्यात् प्रागभावस्य निह्नवे । प्रध्वंसस्यापलापेतु तदेवानन्ततां व्रजेत् ॥ १ ॥' तदुपगमे तु द्रव्यपर्यायोभयरूपत्वाद् सर्वत्रत्रैलक्षण्येन कथञ्चिदेषाव्यवस्थायुज्येतापीति वयं वदामः' इति। द्रष्टादृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ॥२०॥ तदर्थ एव दृश्य-स्यात्मा ॥ २१ ॥ कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ॥२२॥ स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥२३॥ तस्य हेतुरविद्या ॥२४॥ तस्य संयोगस्य । तदभावात् संयोगाभावो हानं तद् दृशेः कैवल्यम् ॥ २५ ॥ तदभावात् अविद्याया अभावात्, तत् संयोगाभावलक्षणंहानम् । विवेकख्यातिरविप्लवाहानोपायः ॥२६॥ तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ॥ २७ ॥ तस्य हानोपायस्य । योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः ॥ २८ ॥ यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ॥२९॥ अङ्गानि चित्तवृत्तिनिरोधलक्षणयोगाङ्गानि, अहिंसासत्या-स्तेय ब्रह्मचर्यापरिग्रहा यमाः ॥ ३० ॥ जातिदेशकालसमयानव-च्छिन्ना सार्वभौमा महाव्रतम् ॥३१॥ अत्र यमा इति सम्बन्ध्यन्ते । अत्रोपाध्यायाः–सर्वशब्दगर्भप्रतिज्ञया महाव्रतानि, देशशब्दगर्भ-प्रतिज्ञया चाणुव्रतानीति पुनः पारमार्षविवेकः, एकवचनं चात्र सर्वप्रतिज्ञया पञ्चानामपि तुल्यत्वाभिव्यक्त्यर्थम्' इति । शौच-सन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः॥३२॥ अत्रोपाध्यायाः

'भावशौचानुपरोध्येव द्रव्यशौचं बाह्यमादेयमिति तत्त्वदर्शिनः' इति वितर्क बाधने प्रतिपक्षभावनम् ॥ ३३ ॥ वितर्का हिंसादय-कृत-कारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्त फला इति प्रतिपक्षभावनम् ॥ ३४ ॥ अहिंसाप्रतिष्ठायां तत् सन्निधौ वैरत्यागः ॥ ३५ ॥ सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् ॥३६॥ अस्त्येयप्रतिष्ठायां सर्वरत्नोपस्थानम् ॥३७॥ ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः ॥ ३८ ॥ अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः ॥ ३९ ॥ शौचात्स्वाङ्ग जुगुप्सापरैरसंसर्गः ॥ ४० ॥ सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च ॥ ४१ ॥ चकारात् सत्त्व-शुद्ध्यादीनि शौचाद् भवन्ति । सन्तोषादनुत्तमः सुखलाभः ॥४२॥ कायेन्द्रियसिद्धिरशुद्धिक्षयात् तपसः ॥४३॥ स्वाध्यायादिष्टदेवता-सम्प्रयोगः ॥४४॥ समाधिसिद्धिरीश्वरप्रणिधानात् ॥४५॥ स्थिर-सुखमासनम् ॥ ४६ ॥ प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् ॥ ४७ ॥ स्थिरसुखमासनं भवतीति संटङ्कः । ततो द्वन्द्वानभिघातः ॥ ४८ ॥ निरुक्तासनतश्शीतोष्णादि द्वन्द्वाभिघातो न भवति । तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ॥ ४९ ॥ तस्मिन् सति द्वन्द्वानभिघाते सति, कथम्भूतः प्राणायाम इत्याकाङ्क्षायामाह बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसङ्ख्याभिः परिदृष्टोदीर्घसूक्ष्मः ॥५०॥ प्राणायाम इति सम्बध्यते, बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ॥ ५१ ॥ चतुर्थः प्राणायामः । ततः क्षीयते प्रकाशावरणम् ॥ ५२ ॥ ततः प्राणायामात् । धारणासु च योग्यतामनसः ॥ ५३ ॥ चकरात् प्राणायामादिति सम्बध्यते । स्वविषयासम्प्रयोगे चित्तस्वरूपानुकार

इवेन्द्रियाणां प्रत्याहारः ॥५४॥ ततः परमावश्यतेन्द्रियाणाम् ॥५५॥ ततः प्रत्याहारात् । अत्र उपाध्याया इत्थमामनन्ति "व्युत्थातध्यानदशासाधारणं वस्तुस्वभावभावनया स्वविषयप्रतिपत्ति प्रयुक्तरागद्वेषरूपफलानुपधानमेवेद्रियाणां परमो जय इति तु वयम्, तथोक्तं-शीतोष्णीयाध्ययने 'जस्सिमे सद्दाय रूवाय गधाय रसाय फासाय अभिसमन्नागया भवंति से आयवं नाणवं वेयवं धम्मवं बंभवं' इत्यादि, अत्र 'अभिसमन्वागता इत्यस्य अभीत्याभिमुख्येन मनः परिणामपरतन्त्रा इन्द्रियविषया इत्युपयोगलक्षणेन, समिति सम्यक्त्वरूपेण नैते इष्टा अनिष्टावेति निर्धारणया, अनु पश्चात्, आगताः परिच्छिन्ना यथार्थस्वभावेन यस्येत्यर्थः, स आत्मवानित्यादिपरस्परमिन्द्रियजयस्य फलार्थवादः, अन्यत्राप्युक्तम् "ण सक्कारुव भद्दट्ठुं, चक्खु विसयगभागयं ।

रागद्दोसा उजेतत्थ, ते भिक्खू परिवज्जये ॥१॥" इत्यादि, चित्तनिरोधादतिरिक्तप्रयत्नानपेक्षत्वं तु परमेन्द्रियजये ज्ञानैक साध्ये प्रयत्नमात्रानपेक्षत्वादेव निरूप्यते, तथा च स्तुतिकारः-

'संयतानिनचाक्षाणि नैवोच्छृङ्खलितानि च ।

इति सम्यक् प्रतिपदा त्वयेन्द्रिय जयः कृतः ॥१॥' इति, न च प्राणायामादि हठयोगाभ्यासश्चित्तनिरोधे परमेन्द्रिय जये च निश्चित उपायोऽपि, 'ऊसासं ण णिरुंभइ' इत्याद्यागमेन योगसमाधानविघ्नत्वेन बहुलं तस्य निषिद्धत्वात्, तस्मादध्यात्मभावनोपबृंहितसमतापरिणामप्रवाहोज्ञानाख्यो राजयोग एव निवृत्तेन्द्रियस्यपरमेन्द्रियजयस्य चोपाय इति युक्तम्' इति । इति द्वितीयः साधननिर्भासपादः ॥

## ॥ अथ तृतीयो विभूतिपादः ॥

देशबन्धश्चित्तस्य धारणा ॥ १ ॥ तत्र प्रत्ययैकतानता ध्यानम् ॥२॥ तत्र धारणायाम्। तदेवार्थमात्रनिर्भासंस्वरूपशून्यमेव समाधिः ॥३॥ तदेव ध्यानमेव। त्रयमेकत्र संयम ॥४॥ एकगतं धारणाध्यान समाधि त्रयं संयम इत्यर्थः। तज्जयात् प्रज्ञालोकः ॥ ५ ॥ तज्जयात् संयमजयात्। तस्य भूमिषु विनियोगः ॥ ६ ॥ तस्य प्रज्ञालोकस्य योगभूमिषु विनियोगो भवति। त्रयमन्तरङ्गं पूर्वेभ्यः ॥ ७ ॥ पूर्वेभ्यो यमनियमासनप्राणायाम प्रत्याहारारेभ्यः पञ्चभ्यो योगस्य सबीजस्यान्तरङ्गं धारणाध्यानसमाधित्रयमित्यर्थः। तदपि बहिरङ्ग निर्बीजस्य ॥ ८ ॥ असम्प्रज्ञातयोगस्य धारणाध्यानसमाधित्रयमपि बहिरङ्गमित्यर्थः ॥ व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षण चित्तान्वयो निरोधपरिणामः ॥९॥ तस्य प्रशान्तवाहिता संस्कारात् ॥१०॥ तस्यनिरोधपरिणामस्य। सर्वार्थैकाग्रतयोः क्षयोदयौ चित्तस्य ततः पुनः समाधिपरिणामः ॥ ११ ॥ शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः ॥ १२ ॥ एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ॥१३॥ शान्तोदितात्यपदेश्य धर्मानुपाती धर्मी ॥ १४ ॥ क्रमान्यत्वं परिणामान्यत्वे हेतुः ॥१५॥ परिणामत्रयसंयमादतीतानागतज्ञानम् ॥ १६ ॥ शब्दार्थ प्रत्ययाना-मितरेतराध्यासात्सङ्करस्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम् ॥ १७ ॥ संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम् ॥१८॥ प्रत्ययस्य-परचित्तज्ञानम् ॥ १९ ॥ प्रत्ययस्येत्यनन्तरं संयमादिति योज्यम्।

न च तत् सालम्बनं तस्या विषयी भूतत्वात् । ॥२०॥ कायरूप-
संयमात् तद्ग्राह्यशक्तिस्तम्भे चक्षुः प्रकाशासम्प्रयोगेऽन्तर्धानम्
॥२१॥ सोपक्रमं निरुपक्रमं चाकर्म तत् संयमादपरान्तज्ञानमरिष्टे-
भ्यो वा ॥२२॥ मैत्र्यादिषु बलानि ॥२३॥ मैत्र्यादिष्वित्यत्र संयमा-
दिति सम्बन्धनीयम्, एवमग्रेऽपि । बलेषु हस्तिबलादीनि ॥ २४ ॥
प्रवृत्त्या लोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टार्थज्ञानम् ॥२५॥ भुवन-
ज्ञानं सूर्ये संयमात् ॥ २६ ॥ चन्द्रे ताराज्ञानम् ॥२७॥ सप्तम्यन्ता-
नन्तरं प्रकृते सर्वत्र संयमादिति योज्यम् । ध्रुवे तद् गतिज्ञानम्
॥२८॥ नाभिचक्रेकायव्यूहज्ञानम् ॥२९॥ कण्ठकूपे क्षुत्पिपासानि-
वृत्तिः ॥ ३० ॥ कूर्मनाड्यां स्थैर्यम् ॥ ३१ ॥ मूर्धज्योतिषिसिद्ध-
दर्शनम् ॥३२॥ प्रातिभाद्वा सर्वम् ॥३३॥ हृदये चित्तसंवित् ॥३४॥
सत्त्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात्
स्वार्थसंयमात् पुरुषज्ञानम् ॥ ३५ ॥ ततः प्रातिभश्रावणवेद नाद-
र्शास्वादवार्त्ताजायन्ते ॥ ३६ ॥ ततः पुरुषज्ञानात् । ते समाधावुपस-
र्गाव्युत्थाने सिद्धयः ॥ ३७ ॥ ते प्रातिभश्रावणवेदनास्वादवार्त्ताः ।
बन्धकारणशैथिल्यात्प्रचारसंवेदनाच्च चित्तस्यपरशरीरप्रवेशः
॥ ३८ ॥ उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्कान्तिश्च ॥ ३९ ॥
समानजयाज्ज्वलनम् ॥ ४० ॥ उदानसमानावान्तरवायुविशेषौ ।
श्रोत्राकाशयोः सम्बन्धसंयमाद् दिव्यं श्रोत्रम् ॥४१॥ कायाकाशयोः
सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम् ॥४२॥ बहिरकल्पि-
तावृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः ॥४३॥ ततः महाविदा-
ख्यवृत्तितः । स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः ॥४४॥

ततोऽणिमादिप्रादुर्भावः कायसम्पत्तद्धर्मानभिघातश्च ॥४५॥ ततः भूतजयात्, तद्धर्मेति कायधर्मेत्यर्थः, रूपलावण्यबलवज्रसंहननत्वानि कायसम्पत् ॥४६॥ ग्रहणस्वरूपास्मिता चयार्थवत्त्वसंयमादिन्द्रियजयः ॥४७॥ ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ॥४८॥ ततः इन्द्रियजयात् । सत्त्वपुरुषान्यथाख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वञ्च ॥ ४९ ॥ तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ॥५०॥ तद्वैराग्यादपि सर्वभावाधिष्ठातृत्वसर्वज्ञातृत्वयोर्वैराग्यादि । स्थान्युपनिमन्त्रणेसङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात् स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात् ॥ ५१ ॥ क्षणतत्क्रमयोः संयमाद् विवेकजंज्ञानम् ॥ ५२ ॥ जातिलक्षणदेशैरन्यतानवच्छेदात् तुल्ययोस्ततः प्रतिपत्तिः ॥ ५३ ॥ तुल्ययोः सदृशयोः क्षणतत्क्रमयोः, ततोविवेकजज्ञानात् । तारकं सर्वविषयंसर्वथाविषयमक्रमंचेति विवेकजं ज्ञानम् ॥५४॥ सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति ॥ ५५ ॥ परिणामत्रयसंयमादिनाऽतीतानागतज्ञानाद्यैश्वर्यस्य संभवम् सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यस्य सम्भवश्च न युक्तमित्यावेदयितुमुपाध्याया इत्थमामनन्ति "अत्रेदंचिन्त्यम्-ऐश्वर्यं लब्धिरूपं न समाधिरूपसंयमजन्यं, वैचित्र्यप्रतियोगिनस्तस्य विचित्रक्षयोपशमादिजन्यत्वात्, एकत्र त्रयरूपस्य च संयमस्य चित्तस्थैर्य एवोपयोगो बाहुल्येन, आत्मद्रव्यगुणपर्यायगुणनरूपस्य च तस्य शुक्लध्यानशरीरघटकतया कैवल्यहेतुत्वमपि ॥ ईश्वरस्यानीश्वरस्य वा विवेकज्ञानवतस्तदभाववतो वा 'सत्त्वपुरुषयोः शुद्धिसाम्ये कैवाद्यम्' इत्यप्ययुक्तम्, विवेकजं केवलज्ञानमन्तरेणोक्त-

शुद्धिसाम्यस्यैवानुपपत्तेः, 'दग्धक्लेशबीजस्य ज्ञाने पुनरपेक्षानास्ति' इत्युक्ते निर्युक्तिकत्वादात्मदर्शनप्रतिबन्धकस्यैव कर्मणः केवलज्ञान-प्रतिबन्धकत्वेन तदपगमे तदुत्पत्ते रवर्जनीयत्वान्निष्प्रयोजनस्यापि फलरूपस्य तस्य स्वस्वसामग्रीसिद्धत्वात्, न हि प्रयोजनक्षति भिया सामग्रीकार्यं नार्जयतीति, तदिदमुक्तम्-

क्लेशपक्ति मतिज्ञानान्न किञ्चिदपि केवलात् ।

तमः प्रचयनिःशेष-विशुद्धिप्रभवं हि तत् ॥१॥' इति, गुणविशेषजन्यत्वेऽप्यात्मदर्शनवन्मुक्तौ तस्याव्यभिचारित्वं तुल्यम् वस्तुतो ज्ञानस्य सर्वविषयत्वं स्वभावः, छद्मस्थस्य च विचित्र-ज्ञानावरणेन स प्रतिबध्यत इति, निःशेष प्रतिबन्धकापगमे ज्ञाने सर्वविषयकत्वमावश्यकम्, तदुक्तम्- 'ज्ञो ज्ञेये कथमज्ञः स्यात् असति प्रतिबद्धरि ।

दाह्योऽग्निर्दाहको न स्यात् कथमप्रतिबन्धक ॥१॥' इति एतेन 'विवेकजं सर्वविषयकं ज्ञानमुत्पन्नमपि सत्त्वगुणत्वेन निवृत्ताधिका-रायां प्रकृतौ प्रवीलयमानं नात्मानमभिस्पृशतीत्यात्माऽर्थशून्य-निर्विकल्पचिद्रूपएवमुक्तौ व्यवतिष्ठत' इत्यप्यपास्तम्, चित्त्वाव-च्छेदेनैव सर्वविषयकत्वस्वभावकल्पनादर्थशून्यायां चिति माना-भावात्, बिम्बरूपस्य चित्सामान्यस्याविवर्त्तस्य कल्पनेऽचित्-सामान्यस्यापि तादृशस्य कल्पनापत्तेः, व्यवहारस्यबुद्धिविशेषधर्मै-रेवोपपत्तेः, यदिचाचित्सामान्यनिष्ठएवाचिद्विवर्त्तः कल्प्यते तदानुल्य यायाच्चिद्विवर्त्तोऽपि चित्सामान्यनिष्ठ एवाभ्युपगन्तुंयुक्तो, न तु चिदचिद्विवर्त्ताधिष्ठानमेव कल्पयितुं युक्तम्, नयादेशे सर्वत्रद्रव्ये

तुल्यप्रसरत्वात्, कौटस्थ्यं त्वात्मनो यच्छ्रुतिसिद्धं तदितरावृत्ति स्वाभाविकज्ञानदर्शनोपयोगवत्त्वेन समर्थनीयम्। निर्धर्मकत्वं चितः कौटस्थ्यमित्युक्तौ तत्र प्रमेयत्वादेरप्यभावप्रसङ्गात्, तथाच 'सच्चिदानन्दरूपं ब्रह्म इत्यादेरनुपपत्तिः, असदादिव्यावृत्तिमात्रेण सदादिवचनोपपादने च चित्त्वमप्यचिद्व्यावृत्तिरेव स्यादिति गतं चित् सामान्येनापि, यदि च 'उत्पादव्ययध्रौव्ययुक्तंसद्' इति गुणस्थलोपदर्शितरीत्या सल्लक्षणं सर्वत्रोपपद्यते तदा संसारिमुक्तयोरसाङ्कर्येण स्वविभावस्वभावपर्यायैस्तद बाधमानं बन्धमोक्षादिव्यवस्थामविरोधेनोपपादयतीति एतज्जैनेश्वरप्रवचनामृतमावीय 'उपचरितभोगाभावो मोक्षः 'इत्यादि मिथ्यादृग्वचनवासनाविषमनादिकालनिपीतमुद्धमन्तु सहृदयाः, अधिक लतादौ' इति।

इति तृतीयो विभूतिपादः॥

# ॥ अथ चतुर्थः कैवल्यपादः ॥

जन्मौषधिमन्त्रतपः समाधिजाः सिद्धयः॥ १॥ जात्यन्तरपरिणामः प्रकृत्या पूरात्॥ २॥ निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्॥३॥ निर्माणचित्तान्यस्मितामात्रात् ॥४॥ प्रकृतिभेदे प्रयोजकं चित्तमेकमनेकेषाम्॥ ५॥ तत्र ध्यानजमनाशयः॥६॥ कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्॥७॥ ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम्॥८॥ जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात्॥ ९॥ तासामनादित्वं चाशिषो नित्यत्वात्॥१०॥ हेतुफलाश्रयालम्बनैः

सङ्गतत्वादेषामभावे तदभावः ॥११॥ अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद् धर्माणाम् ॥ १२ ॥ अत्रोपाध्यायाः—

द्रव्यपर्यायात्मनैवाद्यत्रयसमावेशो युज्यते नान्यथा, निमित्तस्वरूपभेदस्य परेणाप्यवश्याश्रयणीयत्वात्, यथा चाभूत्वाभावाभावयोरपि पर्यायद्रव्यस्वरूपाभ्यां स्याद्वाद एव युक्तोऽन्यथा प्रतिनियतवचनव्यवहाराद्यन्यथानुपपत्तेरिति तु श्रद्धेयं सचेतसा' इति ते व्यक्तसूक्ष्मागुणात्मानः ॥ १३ ॥ परिणामैकत्वाद् वस्तुतत्त्वम् ॥ ॥ १४ ॥ वस्तुसाम्येचित्तभेदात् तयोर्विभक्तः पन्थाः ॥१५॥ न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात् ॥ १६ ॥ तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाता ज्ञातम् ॥१७॥ सदा ज्ञाताश्चित्तवृत्तयः तत् प्रभोः पुरुषस्यापरिणामित्वात् ॥ १८ ॥ परिणामैकत्वाद् वस्तुतत्त्वमिति सूत्रे उपाध्यायाः—

'एकानेकपरिणामस्याद्वादाभ्युपगमं विना दुःश्रद्धानमेतत्' इति ज्ञाताज्ञातत्वविमर्शे च जैनसिद्धान्तरहस्यावेदनमित्थम्-ज्ञानस्वरूपस्य चित्तस्यात्मनिर्धर्मतापरिणामः सदासन्निहितत्वेन तस्य सदा ज्ञातत्वेऽपिनानुपपन्नः, शब्दादीनां कादाचित्कसन्निधानेनैव व्यञ्जनावग्रहादिलक्षणेन ज्ञाताज्ञतत्वसम्भवात्, अत एव केवलज्ञाने शक्तिविशेषेण विषयाणां सदासन्निधानाद् ज्ञानावच्छेदकत्वेन तेषां सदा ज्ञातत्वमबाधितमिति तु पारमेश्वरप्रवचनप्रसिद्धः पन्थाः' इति ।

न तत्स्वाभासंदृश्यत्वात् ॥१९॥ एकसमयेचोभयानवधारणम् ॥२०॥ चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसङ्करश्च ॥२१॥ चितेरप्रतिसङ्क्रमायास्तदाकारपत्तौ स्वबुद्धिसंवेदनम् ॥ २२ ॥ द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम् ॥२३॥

अत्रोपाध्यायानामित्थं स्वाभिप्रायप्रकटनम्-वयं तु ब्रूमः- अग्निरूपात्मके प्रकाशे संयोगंविनाऽपि यथा स्वतः प्रकाशत्वं तथा तथा चैतन्येऽपि प्रतिप्राणिपरानपेक्षतयाऽनुभूयमाने, अन्यथाऽनवस्थाव्यासङ्गानुपपत्त्यादिदोषप्रसङ्गात्, परप्रकाशत्वं च तस्य क्षयोपशमदशायां प्रतिनियतविषयसम्बन्धाधीनम्, क्षायिक्यां च दशायां सदा तन् निरावरणस्वभावाधीनम्, तच्चैतन्यं रूपादिवत्सामान्य वदस्पन्दात्मकानुपादानकारणत्वेन गुण इति गुण्याश्रित एव स्यात्, यश्च तस्य गुणी स एवात्मा, निर्गुणत्वं च तस्य सांसारिकगुणाभावापेक्षयैव, अन्यथा स्वाभाविकानन्तगुणाधारत्वात्, बिम्बभूतचितो निर्लेपत्वाभ्युपगमे च तत्प्रतिबिम्बग्राहकत्वेन बुद्धौ प्रकाशस्यानुपपत्तिः बिम्बप्रतिबिम्बभावसम्बन्धस्य द्विष्ठत्वेन द्वयोरपि लेपकत्वतौल्यात्, उपचरितबिम्बत्वोपपादने चोपचरितसर्वविषयत्वाद्युपपादनमपि तुल्यमिति नयादेशविशेषपक्षपातमेतत्' इति ।

तदसङ्ख्येयावासनाभिश्चित्रमपिपरार्थं संहत्यकारित्वात् ॥२४॥ विशेषदर्शिन आत्मभावभावनानिवृत्तिः ॥ २५ ॥ तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम् ॥ २६ ॥ तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ॥२७॥ हानमेषां क्लेशवदुक्तम् ॥ २८ ॥ प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्याते धर्ममेघः समाधिः ॥ २६ ॥ ततः क्लेशकर्मनिवृत्तिः ॥३०॥ तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्याज्ज्ञेयमल्पम् ॥३१॥ अत्रोपाध्यायाः- "अयुक्तमेतत् ज्ञानस्य ज्ञेयांश एवावरणस्यावारकत्वात्, स्वरूपावरणेऽचैतन्यप्रसङ्गात्, ज्ञानानन्त्ये ज्ञेयानन्त्यस्यापि ध्रौव्यात्, उक्तं च 'मुक्तं चात्मपरात्मककर्तृ-

कर्मभावपदम्' इति दिग्' इति। ततः कृतार्थानां परिणामक्रम-समाप्तिर्गुणानाम् ॥३२॥ क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः ॥ ३३ ॥ पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूप-प्रतिष्ठा वा चित्तशक्तिरिति ॥ ३४ ॥ अत्रोपाध्यायायाः- सर्वत्र द्रव्यतयाऽक्रमस्य पर्यायतया च क्रमस्यानुभवात् क्रमाक्रमानुविद्ध-त्रैलक्षण्यस्यैव सुलक्षणत्वात्कूटस्थ नित्यतायां मानाभावः, पर्याये च स्थितिचातुर्विध्याद्वैचित्र्यमिति प्रवचनरहस्यमेव सयुक्तिकमिति तु श्रद्धेयम्' इति कैवल्यपादः।

साङ्ख्यं कापिलमीशतत्त्ववियुतं शेषश्चपातञ्जलं।
सङ्क्षेपेणमयाप्रपञ्चविकलं सन्दर्शितं दर्शनम् ॥
एतत् तत्त्वविमर्शने कृतधियो वाचस्पतेर्भाषितं।
सुव्यक्तं कलयन्तु गौरवभयाद् यन्नात्र संगुम्फितम् ॥१॥

॥ इति साङ्ख्यदर्शनम् ॥



# ॥ अथाक्षपाददर्शनम् ॥

येषां कर्त्ता महेशो विभुरखिलमतिर्देव इष्टोऽन्य एको,
जीवाश्चानेक रूपा विभव उपगता वेद ईश प्रणीतः ॥
सर्वेषां मुक्तिभावे सति भवविलयः सर्वथा तन्मतस्य,
वक्ष्ये तत्त्वानि बालोपकृतिमतिरहं जैनबालः सुशीलः ॥ १ ॥
प्रमाणादीनि तत्त्वानि गौतमोक्तानि षोडशः ॥
अन्यानि चाक्षपादीयै र्नव्यैरिष्टानिकल्पकैः ॥ १ ॥

प्रमाणादीनीत्यत्रादिपदात् प्रमेयमारभ्यनिग्रहस्थानपर्यन्तानामुपग्रहः, गौतमोक्तानि गौतममुनिप्रणीतसूत्राभिहितानि, तच्च सूत्रम् "प्रमाण-प्रमेय-संशय-प्रयोजन दृष्टान्त-सिद्धान्ता-वयव-तर्कनिर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ॥ १॥" इति, षोडश षोडशसंख्यकानि, अन्यानिच उक्तषोडशभिन्नानि प्रतियोगित्वविषयत्वतत्त्वादीनि सखण्डोपाध्यखण्धोपाधिरूपाणि च, आक्षपादीयैः नैयायिकदेशीयैः, नव्यैः नवीनैः शिरोमणिप्रभृतिभिः, कल्पकैः नवीनकल्पनाप्रवणैः, इष्टान्यभ्युपगमनानि ॥

प्राचीनैस्तु नाखण्डसखण्डोपाधीनामतिरिक्तत्वं किन्त्वधिकरणादिस्वरूपत्वमेवेति, मोक्षजनकज्ञानविषयत्वेन प्रमेयस्यादौनिरूपणार्हत्वेऽपि सकलपदार्थव्यवस्थापकत्वेन प्राधान्यत् प्रमाणस्य प्रथममुपन्यासस्ततोऽवसरतो बुभुत्सित प्रमेयस्य, ततः पदार्थव्यवस्थापकतया निरूपणीये न्याये तत् पूर्वाङ्गतयाऽभ्यर्हितयोः संशय-

प्रयोजनयोर्मध्येऽभ्यर्हितस्य संशयस्य, ततः प्रयोजनस्य, ततः परप्रत्यायनमूलत्वेन दृष्टान्तस्य, दृष्टान्तमूलकोन्यायः सिद्धान्तविषय इति सिद्धान्तस्य, ततोऽवसरतः पञ्चावयवरूपस्य न्यायस्य, ततो न्यायेन सहैककार्यकारितया तर्कस्य, ततस्तज्जन्यतया निर्णयस्य, ततश्च तदनुकूलत्वाद्वादस्य, ततश्च वाङ्कार्यनिर्णयकारित्वाज्जल्पस्य, ततो जल्पकार्यविजयानुकूलतया वितण्डायाः, कथात्रयस्यापिदूषणसापेक्षतयाऽनन्तरं दूषणेषु निरूपणीयेषुवादे देशनीयत्वरूपोत्कर्षवत्वाद्धेतुवदाभासमानत्वाच्चादौ हेत्वाभासानां, ततश्च हेत्वाभासोपजीवनेन छलस्य, स्वव्याघातकत्वेनात्यन्तासदुत्तरत्वात् ततो जातेः, कथावसानत्वेनार्थादनन्तरं निग्रहस्थानानामिति, तत्वज्ञानान्मिथ्याज्ञाननाशः ततो रागद्वेषात्मकदोषाभावः, ततो धर्माधर्मात्मकप्रवृत्त्यभावः, ततो विशिष्टशरीरसम्बन्धलक्षणजन्माभावस्ततो दुःखात्यन्ताभावात् तदात्मको मोक्ष इत्येवं षोडशपदार्थतत्वज्ञानस्य मोक्षप्रयोजनम्, एतदर्थकञ्च "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायेतदनन्तरापायादपवर्गः" इति सूत्रम्, प्रमाणत्वप्रमेयत्वादीनामिन्द्रियादिषु सङ्कीर्णानां विभाजकत्वं यद्यपि न सम्भवति, सामान्यधर्मव्याप्यपरस्परविरुद्धनानाधर्मेणधर्मिप्रतिपादनस्यविभागत्वात्, तथापि प्रमाणत्वादीनामसंङ्कीर्णानां विभाजत्वं बोध्यम्"

प्रमाणानीह चत्वारि प्रमेया द्वादशैव तु ।
संशयोहेतुभेदेन भिन्नो द्वेधा प्रयोजनम् ॥२॥

द्विधादृष्टा त आदिष्टः सिद्धान्ताः स्यु श्चतुर्विधाः ।
अवयवाः पञ्चोहस्तु तर्कः पञ्चविधः स्मृतः ॥३॥
निर्णयोवादजल्पाभ्यां वितण्डेति कथात्रयम् ।
हेत्वाभासाः पञ्च ज्ञेयाः छलं च त्रिविधं मतम् ॥४॥
चतुर्विंशतिभेदाःस्युर्जातयोऽन्यानिथानि तु ।
निग्रहस्थानसंज्ञानि द्वाविंशतिमितानि वै ॥५॥

इह न्यायदर्शने, प्रमितिकरणत्वं प्रमाणसामान्यलणम्, तद्घटक प्रमितेश्च यथार्थानुभवत्वं लक्षणम्, स्मृतिकरस्यानुभवस्य पञ्चमप्रमाणत्वापत्तिभिया निरुक्तप्रमितिलक्षणेऽनुभवत्वं निवेशितम्, उक्तश्चोदयनाचार्येण—
अव्याप्तेरधिकव्याप्तेरलक्षणमपूर्वदिक् ।

यथार्थानुभवो मानमनपेक्षतयेष्यते ॥ १ ॥' इति, प्रमितिश्च प्रत्यक्षानुमित्युपमिति शाब्दबोधेन चतुर्विधा, तत्रेन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्, ईश्वरप्रत्यक्षन्तु नात्र लक्ष्यं नित्यस्य तस्य करणाभावात्, तत् साधारणं तु ज्ञानाकरणकज्ञानत्वं प्रत्यक्षसामान्यलक्षणम्, अत्र भ्रमात्मकप्रत्यक्षवारणायाव्यभिचारीति विशेषणं देयम्, सन्निकर्षश्च लौकिकालौकिकभेदेन द्विविधः, तत्र लौकिकसन्निकर्षः संयोग–संयुक्तसमवाय-संयुक्तसमवेत–समवाय–समवाय–समवेतसमवाय–विशेष्यविशेषणभावभेदेन षड्विधः, तत्र प्रथमो द्रव्यप्रत्यक्षकारणं द्रव्यग्राहकेन्द्रियाणां चक्षुस्त्वम् मनसां भवति, द्वितीयतृतीयौ श्रोत्रभिन्नानां पञ्चानामपीन्द्रियाणां, चतुर्थपञ्चमौ श्रोत्रस्य, षष्ठश्च सर्वेषामपीन्द्रियाणां, लौकिकसन्नि-

कर्षजन्यं ज्ञानं लौकिकप्रत्यक्षम्, सामान्यलक्षणा-ज्ञानलक्षणायोगजभेदेनालौकिकसन्निकर्षस्त्रिविधः, तत्र चक्षुरादिना लौकिकसन्निकर्षेण यत् किञ्चद् घटप्रत्यक्षानन्तरं घटत्वेन सकलघट प्रत्यक्षं घटत्वादिलक्षणसामान्यप्रत्यासत्तिजन्यम्, चक्षुरिन्द्रियेण चन्दनप्रत्यक्षे सन्निकृष्टे वा चन्दने घ्राणेन्द्रियेण स्मृत्यादिना वा गन्धोपस्थितौ सुरभिचन्दनमिति चाक्षुषं भवति, तत्र सौरभमानं सौरभज्ञानलक्षणसन्निकर्षेण, एवमन्यत्रापि, युक्तयुञ्जानभेदेन द्विविधस्य योगिनः सर्वपदार्थं ज्ञानं योगाभ्यासजनितधर्मविशेषलक्षणयोगजप्रत्यासत्त्येति, षड्विधेन्द्रियसन्निकर्षजन्यत्वात् प्रत्यक्षमपि षड्विधम्, तत् करणमिन्द्रियं प्रत्यक्षप्रमाणम्, परामर्शद्वाराव्याप्तिज्ञानजन्यं ज्ञानमनुमितिः, यत्र यत्र धूमस्तत्र वह्निरिति साहचर्यनियमो व्याप्तिः, तज्ज्ञानं वह्निव्याप्यो धूमः इति, साध्यव्याप्यहेतोः पक्षेण सह वैशिष्ट्यावगाहि ज्ञानं परामर्शः, यथा वह्निव्याप्यधूमवान् पर्वत इति वह्निव्याप्यधूमः पर्वते इति च ज्ञानं परामर्शः, ततः पक्षोद्देश्यकसाध्यविधेयकज्ञानमनुमितिः, यथा पर्वतोवह्निमानिति पर्वते वह्निरिति वा ज्ञानमनुमितिरिति, व्याप्तिज्ञानस्य प्रत्यक्षरूपत्वात् सहचारदर्शनरूपप्रत्यक्षजन्यत्वाद्वा प्रत्यक्षपूर्वकत्वम्, पूर्ववच्छेषवत् सामान्यतो दृष्टभेदेन चानुमिते स्त्रैविध्यम्, तत्र करणलिङ्गकं पूर्ववत्, कार्यलिङ्गकं शेषवत्, कार्यकारणाभिन्नलिङ्गकं सामान्यतो दृष्टमिति, निरुक्तानुमितिकरणमनुमानम्। प्रत्यक्षस्य निर्विकल्पक-सविकल्पकभेदेन द्वैविध्यम्, तद्भिन्नमनुमित्यादिकं सर्वं सविकल्पकमेवेति । अतिदेशवाक्यार्थस्मृतिद्वारा

सादृश्यज्ञानजन्यं ज्ञानमुपमितिः, यथा गोसदृशो गवय इत्यतिदेशवाक्यं श्रुत्वा वनं गतस्य ग्रामीणस्य गोसदृशं पिण्डं पश्यतोऽयं गोसदृशमिति ज्ञानमुपजायते ततोऽतिदेशवाक्स्मरणं ततो गवयो गवयपदवाच्यइति ज्ञानं भवति तदुपमितिस्तत्करणं गोसदृशोऽयमिति ज्ञानमुपमानम् । पदार्थोपस्थितिद्वारा आप्तोक्तशब्दज्ञानजन्यमन्वयज्ञानं शाब्दबोधः, शक्तिलक्षणान्यतरवृत्तिज्ञानसहकृताच्छब्दज्ञानात् पदार्थोपस्थिति र्भवति, अस्मात् पदादयमर्थो बोद्धव्य इति इदं पदं वा ऽमुमर्थं बोधयत्विवतिवेश्वरसङ्केतः शक्तिः, शक्यसम्बन्धो लक्षणा, तत् प्रतिसन्धानं च तात्पर्यानुपपत्त्याऽन्वयानुपपत्त्या वा भवति, आसत्तिः योग्यताज्ञानमाकाङ्क्षाज्ञानं तात्पर्यज्ञानञ्च शाब्दबोधे कारणं, पदार्थानामविलम्बेनोपस्थिति रासत्तिः, एकपदार्थेपरपदार्थवत्ज्ञानं योग्यताज्ञानं, यत्पदार्थयोरन्वयबोधोऽपेक्षितस्तत्पदयोरव्यवहितपूर्वापरभावज्ञानमाकाङ्क्षाज्ञानम्, इदं पदमेतदर्थबोधेच्छयोच्चरितमितिज्ञानं तात्पर्यज्ञानमिति, निरुक्तसकलकारणसमवधानतो नीलो घट इत्यादिवाक्यात् तादात्म्यसम्बन्धेन नीलप्रकारकघट विशेष्यकज्ञानादिरुपजायते स एव शाब्दबोधः, तत् करणमाप्तोक्त शब्दः प्राचीनमते शब्दप्रमाणं नवीनमते शब्दज्ञानं शब्दप्रमाणमिति। स शब्द तदुपजीविप्रमाणमात्रगम्यार्थकोऽदृष्टार्थकः, अदृष्टार्थकश्च वेद ईश्वरकर्तृकत्वात् पौरषेय एवेति, एवं चत्वारि प्रमाणानीति सिद्धम् । प्रमेयाद्वादशैवत्विति, संसारहेतुमिथ्याज्ञानविषयत्वं मोक्षहेतुधीविषयत्वंवा प्रमेयत्वं, न तु प्रमा विषयत्वं तेन संयोगादीनां प्रमेयत्वेन न ग्रहणं, एतदर्थाधिगत्यर्थमेव तु शब्दस्य-

पुनरर्थकस्यान्वय्यवच्छेदकस्यैवकारस्योपादानम्, आत्म-शरीरे-न्द्रियार्थ-बुद्धि-मनः प्रवृत्ति-दोषप्रेत्यभावफल-दुःखापवर्गभेदेन द्वादश-सङ्ख्यकाः प्रमेयाः न तु तदधिकसङ्ख्यका इत्यर्थः, तत्रात्माजीवे-श्वरभेदेनद्विविधः, तदुभयसाधारणमात्मत्वं ज्ञानवत्त्वंप्रयत्नवत्त्वमि-च्छावत्त्वं वा लक्षणम्, विशिष्य तु जन्यज्ञानादिमत्त्वं जीवस्य, नित्यज्ञानवत्त्वमीश्वरस्यलक्षणं बोध्यम् । तत्र जीवात्माप्रतिशरीरं-भिन्नोविभुर्नित्यश्च, ईश्वरस्तु जगत्कर्त्तैक एव विभुर्नित्यश्च । 'चेष्टे-न्द्रियार्थाश्रयः शरीरम्' इति गौतमीयसूत्राच्चेष्टाश्रयत्वमिन्द्रिया-श्रयात्वमर्थाश्रयत्वञ्च प्रत्येकं शरीरलक्षणम्, अन्त्यावयवित्वे सतीत्तिविशेषणंदेयं तेनशरीरावयवे नातिव्याप्तिः, चेष्टात्वञ्चप्रयत्न-जन्यतावच्छेदकोजाति विशेषः, चक्षुष्मान् देवदत्तोऽयमित्यादि-प्रतीतेरिन्द्रियाश्रयत्वमपि शरीरे, आश्रयत्वञ्च तत्रावच्छेदकताख्य-स्वरूपसम्बन्धविशेषेणेति, अर्थपदेनात्र सुखदुःखान्यतरस्यग्रहणं, अत्राप्याश्रयत्वमवच्छेदकताख्यस्वरूपसम्बन्धेन, तेन सम्बन्धेन सुखाश्रयत्वंदुःखाश्रयत्वञ्च प्रत्येकं लक्षणम्, तच्छून्यखण्डशरीरे-ऽव्याप्तिवारणाय सुखाद्याश्रयवृत्तिद्रव्यत्वव्याप्यव्याप्यजातिमत्त्वं लक्षणंतादृशजातिश्च मानुषत्वचैत्रत्वादिः,कल्पभेदेन नृसिंहशरीरस्य-नानात्वान्नृसिंहत्वजातिमादाय तत्र लक्षणसमन्वयः, शरीरञ्च-पार्थिवजलीयतैजसवायवीयभेदेन चतुर्विधम्, तत्र पार्थिवं योनिज-मयोनिजं च, तत्र योनिजं जरायुजमण्डजं च, जरायुजं मानुषादी-नाम्, अण्डजं सर्पादीनाम्, अयोनिजं स्वेदजोद्भिज्जादिकम्, स्वेदजाः कृमिदंशाद्याः, उद्भिज्जास्तरुगुल्माद्याः, नारकीणां शरीरमप्य-

योनिजम्, जलीयादिशरीराणित्वयोनिजान्येवेति । घ्राणरसनचक्षुस्त्वक्श्रोत्राणि बहिरिन्द्रियाणि भौतिकानि । इन्द्रियत्वं शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनः संयोगाश्रयत्वम्, कर्णशष्कुल्यवच्छिन्नाकाशलक्षणश्रोत्रस्यकर्णशष्कुल्याजन्यत्वादेव जन्यत्वम्, अत्र पृथिव्यापस्तेजोवाय्वाकाशानि पञ्चभूतानि, भूतत्वञ्च बहिरिन्द्रियग्रहणयोग्यविशेषगुणवत्त्वम्, पृथिवीत्वादयश्चत्वारो जाति विशेषाः, गन्ध-शीतोष्णानुष्णाशीतस्पर्शविशेषसमवायिकारणतावच्छेदकतया सिद्धाः, आकाशत्वन्त्वेकव्यक्तिवृत्तित्वान्नजाति, किन्तु शब्दाश्रयत्वम् । सर्वव्यवहारहेतुर्ज्ञानं बुद्धिः, तस्या जानामीत्यनुभवसिद्धज्ञानत्वजतिमत्वं लक्षणम्, बुद्धिः प्रकृतेः परिणामो महत् तत्त्वं तस्या घटाद्याकारपरिणामो ज्ञानं तेन सहकूटस्थनित्यस्यात्मनः सम्बन्ध आरोपित उपलब्धिरिति साङ्ख्यमतप्रतिक्षेपकम् 'बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्' इति सूत्रम्, सुखाद्युपलब्धिसाधनमिन्द्रियं मनः, चक्षुरादिषुविषयसम्बद्धे ष्वपियस्य सम्बन्धादेकं ज्ञानं जनयति यदसम्बन्धादपरं ज्ञानं न जनयति तदेव चाणुनिखिलज्ञानजनकं सुखादिसाक्षात्कारासाधारणकारणं लाघवादेकमेव मनः । तदुक्तम् 'युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्' इति । प्रवृत्ति र्यत्नविशेषः, रागजन्यतावच्छेदकजातिविशेषः प्रवृत्तित्वं तल्लक्षणम्, साच वाग्-बुद्धि-शरीराम्भभेदेन त्रिविधा, तत्र वचनानुकूलो यत्नो वागारम्भः, शरीरगोचरोयत्नश्चेष्टानुकूलो वा शरीरारम्भः, तदुभयभिन्नो यत्नो बुद्धारम्भ इति, रागद्वेषमोहा दोषाः, सविषयलौकिकप्रत्यक्षविषयत्वे सति प्रवृत्तिजनकत्वं दोष-

त्वमितिलक्षणं ज्ञेयम् । प्रेत्यमृत्वाभावो जननं प्रेत्यभाव इति व्युत्पत्त्या पुनरुत्पत्तिः प्रेत्यभावः, अपश्चानादिरपवर्गान्तः, एतज्ज्ञानं वैराग्ये उपयुज्यते । तदीय मरणञ्च तदीयजीवनादृष्टनाशस्तदीय-श्चरमप्राणसंयोगध्वंसस्तदीयप्राणध्वंसो वा, तदीयोत्पत्तिस्तु तदीयविजातीयशरीराद्यप्राणसंयोग इति । रागद्वेषमोहात्मकदोष-जन्यधर्माधर्मात्मकप्रवृत्तिजन्यसुखदुःखान्यतर साक्षात्कारो मुख्यं फलम्, तच्च देहेन्द्रियबुद्धिषु सतीषु भवतीति देहेन्द्रियादिकं गौणं फलं, प्रवृत्तिदोषजनितत्वादत्र निर्वेदः ।

बाधनालक्षणं दुःखं, बाधनापीडातदेवलक्षणं स्वरूपं यस्येति व्युत्पत्तिः, अनभवसिद्धदुःखत्वजातिमत्त्व तस्य लक्षणम्, शरीरे-न्द्रियार्थेषु दुःखसाधनत्वात् सुखे च दुखानुषङ्गाद् दुःखव्यवहारो गौणः । दुःखात्यन्तविमोक्षोऽपवर्गः । दुःखात्यन्तविमोक्षो नाम स्वसमानाधिकरणदुःखासमानकालीनोदुःखध्वंस इति । सिद्धं प्रमेया-द्वादशैवत्विति । संशयोहेतुभेदेन भिन्न इति, एकस्मिन् धर्मिणि विरोधेन भावाभावप्रकारकं विरुद्धनानाधर्मप्रकारकं वा ज्ञानं संशयः, सच स्वरूपतोऽभिन्नोऽपिहेतुभेदेन कारणभेदेन भिन्नः, एको-विरुद्धकोटिद्वयसहचरितधर्मलक्षणसाधारणधर्मवद्धर्मिज्ञानजन्यः, द्वितीयो विरुद्धकोटिद्वयासहचरितधर्मलक्षणासाधारणधर्मवद्धर्मि-ज्ञानजन्यः, संशयः परोक्षो न भवति अनुमानादीनां निर्णयैकजनक-त्वस्वाभाव्यादिति विप्रतिपत्तिवाक्यात् कोटिद्वयोपस्थित्यामानस एव संशयः, एवं ज्ञाने प्रामाण्यसंशयाद्विषयसंशयः, ज्ञानेऽप्रमाण्य-संशयाद्विषयसंशयः, व्याप्यसन्देहाद् व्यापकसंशय इति विशेष-

दर्शने सति संशयो न भवतीति सिशेषादर्शनमपि संशयकारणम्, तदिदमभिप्रेत्येदं सूत्रम्—

"समानानेकविधधर्मोपपत्ते र्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्चविशेषापेक्षोविमर्शः संशयः' इति । द्वेधा प्रयोजनमिति 'यमर्थमधिकृत्यप्रवर्त्तते तत् प्रयोजनमिति सूत्रानुसारेणप्रवृत्तिहेत्विच्छाविषयत्वं मुख्यप्रजोजनत्वं तद्वत्त्वात् सुखं दुःखाभावश्च मुख्यप्रयोजनम् अन्येच्छाधीनेच्छाविषयत्वं गौणप्रयोजत्वं तद्वत्त्वात् सुखदुःखाभावोगौणप्रयोजनम् । द्विधा दृष्टान्त आदिष्ट इति, वादिप्रतिवादिनोः साध्यसाधनोभयप्रकारक–तदभावद्वयप्रकारकान्यतरनिश्चयविषयो दृष्टान्तः, स द्विधा साधर्म्यदृष्टान्तोवैधर्म्यदृष्टान्तश्च, तत्र वादिप्रतिवादिनोः साध्यसाधनोभयप्रकारकनिश्चयविषयः साधर्म्यदृष्टान्तः यथा पर्वतोवह्निमान् धूमादित्यादौ महानसम्, वादिप्रतिवादिनोः साध्याभाव-साधनाभावोभयप्रकारकनिश्चयविषयोवैधर्म्य दृष्टान्तः, यथा तत्रैवह्लदः, इति नैयायिकैरादिष्ट उक्तः । सिद्धान्ताःस्युश्चतुर्विधाः इति शास्त्रितार्थनिश्चयत्वंसिद्धान्तसामान्यलक्षणं, भाष्ये अभ्युपगम्यमानोऽर्थः सिद्धान्त इति, वार्त्तिकतात्पर्यटीकायां अभ्युपगमः सिद्धान्त इति, तयो र्विरोधापहारकमुदयनाचार्यवचनं यथा 'अर्थाभ्युपगमो गुणप्रधानभावस्य विवक्षातन्त्रत्वादर्थाभ्युपगमोऽभ्युपगम्यमानो वाऽर्थस्सिद्धान्तः' इति, व्यक्त्यभिप्रायेण सिद्धान्ता इति बहुवचनम्, ते सर्वतन्त्र-परतन्त्राधिकरणा-भ्युपगमसिद्धान्तभेदेन चतुर्विधाः स्युः चतुःप्रकाराःस्युः । तत्र सर्वतन्त्राविरुद्धतन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः । समानतन्त्रसिद्ध इत्यस्य स्वतन्त्रसिद्ध इत्यर्थः ।

"यत् सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः" इति अधिकरणसिद्धान्तस्वरूपावेदकं सूत्रमित्थं व्याख्यातं वृत्तिकृता- 'यस्यार्थस्यसिद्धौ जायमानायामेवान्यस्य प्रकरणस्य प्रस्तुतस्य सिद्धिर्भवति सोऽधिकरणसिद्धान्त इत्यर्थः, यथा तद् द्व्यणुकादिकं पक्षी कृत्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वे साध्यमाः सर्वज्ञत्वमीशस्य, एवं हेतुबलादपि यथा दर्शन-स्पर्शनाभ्यामेकार्थ- ग्रहणादिन्द्रियादिव्यतिरिक्त आत्मनि साधिते इन्द्रियनानात्वम्, तथा च यदर्थसिद्धिं विना योऽर्थः शब्दादनुमानाद् वा न सिध्यति सोऽधिकरणसिद्धान्तः' इत्यादि ।

साक्षादसूत्रिताभ्युपगमोऽभ्युपगमसिद्धान्तः, यथा मनस इन्द्रि- यत्वमिति । अवयवाः पञ्चेति, प्रतिज्ञाद्यन्यतमत्वमवयव सामान्य- लक्षणम्, उक्तलक्षणलक्षिता अवयवाः प्रतिज्ञाहेतूदाहरणोपनय- निगमनवारणाय न्यायानन्तर्गततादृशवाक्यवारणाय च न्यायान्त- र्गतत्वे सति प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकप्रकृतसाध्यता- वच्छेदकावच्छिन्नसाध्यविषयताविलक्षणविषयताकबोधाजनकत्वे सति प्रकृतपक्षे प्रकृतसाध्यबोधजनकवाक्यत्वं प्रतिज्ञात्वम्, यथा पर्वतो वह्निमानिति प्रतिज्ञा । साध्यसाधनं तृतीयान्तं पञ्चम्यन्तं वा हेतुवाक्यं हेतुः, तस्य साध्यतावच्छेदकावच्छिन्न साध्यान्वित- ज्ञापकत्वबोधकोऽवयवोहेतुरित्यत्र पर्यवसानं, सचोदाहरणसाधर्म्यत द्वैधर्म्य-तद्द्वयतस्त्रिधा, तत्र ज्ञातान्वयव्याप्तिमात्रकहेतुबोधको हेत्ववयवः प्रथमः, ज्ञातव्यतिरेकव्याप्तिमात्रकहेतुबोधको हेत्ववयवो द्वितीयः, ज्ञातान्वयव्यतिरेकव्याप्तिकहेत्ववयवस्तृतीयः, घटादौ

प्रमेयत्वादिसाधने वाच्यत्वादित्यादिः प्रथमः, पृथिव्यामितरभेद-साधने गन्धवत्त्वादित्यादि द्वितीयः, पर्वतादौ वह्न्यादि साधने धूमादित्यादि स्तृतीय इति । दृष्टान्तकथनयोग्यावयव उदाहरणम्, अवयवान्तरार्थानन्वितार्थकावयवत्वञ्च योग्यतावच्छेदकम्, तच्च साधर्म्यवैधर्म्याभ्यां द्विधा, तत्र साध्यसाधनव्याप्त्युपदर्शकमुदाहरणं साधर्म्योदाहरणम् यथा यो यो धूमवान् स वह्निमान् यथा महानसम् इति, साध्यसाधनव्यतिरेकव्याप्त्युपदर्शकमुदाहरणं वैधर्म्योदाहरणम् यथा यो न वह्निमान् स न धूमवान् यथाह्रद इति । प्रकृतोदाहरणो-पदर्शितान्वय-व्यतिरेक व्याप्त्यन्यतरविशिष्टहेतुविशिष्टपक्षविषयक-बोधजनकोऽवयव उपनयः, सचान्वयि-व्यतिरेकिभेदाद् द्विविधा, तथाचायमित्युपसंहारः प्रथमः, न तथेत्युपसंहारोः द्वितीयः, प्रथमस्य वह्निव्याप्य धूमवाँश्चायं पर्वत इत्यर्थः, द्वितीयस्य वह्न्यभावव्या-पकीभूताभावप्रतियोगिधूमवाँश्चायं पर्वत इत्यर्थः । हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् व्याप्तिविशिष्ट पक्षधर्महेतुकथन-पूर्वकसाध्यविशष्टपक्षप्रदर्शकः, व्याप्तपक्षधर्महेतुज्ञाप्यसाध्यविशिष्ट-पक्षबोधको वा न्यायावयवो निगमनम् तस्य तस्मात् तथेत्युपन्यासः वह्निव्याप्यधूमवत्त्वात् पर्वतो वह्निमानिति तदर्थः : पञ्चेति कथनाद् दशावयवादव्युदासः, तस्मिन् वादे, प्रतिज्ञादिपञ्चकसहिताः प्रयोजन-जिज्ञासा-संशय-शक्यप्राप्ति-संशयव्युदासाः पञ्चदर्शिताः, तत्र प्रयोजनं हानादिबुध्दयः, तत् प्रवर्त्तिका जिज्ञासा, तज्जनकः संशयः शक्य प्राप्तिः प्रमाणानां ज्ञानजननसामर्थ्यं, संशयव्युदास-स्तर्क इति, एतेषां न्यायाघटकत्वान्न न्यायावयवत्वमिति बोध्यम् ।

ऊहस्तु तर्कः पञ्चविधः स्मृत इति, यः खलु व्यापकाभाववत्तया निर्णीते धर्मिणि व्याप्यारोपेण व्यापकारोपात्मक ऊह सः तर्कः, अथवा ऊहत्वं मानसत्वव्याप्यजातिविशेषस्तर्कयामीत्यनुभवसिद्धः, तदेव तर्कस्य लक्षणम्, यथा पर्वतो यदि निर्वह्निः स्यान्निर्धूमः स्यादिति, अत्र निर्धूमत्वं निर्वह्नित्वव्यापकं तदभावो धूमस्तद् वत् तया निश्चिते पर्वते निर्वह्नित्वारोपान्निर्धूमत्वारोप इति। अयञ्च तर्कोविषयपरिशोधकः, क्वचिद् वह्निविनाऽपिधूमो भविष्यतीति व्यभिचारशङ्कानिवर्त्तकस्तु धूमो यदि वह्निव्यभिचारीस्याद वह्निजन्यो न स्यादित्येवं न रूपस्तर्कः,। अस्यैव व्यभिचारशङ्का निवर्त्तकत्वेन व्याप्तिग्रहेऽपेक्षा, यत्र तु व्यभिचारशङ्का नोदेति न तत्र तर्कापेक्षेति, स चायं आत्माश्रयान्योन्याश्रयचक्रकानवस्था तदन्यबाधितार्थप्रसङ्गभेदेन पञ्चविधः पञ्चप्रकारः स्मृतः, तत्र स्वस्य स्वापेक्षित्वेऽनिष्टप्रसङ्ग आत्माश्रयः, स चोत्पत्ति स्थितिज्ञप्तिद्वारा त्रेधा, यथा यद्ययं घट एतद् घटवृत्तिः स्यात् तदेतद् घटानधिकरण क्षणोत्तरवर्त्ती न स्यात्, यद्ययं घट एतद्घटवृत्तिः स्यादेतद् घटव्याप्यो न स्यात्, यद्ययं घट एतद् घटज्ञानाभिन्नः स्यात् ज्ञान सामग्रीजन्यः स्यात्, एतद् घटभिन्नः स्यादिति वा सर्वत्रापाद्यम्, तदपेक्ष्यापेक्षित्वनिबन्धनोऽनिष्टप्रसङ्गोऽन्योन्याश्रयः, सोऽपि पूर्ववत् त्रैविध्यम्। अव्यवस्थितपरम्परारोपाधीनानीष्टप्रसङ्गोऽनवस्था, यदि घटत्वं घटजन्यत्वव्याप्यंस्यात्कपालसमवेतत्वव्याप्यं न स्यादिति, तदन्य बाधितार्थ प्रसङ्गस्तु धूमो यदि वह्निव्यभीचारीस्याद् वह्निजन्यो न स्यादित्यादिः। प्रथमोपस्थितत्वोत्सर्गविनिगमनाविरहलाघवगौरवादिकन्तु प्रसङ्गानात्मकत्वान्न तर्कः, किन्तु

प्रमाणसहकारित्वरूपसाधर्म्यात् तथा व्यवहार इति । निर्णय इति, 'विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः' इति सूत्रात् साधनोपालम्भाभ्यां सन्दिह्यार्थस्यावधारणं तदभावाप्रकारकं तत् प्रकारक ज्ञानं निर्णय इति निर्णयलक्षणं यद्यपि लभ्यते तथापि तदभावाप्रकारकं ज्ञानं निर्णय इत्यर्थकमर्थावधारणं निर्णय इत्येव लक्ष्य लक्षणप्रतिपादकं वचनम्, विमृश्येत्यादिकं तु जल्पवितण्डास्थली यनिर्णयमधिकृत्य, तदुक्तं भाष्ये शास्त्रे वादे च विमर्शवर्जमिति ।

वादजल्पाभ्यां वितण्डेति कथा त्रयमिति वादो जल्पो वितण्डा चेति कथा त्रयं त्रिविधा कथेत्यर्थः, तत्र वादः "प्रमाणतर्कसाधनो·पालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो-वादः' इति सूत्रलक्षितः, पक्षप्रतिपक्षौविप्रतिपत्तिकोटी, प्रमाणतर्क-साधनोपालम्भः इत्यस्य प्रमाणतर्करूपप्रकारकानाहार्यज्ञानविषय-करणकसाधनदूषणकरम्बित इत्यर्थः एतच्च जल्पविशेषातिव्याप्ति-वारकं, सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः इति विशेषणद्वयञ्च वादे निग्रहस्थानविशेषनियमार्थम् तथा च प्रमाणत्वतर्कत्वप्रकारकाना-हार्यज्ञानविषयकरणकसाधनदूषणकरम्बितत्वे सति सिद्धान्ता-विरुद्धत्वे सति पञ्चावयवोपपन्नत्वे सति विप्रतिपत्तिकोटिसाधनो-द्दश्यकोक्तिप्रत्युक्तिरूपवचनसन्दर्भत्वं वादत्वमिति पर्यवसितम्, अत्र तत्त्वबुभुत्सवः प्रकृतोक्तिका अपिप्रलम्भका यथा कालस्फूर्तिका नाक्षेपका युक्तिसिद्धप्रत्येतारोऽधिकारिणः, अनुविधेयस्थेयसभ्य पुरुषवती जनतासभा वीतरागकथत्वेन वादे नावश्यकी अनुविधेयो राजादिः, स्थेयान् मध्यस्थः ॥

'यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः' इति सूत्रलक्षितो जल्पः, यथोक्तोपपन्न इत्यत्र यथोक्तेषु यदुपपन्न तेनोपपन्न इति मध्यमपदलोपीसमासः, प्रमाणतर्कत्वप्रकारकज्ञान-विषयकरणकसाधनोपालम्भवत्त्वे सति पञ्चावयवोपपन्नत्वे सति छलजातिनिग्रहस्थानकरणकसाधनोपाम्भयोग्यो विप्रतिपत्तिकोटि साधनबाधनपरवचनसन्दर्भत्वं जल्पत्वमिति, एतेन उभयपक्षस्था-पनावती विजिगीषुकथाजल्पइतिलक्षणमपि ज्ञापितं भवति, अत्र चायं क्रमः—

वादिना स्वपक्षसाधनं प्रयुज्य नायं हेत्वाभासस्तल्लक्षणायोगा-दिति सामान्यतो नायमसिद्ध इत्यादि विशेषतो वा, प्रतिवादिना स्यस्याज्ञानादि निरासाय परोक्तसम्भवादेव लाभे उच्यमान ग्राह्या-णामप्राप्तकालार्थान्तरनिरर्थकानामलाभे उक्तग्राह्याणां प्रतिज्ञाहानि प्रतिज्ञान्तर–प्रतिज्ञाविरोध-प्रतिज्ञासन्न्यास-हेत्वन्तराविज्ञातार्थ-विक्षेप-मतानुज्ञा-न्यूनाधिक-पुनरुक्त-निरनुयोज्यानुयोगापसिद्धान्ता-नामलाभे पर्यनुयोज्योपेक्षणस्य मध्यस्थोद्भाव्यत्वादेवानुपन्यासाहं-तया यथासम्भव हेत्वाभासेन परोक्तं दूषयित्वा स्वपक्ष उपन्यसनोयः ततो वादीना तृतीयकक्षाश्रितेन परोक्तमनुद्यस्वपक्षदूषणमुद्धृत्या-नुक्तिग्राह्योच्यमानग्राह्यहेत्वाभासातिरिक्तोक्तग्राह्याणामलाभे हेत्वा-भासे न यथासम्भवं प्रतिपक्षवादिनः स्थापना दूषणीया, अन्यथा क्रमविपर्यासे अप्राप्तकालम्, अनवसरे दूषणोद्भावने च निरनु-योज्यानुयोगः, यथा त्यक्षसि चेत् प्रतिज्ञाहानिः, विशेषयसिचेद्धे-त्वन्तरमित्यादि, प्रतिज्ञाहान्यादिवद्धेत्वाभासानामुक्तग्राह्यत्वा-

विशेषेऽप्यर्थदोषत्वेनाप्रधानत्वाच्चरममनुसन्धानमिति वृत्तिकृतः। 'स प्रतिपक्षस्थापनाहीनावितण्डा' इति सूत्रलक्षिता वितण्डा। अत्र तच्छब्देन जल्पैकदेशो विजिगीषुकथेति परामृष्यते न जल्पस्तस्य स्थापनाद्वयवत्त्वे न प्रतिपक्षस्थापनाहीनात्वासम्भवात्, तथा च प्रतिपक्षस्थापनाहीनाविजिगीषुकथावितण्डेति पर्यवसितम्, स्वपक्ष-साधनाभावेऽपि परपक्षखण्डने न जयस्यैवोद्देश्यत्वादत्र प्रवृत्त्युपपत्तिः, अथवा परपक्षखण्डनेनैव स्वपक्षसिद्धेरर्थादेवसिद्धिरिति तस्य साधनाभावेऽपि न प्रवृत्त्यनुपपत्तिरिति।

हेत्वाभासाः पञ्चज्ञेया इति, पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वा-बाधितत्वासत्प्रतिपक्षत्वैतत्पञ्चरूपोपपन्नो हेतुर्गमको भवति, ये च पञ्चरूपोपपन्नो न भवन्ति अथापि हेतुवद्भासन्ते ते हेत्वाभासाः अर्थात् पञ्चरूपोपपन्नत्वाभावेसति तद्रूपेण भासमानत्वं हेत्वाभासत्वं दुष्टहेतुत्वमिति, हेतुवदाभासन्ते यैस्ते हेत्वाभासा इति व्युत्पत्त्या दोषा अपिहेत्वाभासाः, तेषांलक्षणन्तु अनाहार्याप्रामाण्यज्ञानान-स्कन्दितनिश्चयवृत्तित्वविशिष्ट यद्रूपावच्छिन्नविषयताव्यापिका भवति प्रकृतानुमितिस्तत् करणान्यतरप्रतिबन्धकता, प्रकृतपक्ष-तावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकाव-च्छिन्नप्रकारताकत्वे सति प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यनि-रूपितव्याप्तिविशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपित प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यताकानुमितित्व व्यापकप्रति-बध्यतानिरूपितप्रतिबन्धकता वा, तद्रूपवत्त्वं दोषत्वम्, स्वज्ञान-विषयप्रकृतहेतुतावच्छेदकवत्त्वसम्बन्धेन तद्रूपविशिष्टवत्त्वंदुष्टत्व-

मितिपर्यवसितम्, दोषस्वरूपा च हेत्वाभासा व्यभिचार-विरोधा-सिद्धि सत्प्रतिपक्षबाधभेदेन पञ्चप्रकाराः दुष्टहेतवोऽपि स व्यभि-भिचार-विरुद्धासिद्धसत्प्रतिपक्षबाधितभेदेन पञ्चप्रकाराज्ञेयाः, 'सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकालाहेत्वाभासाः' इति सूत्रेण दुष्टहेतूनामेव विभजनम् अत्र प्रकरणसमः सत्प्रतिपक्षः, साध्य समोऽसिद्धः, अतीतकालो बाधित इति। तत्र व्यभिचारोऽनेकान्तः, अनैकान्तिकः सव्यभिचारः, व्यभिचारस्य व्याप्तिज्ञान-प्रतिबन्धकज्ञानविषयत्वं लक्षणम्, साधारण्यासाधारण्यानुपसंहार-भेदेन व्यभिचारस्यत्रैविध्यात् सव्यभिचारोऽपि साधारणासाधा-णानुपसंहारिभेदेन त्रिविधः, तत्र सपक्षविपक्षवृत्तिः साधारणा-नैकान्तिकः, सपक्षो निश्चितसाध्यवान्, विपक्षो निश्चितसाध्या-भाववान्, यथा शब्दो नित्यो निःस्पर्शत्वादित्यादौ निःस्पर्शत्वहेतुः, तस्य सपक्षे आकाशादौ विपक्षे च रूपादौ वृत्तेः, विरुद्धातिव्याप्ति-वारणायैवात्र सपक्षवृत्तित्वं निवेशितं, साध्यवदन्यवृत्तित्वं साध्या-भाववद्वृत्तित्वमेव वा व्याप्तिज्ञानप्रतिबन्धकज्ञानविषयत्वाद् व्यभिचारः, वस्तुतोविरुद्धगतत्वेऽपि न क्षतिः उपधेयसङ्करेऽप्युपाधे-रसाङ्कर्यात्, सपक्षविपक्षव्यावृत्तोऽसाधारणानैकान्तिकः यथा शब्दो नित्यः शब्दत्वादित्यादौ शब्दत्वहेतुः। असाधारण्यस्य साध्य-समानाधिकरण्यविरोधित्वेन साध्यसामानाधिकरण्यघटितव्याप्ति-ज्ञानप्रतिबन्धकज्ञानविषयत्वे न दूषणत्वम्। अनुपसंहारी च केवलान्वयिधर्मावच्छिन्नपक्षकः, यथा सर्वं नित्यं प्रमेयत्वादित्यादि, अत्र च पक्षतातिरिक्तसाध्यसहचारग्रहस्थलाभावात् पक्षे च साध्यसन्देहाद् व्याप्तिग्रहो न भवतीति,

নব্যমতে সাধ্যবদবৃত্তিত্বমসাধারণ্যং তস্য সাধ্যনিশ্চয়াঘটিতত্বেন নিত্যদোষত্বং, ন তু প্রাচীনমত ইবানিত্যদোষত্বম্, *অনুপসংহারী চ কেবলান্বয়ি সাধ্যকঃ, তস্যাত্যন্তাভাবাপ্রতিযোগি*-সাধ্যকত্বরূপস্য জ্ঞানাদ্ ব্যতিরেকব্যাপ্তিগ্রহপ্রতিবন্ধো দূষকতাবীজমিতি। সাধ্যাভাবব্যাপ্তো হেতুর্বিরুদ্ধঃ, যথা বহ্নিমান্ হ্রদত্বাদিত্যাদৌ, এতস্য সাধ্যাভাবানুমিতি সামগ্রীত্বেন সাধ্যানুমিতি প্রতিবন্ধো দূষকতাবীজম্, পক্ষধর্মিকহেতুমত্তা নিশ্চয়বিশিষ্টহেতুধর্মিকসাধ্যাভাবনিশ্চয়ত্বেন পক্ষধর্মিকসাধ্যবত্তাবুদ্ধিপ্রতি প্রতিবন্ধকত্বম্। ন চ সৎপ্রতিপক্ষাবিশেষঃ, তত্র হেত্বন্তরং সাধ্যাভাবসাধকম্ ইহ তু হেতুরেব সাধ্যাভাবসাধকঃ সাধ্যসাধকত্বেন ত্বয়োপন্যস্ত ইত্যশক্তি বিশেষোন্নায়কত্বেন বিশেষাদিতি।

সৎপ্রতিপক্ষস্তু সাধ্যাভাবব্যাপ্যবান্ পক্ষঃ, এতস্যানুমিতিপ্রতিবন্ধো দূষকতাবীজম্, যথা হ্রদো বহ্নিমান্ ধূমাদিত্যাদৌ বহ্ন্যভাবব্যাপ্যজলবান্ হ্রদো দোষঃ, একজ্ঞানবিষয়ত্বসম্বন্ধেন তদ্বত্ত্বাদ্ ধূমস্য দুষ্টত্বমিতি নব্যমতম্, প্রাচীনমতে তু স্বসাধ্যবিরুদ্ধসাধ্যাভাবব্যাপ্যপ্রতিহেতুত্তাপরামর্শকালীন সাধ্যব্যাপ্যবত্তাপরামর্শ বিষয়ঃ প্রকৃত হেতুঃ সৎ প্রতিপক্ষ ইতি, এতন্মতে পরস্পরপ্রতিবন্ধাদুভয়ানুমিতিপ্রতিবন্ধঃ ফলম্।

"সাধ্যাবিশিষ্টঃ সাধ্যত্বাৎসাধ্যসমঃ" ইতি সূত্রলক্ষিতোঽসিদ্ধঃ, সাধ্যেন বহ্নিনাঽবিশিষ্টঃ সাধ্যত্বাৎ তথা সাধ্যং সাধনীয়ং তথা হেতুরপি চেৎসাধ্যসমইত্যুচ্যতে, অত এবাসিদ্ধ ইতি ব্যবহ্রিয়তে ইতি সূত্রার্থঃ, অয়ঞ্চাশ্রয়াসিদ্ধ-স্বরূপাসিদ্ধ-ব্যাপ্যত্বাসিদ্ধভেদাৎ

त्रिविधः, आश्रयासिद्धि-स्वरूपासिद्धि-व्याप्यत्वासिद्धयश्च दोषाः, तत्र पक्षतावच्छेदकाभाववान् पक्ष आश्रयासिद्धिः, यथा काञ्चनमयपर्वतो वह्निमान् धूमादित्यादौ काञ्चनमयत्वाभाववान् पर्वतः, अयञ्चानुमितिपरामर्शयोः प्रतिबन्धकः। हेतुतावच्छेदकावच्छिन्नाभाववान् पक्षः स्वरूपासिद्धिः, यथा ह्रदो द्रव्यं धूमादित्यादौ, अयं च परामर्शप्रतिबन्धकः। साध्ये साध्यतावच्छेदकाभावः साधने साधनतावच्छेदकाभावश्च व्याप्यत्वासिद्धिः, तत्र प्रथमः पर्वतः काञ्चनमयवह्निमानित्यादौ काञ्चनमयत्वाभाववान् वह्निः, अयञ्चानुमिति परामर्शयोः प्रतिबन्धकः, द्वितीयश्च पर्वतो वह्निमान् काञ्चनमयधूमादित्यादौ काञ्चनमयत्वाभावान् धूमः, अयञ्च परामर्श प्रतिबन्धकः। साधनतावच्छेदके व्याप्यतानवच्छेदकत्वमपि व्याप्यत्वासिद्धिः, यथा पर्वतो वह्निमान् नीलधूमादित्यादौ नीलधूमत्वं गुरुतया न साध्यसम्बन्धितावच्छेदकमिति, आश्रयासिद्ध्याद्यन्यतमत्वञ्चासिद्धिसामान्यलक्षणमिति बोध्यम्।

"कालात्ययापदिष्टः कालातीतः" इति सूत्रलक्षितो बाधितः, कालात्यये साधनकालात्यये पक्षे साध्याभाव प्रमाकाले इति यावत् अपदिष्टः प्रयुक्तो हेतुः कालातीत इत्युच्यते, कालातीत एव बाधित इति कथ्यते, साध्याभाववान् पक्षो बाधः, यथा वह्निरनुष्णः कृतकत्वादित्यादौ, 'न च बाधे पक्षे हेतुसत्त्वे व्यभिचारः, पक्षे हेत्वभावे स्वरूपासिद्धिरितिव्यभिचारस्वरूपा सिद्ध्यन्तरस्यैव दोषत्वमिति वाच्यं तदप्रतिसन्धानेन बाधस्य दोषत्वावश्यकत्वात्, उपधेयसङ्करेऽप्युपाधेरसङ्करात्, उत्पत्तिकालावच्छिन्नो घटो

गन्धवानित्यादौ साध्याभाववत्पक्षतावच्छेदकावच्छिन्न पक्षरूप-बाधस्यैवसत्त्वाद् बाधस्यानुमिति प्रतिबन्धः फलं, व्यभिचारस्वरूपासिद्ध्योः परामर्श प्रतिबन्ध इत्येवं कार्यभेदाच्च ॥

छलं च त्रिविधं मतमिति, वक्तृतात्पर्याविषयार्थकल्पनेन दूषणाभिधानं छलम्, वक्तृतात्पर्याविषयत्वं विशेष्ये विशेषणे संसर्गे वा, यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्यत्र नवसङ्ख्या परत्वकल्पनयाऽसिद्ध्यभिधानम्, प्रमेयं धर्मत्वादित्यत्र पुण्यत्वार्थ-कल्पनया भागासिद्ध्यभिधानम्, वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानम् । वाक् छल-सामान्यछलोपचारछलभेदेन त्रिविधं, नैयायिकैरभिमतमित्यर्थः, तत्र शक्त्यैकार्थशाब्दबोधता-त्पर्यकशब्दस्य शक्त्याऽर्थान्तरतात्पर्यकल्पनया दूषणाभिधानं वाक्छलम्, यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्युक्ते कुतोऽस्य नवसङ्ख्यकाः कम्बला इति, एवं गौर्विषाणीत्युक्ते कुतो गजस्य शृङ्गम्, श्वेतो धावतीति श्वेतरूपवदभि प्रायेणोक्ते श्वेतो न धावती-त्यभिधानमित्यादिकं ज्ञेयम् । सामान्यविशिष्टसम्भवदर्थाभिप्राये-णोक्तस्यातिसामान्ययोगादसम्भवदर्थकत्वकल्पनया दूषणाभिधानं सामान्यच्छलम्, यथा ब्राह्मणोऽयं विद्याचरणसम्पन्न इत्युक्ते ब्राह्मणत्वेन विद्याचरणसम्पद् साधयतीति कल्पयित्वा परो वदति कुतो ब्राह्मणत्वेन विद्याचरणसम्पद् बाल्ये व्यभिचारादिति ।

शक्तिलक्षणयोरेकतरवृत्त्याप्रयुक्ते शब्दे तदपरवृत्त्या यः प्रतिषेधः स उपचारछलम्, यथा मञ्चाः क्रोशन्ति नीलो घट इत्यादौ मञ्चस्था एव क्रोशन्ति न तु मञ्चाः, एवं घटस्य कथं

नीलरूपाभेदः, एवम् अहं नित्य इति शक्त्या प्रयुक्ते अमुकस्मा-दुत्पन्नस्त्वं कथं नित्य इति प्रतिषेधोऽप्युपचारच्छलम्, वाद्यभिप्रेतार्थ-स्यादूषणेन छलस्यासदुत्तरत्वम् । न च श्लिष्टलाक्षणिकप्रयोगाद् वादिन एवापराध इति वाच्यं, तत् तदर्थबोधकतया प्रसिद्धस्य शब्दस्य प्रयोगे वादिनोऽनपराधात्, अन्यथा पर्वतोवह्निमानित्युक्ते पर्वतोऽयंकथमवह्निमानित्यादिदूषणेनानुमाद्युच्छेदः स्यादिति । चतुर्विंशतिभेदाःस्युर्जातय इति ।

" साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः " इति सूत्रोक्तं लक्षणं साधर्म्यमात्रेण वैधर्म्यमात्रेण वा दुषणाभिधानेऽव्याप्तमिति छलादिभिन्नदूषणासमर्थमुत्तरं स्वव्याघातकमुत्तरं वा जातिरिति-लक्षण एव सूत्रस्य तात्पर्यम्, व्यक्त्याऽनेकत्वाज्जातय इति बहुवचनम्,

"साधर्म्य-वैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्ति-प्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्याविशेषोपपत्त्यु-पलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः " इति सूत्र दर्शित चतुर्विं-शतिप्रकारा जातयः स्युरित्यर्थः, सूत्रेऽन्तस्थितसमाशब्देन सहप्रत्येकं-साधर्म्यादिशब्दानामन्वयात् साधर्म्यसमावैधर्म्यसमेत्यादिरीत्या-चतुर्विंशतिसंख्यका जातयो ज्ञातव्याः, तत्र साधर्म्येण प्रत्यवस्थानं साधर्म्यसमा, यथा अनित्यः शब्दः कृतकत्वाद् घटवदिति प्रयोगे कृते साधर्म्यप्रयोगेणैव प्रत्यवस्थानं नित्यः शब्दो निरवयवत्वादा-काशवदिति, विशेषहेत्वभावश्चात्र निमित्तमेवमग्रेऽपि ।

वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमा, अनित्यः शब्दः कृतकत्वाद् घटवदित्यत्रैव प्रयोगे स एव हेतु वैधर्म्येण प्रयुज्यते नित्यः शब्दो-

निरवयवत्वात्, अनित्यं हि सावयवं दृष्टं घटादि, उत्कर्षापकर्षाभ्यां प्रत्यवस्थानमुत्कर्षापकर्षसमे जाती। तत्रैव प्रयोगे यदि घटवत् कृतकत्वादनित्यः शब्दो घटवदेव मूर्त्तोऽपि भवेदिति शब्दे धर्मान्तरोत्कर्षमापादयति। अपकर्षस्तु घटः कृतकःसन्न श्रावणो दृष्ट एवं शब्दोऽपि स्यादिति श्रावणधर्ममपकर्षति।

वर्ण्यावर्ण्याभ्यां प्रत्यवस्थानं वर्ण्यावर्ण्यसमे जाती। वर्ण्यावर्ण्यौ-साध्यदृष्टान्तधर्मौविपर्यस्यन् वर्ण्यावर्ण्यसमे प्रयुङ्क्ते, 'यथाविधः कृतकत्वादिः शब्दधर्मो न तादृग् घट धर्मः, यादृग् घट धर्मो न तादृग् शब्दधर्म इति, साध्यदृष्टान्तधर्मौ तुल्यौ कर्त्तव्यौ, अत्र तु विपर्यासः, घटस्य ह्यन्यादृशं कुम्भकारादिजन्यं कृतकत्वं,शब्दस्य हि ताल्वोष्ठादिव्यापारजन्यमिति। धर्मान्तरविकल्पनेन प्रत्यवस्थानं विकल्पसमाजातिः, यथा कृतकं किञ्चिदनित्यं भविष्यति घटादि, किञ्चिन्नित्यं शब्दादीति, साध्यसाम्यापादनेन प्रत्यवस्थानं साध्यसमाजातिः, यथा कृतको यदि यथा घटस्तथा शब्दः प्राप्तः तर्हि यथा शब्द स्तथा घट इति शब्दश्च साध्य इति घटोऽपि साध्यो भवेत्, ततश्च न साध्यः साध्यस्य दृष्टान्तः स्यात्, न चेदेवं, तथापि वैलक्षण्यात् सुतरामदृष्टान्त इति। प्राप्त्यप्राप्तिविकल्पाभ्यां प्रत्यवस्थानं प्राप्त्यप्राप्तिसमे जातो। यथा यदेतत्कृतकत्वं त्वया साधनमुपन्यस्तं तत् किं प्राप्य साधयति अप्राप्य वा, प्राप्य चेत् द्वयो र्विद्यमानयो रेव प्राप्तिर्भवति न सदसतोरिति द्वयोश्च सत्त्वात् किं कस्य साध्यं साधनं वा, अप्राप्य तु साधनत्वमयुक्तमतिप्रसङ्गादिति। अतिप्रसङ्गापादनेन प्रत्यवस्थानं प्रसङ्गसमाजातिः, यथा

यद्यनित्यत्वे कृतकत्वं साधनं, कृतकत्वे इदानीं किं साधनं, तत् साधने किं साधनमिति । प्रतिदृष्टान्तेन प्रत्यवस्थानं प्रतिदृष्टान्त-समाजातिः, यथाऽनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदित्युक्ते जातिवाद्याह—

यथा घटः प्रयत्नानन्तरीयकोऽनित्यो दृष्टः एवमाकाशं नित्य-मपि प्रयत्नानन्तरीयकं दृष्टम्, कूपखननप्रयत्नानन्तरमुपलम्भा-दिति, न चेदमनैकान्तिकत्वोद्भावनम्, भङ्ग्यन्तरेण प्रत्यवस्थाना-दिति । अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमाजातिः यथा अनुत्पन्ने शब्दाख्ये धर्मिणि कृतकत्वं धर्मः क्व वर्त्तते, तदेवं हेत्वाभावाद-सिद्धिरनित्यत्वस्येति । साधर्म्यसमा वैधर्म्यसमा वा या जातिः पूर्व-मुदाहृता सैव संशयेनोपसंह्रियमाणा संशयसमा जाति र्भवति, यथा किंघटसाधर्म्यात् कृतकत्वादनित्यः शब्दः उत तद्वैधर्म्यादाकाश-साधर्म्यान्निरवयवत्वान्नित्य इति । द्वितीयपक्षोत्थापनबुद्ध्या प्रयुज्य माना सैव साधर्म्यसमा वैधर्म्यसमा वा जातिः प्रकरणसमा भवति, तत्रैवानित्यः शब्दः कृतकत्वादिति प्रयोगे नित्यः शब्दः श्रावणत्वा-च्छब्दत्ववदिति । त्रैकाल्यानुपपत्त्या हेतोः प्रत्यवस्थानमहेतुसमा-जातिः, यथा हेतुः साधनं तत् साध्यात् पूर्वपश्चात् सहवाभवेत्, यदि पूर्वम्, असति साध्ये तत् कस्य साधनम्, अथ पश्चात् साधनम्, पूर्वं तर्हि साध्यम्, तस्मिँश्च पूर्वसिद्धे किं साधनेन, अथ युगपत् साध्यसाधने, तर्हि तयोः सव्येतरगोविषाणयोरिव साध्यसाधनभाव एव न भवेदिति । अर्थापत्त्या प्रत्यवस्थानमर्थापत्तिसमाजातिः, यद्यनित्यसाधर्म्यात् कृतकत्वादनित्यः शब्दोऽर्थादापद्यते नित्य-

साधर्म्यान्नित्य इति, अस्ति चास्य नित्येनाकाशादिना साधर्म्यं निरवयवत्वमित्युद्भावनप्रकारभेद एवायमिति अविशेषापादनेन प्रत्यवस्थानमविशेषसमाजातिः, यथा यदिशब्दघटयोरेको धर्मः कृतकत्वमिष्यते, तर्हि समानधर्मयोगात् तयो रविशेषे तद् तदेव सर्वपदार्थानामविशेषः प्रसज्यत इति। उपपत्त्या प्रत्यवस्थानमुपपत्तिसमाजातिः, यथा यदि कृतकत्वोपपत्त्या शब्दस्यानित्यत्वं, निरवयवत्वोपपत्त्या नित्यत्वमपि कस्मान्न भवति, पक्षद्वयोपपत्त्याऽनध्यवसायपर्यवसानत्वं विवक्षितमित्युद्भावनप्रकारभेद एवायम्।

उपलब्ध्या प्रत्यवस्थानमुपलब्धिसमाजातिः, यथाऽनित्यः शब्दः प्रयत्नानन्तरीयकत्वादित्युक्ते प्रत्यवतिष्ठते– न खलु प्रयत्नानन्तरीयकत्वमनित्यत्वे साधनम्, साधनं हि तदुच्यते येन विना न साध्यमुपलभ्यते, उपलभ्यते च प्रयत्नानन्तरीयकत्वं विनापि विद्युदादावनित्यत्वं, शब्देऽपि क्वचिद् वायुवेगभज्यमानवनस्पत्यादिजन्ये तथैवेति। अनुपलब्ध्या प्रत्यवस्थानमनुपलब्धिसमाजातिः, तथा तत्रैव प्रयत्नानन्तरीयकत्वहेतावुपन्यस्ते सत्याह जातिवादी–

न प्रयत्नकार्यः शब्दः, प्रागुच्चारणादस्त्येवासौ आवरणयोगात् तु नोपलभ्यते, आवरणानुपलम्भेऽप्यनुपलम्भान्नास्त्येव शब्द इति चेत्, न, आवरणानुपलम्भेऽप्यनुपलम्भ सद्भावात्, आवरणानुपलब्धेश्चानुपलम्भादभावः, तदभावे चावरणोपलब्धे र्भावो भवति, ततश्च मृदन्तरितमूलकीलोदकादिवदावरणोपलब्धिकृतमेव शब्दस्य प्रागुच्चारणादग्रहणमिति प्रयत्नकार्यत्वाभावान्नित्यः शब्द इति।

साध्यधर्मनित्यानित्यत्वविकल्पनेन शब्दनित्यत्वापादनं नित्यसमाजातिः, यथा अनित्यः शब्द इति प्रतिज्ञाते जातिवादी विकल्पयति येयमनित्यता शब्दस्योच्यते सा किमनित्या नित्यावेति, यद्यनित्या, तदियमवश्यमपायिनीत्यनित्यताया अपायान्नित्यः शब्दः, अथानित्यतानित्यैव, तथापि धर्मस्य नित्यत्वात् तस्य च निराश्रयस्यानुपपत्ते स्तदाश्रयभूतः शब्दोऽपि नित्य एव भवेत्, तदनित्यत्वे तद् धर्मनित्यत्वायोगादित्युभयथाऽपि नित्यः शब्द इति ।

एवं सर्वभावानित्यत्वोपपादनेन प्रत्यवस्थानमनित्यसमा जातिः यथा घटसाधर्म्यमनित्यत्वेन शब्दस्यास्तीति तस्यानित्यत्वं यदि प्रतिपाद्यते तद् घटेन सर्वपदार्थानामस्त्येव किमपि साधर्म्यमिति तेषामप्यनित्यत्वं स्यात्, अथ पदार्थान्तराणां तथाभावेऽपि नानित्यत्वं तर्हि शब्दस्यापि तन्माभूदिति, अनित्यत्वमात्रापादनपूर्वकविशेषोद्भावनाच्चाविशेषसमातो भिन्नेयं जातिः । प्रयत्नकार्यनानात्वोपन्यासेन प्रत्यवस्थानं कार्यसमाजातिः । यथा अनित्यः शब्दः प्रयत्नानन्तरीयकत्वादित्युक्ते जातिवाद्याह–प्रयत्नस्य द्वैरूप्यं दृष्टं, किञ्चिदसदेव तेन जन्यते यथाघटादिकम्, किञ्चित्सदेवावरणव्युदासादिनाऽभिव्यज्यते यथा मृदन्तरितमूलकीलादि, एवं प्रयत्नकार्य नानात्वादेषःप्रयत्नेन शब्दो व्यज्यते जन्यते वेति संशय इति, संशयापादनप्रकारकभेदाच्च संशयसमातः कार्यसमाजातिर्भिद्यते इति युक्तमुक्तं चतुर्विंशतिभेदाः स्युर्जातय इति ॥

अन्यानि यानि तु निग्रहस्थानसंज्ञानि द्वाविंशतिमितानि वै इति, अन्यानि छलजाति भिन्नानि, यानि दूषणानि तु पुनः, यत् तच्छब्दयो

नित्यसम्बन्धात् तानीत्यनुक्तमप्युन्नीयते तानि दूषणानि निग्रह-स्थानसंज्ञानि निग्रहस्थानव्यपदेश्यानि, वै निश्चयेन, द्वाविंशति-मितानि द्वाविंशतिसंख्यकानि,

"विप्रतिपत्तिरप्रत्तिपत्तिश्च निग्रह स्थानम्" इति सूत्रेण विप्रतिपत्त्यविप्रतिपत्त्यन्यतरोन्नायकधर्मवत्त्वं निग्रहस्थानत्वमिति लक्षणं सूचितम्, "प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तरमर्थान्तरं निरर्थकमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभाविक्षेपो मतानुज्ञा-पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि" इति सूत्रोपदर्शितानिद्वाविंशतिसंख्यकानि निग्रह-स्थानानि, तत्र स्वपक्षे परपक्षधर्मानुज्ञा प्रतिज्ञाहानिः, सेयं पक्षहेतु-दृष्टान्तसाध्यतदन्यहानिभेदात् पञ्चधा। यत्र शब्दोऽनित्यः कृतक-त्वादित्युक्ते प्रत्यभिज्ञया बाधितविषयोऽयमित्युत्तरिते अस्तु तर्हि घट एव पक्ष इति, तत्र पक्षहानिः, तत्रैव ऐन्द्रियकत्वादिति हेतो रनैकान्तिकत्वमिति प्रत्युक्ते अस्तु कृतकत्वादिति हेतुरिति हेतुहानिः पर्वतोवह्निमान्धूमादयोगोलकवदित्युक्ते दृष्टान्त साधन विकल इति प्रत्युक्ते अस्तु तर्हि महानसवदिति दृष्टान्तहानिः, अत्रैव सिद्धसाधने च प्रत्युक्ते अस्तु तर्हि इन्धनवानिति साध्यहानिः, अन्यहानिस्तु विशेषणहान्यादिः, यथा तत्रैव नीलधूमादित्युक्तेऽ-समर्थविशेषणत्वेन प्रत्युक्ते अस्तु तर्हि धूमादिति हेतुरित्यादि।

प्रतिज्ञातार्थस्य प्रतिषेधे कृते विशेषणान्तर विशिष्टतया तत् कथनं प्रतिज्ञान्तरम्, प्रतिज्ञातार्थस्येत्युपलक्षणं हेत्वतिरिक्तार्थस्येति

तेनोदाहरणान्तरोपनयान्तरयोः प्रतिज्ञान्तरत्वेन सङ्ग्रहः, यथा शब्दोऽनित्य इत्युक्ते ध्वनौ बाधेन परेण प्रत्युक्ते वर्णात्मकः शब्दः पक्ष इति प्रतिज्ञान्तरम्, प्रतिज्ञाहेत्वो विरोधः प्रतिज्ञाविरोधः, यथा गुणव्यतिरिक्तं द्रव्यं रूपादिभ्योऽर्थान्तरस्यानुपलब्धेरिति, अत्र यदि गुणव्यतिरिक्तं द्रव्यं कथं रूपादिभ्योऽर्थान्तरस्यानुपलब्धिः,अथ रूपादिभ्योऽर्थान्तरस्यानुपलब्धिः कथं गुणव्यतिरिक्तं द्रव्यमिति। पक्ष प्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः, स्वाभिहितस्य प्रतिषेधे कृते सति तत् परिजिहीर्षया प्रतिज्ञातार्थापलाप- प्रतिज्ञातार्थापलापः प्रतिज्ञासन्न्यास इति तत् पर्यवसानम्, यथा शब्दोऽनित्यः ऐन्द्रियकत्वादित्युक्ते सामान्ये व्यभिचारेणपरेण प्रत्युक्तेक एवमाह शब्दोऽनित्य इति।

परोक्तदूषणोद्दिधीर्षया तत्रैव हेतौ पूर्वोक्तहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्टवचनं हेत्वन्तरम्, यथा शब्दोऽनित्यो बाह्येन्द्रियप्रत्यक्षत्वादित्युक्ते सामान्येऽनैकान्तिकत्वेन च प्रत्युक्ते सामान्यवत्त्वे सतीति विशेषणम्। प्रकृतोपयुक्तमर्थमुपेक्ष्यासम्बद्धार्थाभिधानमर्थान्तरम् यथा शब्दोऽनित्यः कृतकत्वादित्युक्त्वा शब्दो गुणः स चाकाशस्येत्यादि। अवाचकपदप्रयोगो निरर्थकम् यथा जवगडदशादितुल्यवर्णक्रमनिर्देशः, परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातविज्ञातार्थम्, अस्य अवहिताविकलव्युत्पन्नपरिषत् पतिवादिबोधानुकूलोपस्थित्यजनकवाचकवाक्यप्रयोगोऽविज्ञातार्थमितिपर्यवसितम्, अस्य त्रेधा सम्भवः असाधारणतन्त्रमात्रप्रसिद्धम् अतिप्रसक्तयोगमनपेक्षित रूढिकम् श्लिष्टमिति, तत्राद्यं बौद्धप्रसिद्धं

रूपस्कन्धादिवचनम्, द्वितीयं–कश्यपतनयधृतिहेतुरयं त्रिनयनसमान-नामधेयवान् तत् केतुमत्त्वादित्यादि। तृतीयं श्वेतोधावतीत्यादि। पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम्, अस्य अभिमतवाक्यार्थ-बोधानुकूलाकाङ्क्षादिशून्यबोधजनकपदत्वमपार्थकत्वमित्यत्र पर्य-वसानम् यथा दश दाडिमानि षड्पूपा इत्यादि। 'अवयवविपर्या-सवचनमप्राप्तकालम्' इदं च सूत्रमित्थं व्याख्यातं वृत्तिकृता–

अवयवस्य कथैकदेशस्य विपर्यासो वैपरीत्यं, तथा च समयबन्ध-विषयीभूतकथाक्रमविपरीतक्रमेणाभिधानं पर्यवसन्नम्, तत्रायं क्रमः वादिना साधनमुक्त्वा सामान्यतो हेत्वाभासा उद्धरणीया इत्येकः पादः, प्रतिवादिनश्च तत्रोपालम्भो द्वितीयः पादः, प्रतिवादिनः स्वपक्षसाधनं तत्र हेत्वाभासोद्धरणश्चेति तृतीयः पादः, जयपराजय-व्यवस्था चतुर्थपादः, एवं प्रतिज्ञाहेत्वादीनां क्रमः, तत्र सभाक्षो-भव्यामोहादिनाऽव्यस्ताभिधानमप्राप्तकालमिति।

स्वदर्शनसिद्ध यत्किञ्चिदवयवशून्यावयवाभिधानं न्यूनम्, सौगतस्योदाहरणोपनयावयवद्वयवादिनः प्रतिज्ञाद्यवयवानभिधाने-ऽपिन न्यूनम्, प्रतिज्ञाद्यवयवपञ्चकाभ्युपगन्तु नैयायिकस्य तु तथा-ऽनभिधाने भवत्येव तत्। हेतूदाहरणाधिकमधिकम्, यथा धूमा-दालोकात्महानसवच्चत्वरवदिति। निष्प्रजोजनं शब्दार्थयोः पुनर-भिधानं पुनरुक्तम् अनुवादस्तु सप्रयोजनत्वान्न तत्, समानार्थक-पूर्वानुपूर्वीकशब्दप्रयोगः शब्दपुनरुक्तं यथा घटो घट इति, समाना-र्थकभिन्नानुपूर्वीकशब्दप्रयोगोऽर्थपुनरुक्तम्, यथा घटः कलस इति।

विज्ञातस्य परिषदा त्रिभिरभिहितस्याप्यनुच्चारणमननुभाषणम्, तदिदं चतुर्धा– एकदेशानुवादात्, विपरीतानुवादात्, केवलदूषणो-

त्तया, स्तम्भेन च। परिषदा विज्ञातस्य वादिना त्रिभिरभिहित-स्याप्यविज्ञानमज्ञानम्, इदञ्च किंवदसि बुध्यत एव नेत्याद्याविष्करणेन ज्ञातुं शक्यते। उत्तरार्हे उत्तराप्रतिपत्तिरप्रतिभा।

असम्भवत्कालान्तरकत्वेनारोपितं कार्यव्यासङ्गमुद्भाव्यकथा विच्छेदो विक्षेपः। स्वपक्षदोषाभ्युपगमात् परपक्षदोषप्रसङ्गो मतानुज्ञा, यथा चौरो भवान् पुरुषत्वात् प्रसिद्धचौरवदित्युक्ते भवानपि चौरः पुरुषत्वादिति ब्रुवन्नात्मनः परापादित चौरत्वदोषमभ्युपगतवानिति मतानुज्ञयानिगृह्यते।

निग्रहस्थानं प्राप्तवतो निग्रहस्थानानुद्भावनं पर्यनुयोज्योपेक्षणम्, एतच्च मध्यस्थेनैवोद्भाव्यं, वादे स्वयमस्योद्भावनमपि युक्तम्। अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः, उपपन्नवादिनमप्रमादिनमनिग्रहार्हमपि निगृहीतोऽसीतियो ब्रूयात् स एतेन निगृह्यते।

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः, अस्य कथायां स्वीकृतसिद्धान्तप्रच्यवोऽपसिद्धान्त इत्यत्र पर्यवसानम्, यथा साङ्ख्यमतेनाहं वदिष्यामीत्यभ्युपेत्यारब्धायां कथायामाविभावेऽनवस्था दोषपरिहारायाविर्भावस्यासतोयद्युत्पत्ति स्वीकरोति तदाऽनेन निगृह्यते। हेत्वाभासास्तु पूर्वमेवलक्षिताः।

मोक्षाङ्गस्य कथाङ्गस्य, तत्त्वमात्रस्य दर्शनम्।
आक्षपादं सुशिलेन, भावितं भाव्यतां बुधैः ॥१॥

॥ इति न्यायदर्शनम् ॥

# ॥ अथ काणादर्शनं ॥

## 卐 ॥ वैशेषिकदर्शनापराभिधानम् ॥ 卐

पदार्थानुगमे कान्तं काणादं दर्शनं वरम् ।
द्रव्यादिभिस्सप्ततत्त्वै-र्विश्वतत्त्वप्रकाशकम् ॥१॥

अनन्तानां पदार्थानां प्रत्येकं वक्तुमशक्यानामपि सप्तभिर्द्रव्यत्वादिभिर्विभजाकधर्मैरनुगमे एतावन्त एव पदार्था नातोऽधिकास्सन्तीत्येवमनुगमे कान्तं मनोहरम्, काणादं कणादमुनिभाषितं, दर्शनं वैशेषिकदर्शनाभिधेयम्, वरं न्यायदर्शनापेक्षया श्रेष्ठं, तत्र षोडशपदार्थानामभिधानेऽपि तदनन्तर्भूतानां बहूनां पदार्थानां सद्भावात्, इदन्तु द्रव्यादिभिः सप्ततत्त्वैः द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावाख्यैः सप्तपदार्थैः निरुक्त सप्तपदार्थनिरूपणैः, विश्वतत्त्वप्रकाशकम् समस्तपदार्थज्ञानंप्रत्यलम् । यद्यपि 'अथातो धर्मं व्याख्यास्यामः ॥१॥ यतोऽभ्युदयनिःश्रेयससिद्धि सधर्मः ॥२॥ तद् वचनादाम्नायस्य प्रामाण्यम् ॥ ३॥' इति सूत्रत्रयान्तरं "धर्मविशेषप्रसूताद्द्रव्यगुण-कर्मसामान्यविशेष-समवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निः श्रेयसम् ॥४॥ इति सूत्रं प्राणिनाय कणादः, तत्र षण्णामेवोपदर्शनं नतु सप्तमस्याभावस्य, तथापि 'कारणाभावात् कार्याभावः इति न तु कार्याभावात्कारणाभावः' इत्यादि सूत्रणतोऽभावोऽपि तत् सम्मत एवेति बोध्यम् ।

द्रव्याणि नवसंख्यानि चतुर्विंशतिकाः गुणाः ॥
कर्माणि पञ्चसामान्यं त्रिविधं परिकीर्त्तितम् ॥२॥

अनन्ताश्च विशेषास्स्यु–रसमवायो न भेद भाक् ॥
अभावो द्विविधो नान्ये पदार्थाः मानगोचराः ॥३॥

द्रव्याणि नव संख्यानीति, समवायिकारणत्वं गुणवत्त्वं गुणकर्मभिन्नत्वे सति सामान्यवत्त्वं द्रव्यस्य लक्षणम्, द्रव्यत्वजातिमत्त्वमपि द्रव्यस्य लक्षणम्, समवायसम्बन्धेन भावकार्यम्प्रति तादात्म्यसम्बन्धेन द्रव्यं कारणमिति, समवायसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्न द्रव्यनिष्ठकारणता किञ्चिद्धर्मा-वच्छिन्ना कारणत्वात् घटनिष्ठकार्यतानिरूपितकपालनिष्ठकारणतावदित्यनुमानेन द्रव्यत्वजातिसिद्धिः, अन्यूनानतिप्रसक्तधर्मस्यैवावच्छेदकत्वमिति नियमेन पृथिवीत्वादे र्न्यूनवृत्तित्वात् सत्तादेश्चातिप्रसक्तत्वान्नोक्तकारणतावच्छेदकत्वमिति बोध्यम् ।

निरुक्तलक्षणवन्ति द्रव्याणि पृथिवीजलतेजोवाय्वाकाशकालदिगात्मनो भेदेन नवसंख्यकानि नवसंख्यावन्ति । गन्धवत्त्वं पृथिव्यालक्षणं, गन्धसमवायिकारणतावच्छेदकतया पृथिवीत्वजातिस्तत्र सिद्ध्यति पाषाणादावपि गन्धोऽस्त्येव यद् द्रव्यं यद् द्रव्यध्वंसजन्यं तत् तदुपादानोपादेयमितिनियमात् पाषाणध्वंसजन्ये पाषाणभस्मनि पाषाणोपादानोपादेये गन्धानुरोधेन पाषाणोपादाने गन्धस्यावश्यकत्वेन ततः पाषाणेऽपि गन्धोत्पत्तिसम्भवात्, अनुपलम्भस्त्वनुत्कटत्वेनाप्युपपद्यते, तत्र षड् विधो रसः, सप्तविधो वर्णश्च, पाकजोऽनुष्णाशीतस्पर्शस्तत्र, सानित्याऽनित्या च, नित्या परमाणुरूपा, तदन्याऽनित्या, सैवावयववती, तस्याः शरीरेन्द्रियविषयभेदेन त्रैविध्यम्, पार्थिवं शरीरं योनिजमयोनिजं च, इन्द्रियं घ्राणं

रूपादिषु मध्ये गन्धस्यैव ग्राहकत्वेन तस्य पार्थिवत्वं सिध्यति, द्व्यणुकादिब्रह्माण्डस्तु विषयः। शीतस्पर्शवत्त्वं जलस्य लक्षणं, जन्यशीतस्पर्शजनकतावच्छेदकतया जन्यजलत्वं तदवच्छिन्नजनकतावच्छेदकतया परमाणुसाधारणं जलत्वं सिद्ध्यति, तत्र मधुरो रसः, अभास्वरशुक्लरूपश्च, नित्यानित्यादिभेदः पृथिवीवत्, किन्तु शरीरमयोनिजं वरुणलोके प्रसिद्धम् इन्द्रियं रसनं, रूपादिषु मध्ये रसस्यैव व्यञ्जकत्वात् तस्य जलीयत्वं सिध्यति, सरित् समुद्रादि विषयः। उष्णस्पर्शवत्त्वं तेजसो लक्षणं, जन्योष्णस्पर्शसमवायिकारणतावच्छेदकतया जन्यतेजस्त्वं तदवच्छिन्नसमवायिकारणतावच्छेदकतया परमाणुसाधारणं तेजस्त्वं सिध्यति, भास्वरशुक्लरूपन्तत्र, नित्यानित्यादिभेदो जलवत्, इन्द्रियं चक्षुः, तस्य रूपादिषु मध्ये रूपस्यैव व्यञ्जकत्वात् तैजसत्वं सिध्यति, वह्न्यादि विषयः। अपाकजानुष्णाशीतस्पर्शवत्त्वं वायो र्लक्षणम्, अपाकजानुष्णाशीतस्पर्शसमवायिकारणतावच्छेदकतया वायुत्वं सिध्यति, तस्य परमाणुवृत्तित्वं पूर्ववत्, तेजस इव नित्यानित्यादिभेदः, देहव्यापि त्वगिन्द्रियम्, तस्य रूपादिषु स्पर्शस्यैव व्यञ्जकत्वेन वायवीयत्वं सिद्ध्यति प्राणादि महावायुपर्यन्तो विषयः। शब्दविशेषगुणकमाकाशम्, एकमेव, अत एव तत्राकाशत्वं न जातिः, श्रोत्रेन्द्रियं तस्य, तस्योपाधिभेदान्नानात्वम् कालिकपरत्वासमवायिकारणसंयोगाश्रयः, स चैकोप्युपाधिभेदात् क्षणलवदण्डमुहूर्त्तदिनपक्षमासादिव्यवहार विषयः, कालिकसम्बन्धेन जगतामाश्रयश्च, दैशिकपरत्वापरत्वासमवायिकारणसंयोगाश्रयतयादिक्सिध्यति साप्येका

नित्या । विभुत्वञ्चाकाशकालदिशां समानमेवं परममहत्त्वमपि दिगेकाऽप्युपाधिभेदात् प्राचीप्रतीच्यादिव्यपदेशमश्नुते । कालदिशो-रप्येकव्यक्तिकत्वात् कालत्वदिक्त्वेन जाती । ज्ञानादिगुणवानात्मा, स जीवेश्वरभेदेन द्विविधः, तत्र जन्यज्ञानवत्त्वं जीवस्य लक्षणम्, जीवाः प्रतिशरीरं भिन्ना विभवो नित्याश्च, शरीरेन्द्रियादीनां चैतन्याभावाच्छरीरेन्द्रियाद्यधिष्ठातृतया तेषां सिद्धिः,

नित्यज्ञानवानीश्वरः, सोऽपि विभुर्नित्यश्च, किन्त्वेको जगतः कर्त्ता, तदुक्तत्वेन वेदस्य पौरुषेयत्वम्, नित्यस्य स्वरूपयोग्यत्वे फलावश्य-म्भाव इति नियमाङ्गीकारे सुखदुःखसमवायिकारणतावच्छेदक-तया सिद्धमात्मत्वं जीवमात्रगतम्, उक्त नियमानङ्गीकारे तदीश्वर-गतमपीति बोध्यम् । सुखदुःखादिसाक्षात्कारणमिन्द्रियं मनः, तत् संयुक्तत्वात् किञ्चिदिन्द्रियं ज्ञानं जनयति तदसंयुक्तत्वाच्चा परमिन्द्रियं ज्ञानं न जनयतीत्यतोऽणुमनः तच्च प्रतिशरीरं भिन्नमिति तद्गतं मनस्त्वसामान्यं सम्भवतीति, सुवर्णस्यतेजस्यन्तर्भावान्नव-संख्यानि द्रव्याणीति सिद्धम् । चतुर्विंशतिका गुणा इति, कर्मभिन्नत्वे सत्यसमवायिकारणत्वं द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वं गुणत्व-जातिमत्त्वञ्च गुणस्य लक्षणम्, द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणत्वात् कपालनिष्ठकारण-तावदित्यनुमानेन गुणत्वजातिसिद्धिः । उक्त लक्षणलक्षितागुणाः रूपरसगन्धस्पर्शसंख्यापरिमाण पृथक्त्वसंयोगविभागपरत्वबुद्धि-सुखदुःखेच्छाद्वेषयत्न गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दभेदा-च्चतुर्विंशतिकाः चतुर्विंशतिसंख्यका इत्यर्थः ।

"रूपरसगन्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः" इति सूत्रे च शब्देन सङ्कलितागुरुत्वादयः सप्त, रूपादयः प्रयत्नान्ताश्च सप्तदश कण्ठत उक्ता इति चतुर्विंशतिसङ्ख्यकत्वं गुणानां कणादानुमतमेवेति बोध्यम्, तत्र चक्षुर्मात्रग्राह्यो गुणोरूपं, शुक्लनीलपीतहरितरक्तकपिशचित्रभेदेन सप्तविधं, पृथिवीजलतेजोवृत्ति, पृथिव्यां सप्तविधं, जले अभाश्वरशुक्लरूपं, तेजसि भाश्वर शुक्लरूपमिति, अत्र येनेन्द्रियेण यद् गृह्यते तद्गता जाति स्तदभावश्चतेनेन्द्रियेण गृह्यत इति नियमाद्रूपत्वादेरपि चक्षुर्मात्रग्राह्यत्वात् तद्वारणाय गुण इति, एवमग्रेऽपि, रसनग्राह्योगुणोरसः मधुरकटुकषायाम्लतिक्तलवणभेदेन षड्विधः, पृथिवीजलवृत्तिः, पृथिव्यां षड्विधोऽपि, जले मधुर एव। घ्राणग्राह्योगुणो गन्धः सुरभ्यसुरभिभेदेन द्विविधः पृथिवीमात्रवृत्तिः, त्वगिन्द्रियमात्रग्राह्यगुणः स्पर्शः, स च शीतोष्णानुष्णाशीतभेदात् त्रिविधः, पृथिवीजलतेजोवायुवृत्तिः पृथिवीवाय्वोरनुष्णाशीतस्पर्शः, जले शीतस्पर्शः, तेजस्युष्णस्पर्शः, पृथिव्यां पाकजा रूपरसगन्धस्पर्शा अनित्या एव, जले रूपरसस्पर्शा अपाकजा नित्यगता नित्याः, अनित्यगता अनित्याः, एवं तेजोवाय्वोरपि, एतन्मते परमाणावेव पाकजाः, न्यायमतेऽवयविन्यपि, गणनव्यवहारहेतुः सख्या, नवद्रव्यवृत्तितः, एकत्वादिपरार्द्धान्ता तत्र नित्यद्रव्यगतमेकत्व नित्यम्, अनित्यगतमेकत्वमनित्यत्वम्, द्वित्वादिपरार्धान्ता अपेक्षाबुद्धिजन्या तन्नाशान्नश्यति अपेक्षाबुद्धिश्चानेकैकत्वबुद्धिः प्रथमक्षणेऽयमेकोऽयमेक इत्यपेक्षाबुद्धिः द्वितीयक्षणे

द्वितीयोत्पत्तिः तृतीयक्षण द्वित्वत्व निर्विकल्पकं चतुर्थक्षणेऽपेक्षा-बुद्धिनाशो द्वित्वप्रत्यक्षं च पञ्चमक्षणे द्वित्वनाशो द्वित्वविशिष्ट प्रत्यक्षश्च, एवं त्रित्वादरेप्युत्पादविनाशौ ।

मानव्यवहारासाधारणकारणं परिमाणं नवद्रव्यवृत्ति, महद्-दीर्घाणुह्रस्वभेदेन चतुर्विधम्, तदपि प्रत्येकं परममध्यमभेदेन द्विविधंद्विविधम्, तत्र परममहद्दीर्घे आकाशादिद्रव्यचतुष्टयवर्त्तिनं परमाणुह्रस्वे परमाणुमनोर्वर्त्तिनी, एतच्चतुष्टयमपि नित्यगतत्वा-न्नित्यम्, मध्यममहद्दीर्घे त्र्यणुकाद्यवयविवर्त्तिनी, मध्यमाणुह्रस्वे द्व्यणुकवर्त्तिनी, एतच्चतुष्टयमनित्यमेवाश्रयनाशान्नश्यति । सङ्ख्या जन्यं परिमाणजन्यं, प्रचयजन्यत्वंच, तत्र द्व्युणुकपरिमाणं परमाणु-द्वित्वजं, त्र्यणुकपरिमाणं द्व्यणुकत्रित्वजं, घटादिपरिमाणं कपाल-परिमाणजं, तूलकादिपरिमाणं प्रचयजन्यमिति । पृथग् व्यवहारा-साधारणकारणं पृथक्त्व नवद्रव्यवृत्ति, एकपृथक्त्वादि परार्ध-पृथक्त्वपर्यन्तम्, संख्यावन्नित्यत्वादिकमस्य ज्ञेयम् । संयुक्तव्यव-हारासाधारणकारणं संयोगः नवद्रव्यवृत्तिः, सचैककर्मजन्योभय-कर्मजन्यसंयोगजसंयोगभेदात् त्रिविधः, तत्राद्यः, पक्षिक्रियया पक्षितरुसंयोगः, द्वितीयो मल्लद्वयक्रियाभ्यां मल्लद्वयसंयोगः तृतीयः कपालतरुसंयोगाद् घटसंयोगः, क्रियाया अभावादवयवाभावाच्च विभुद्वयसंयोगो न भवति, संयोगश्चाव्याप्यवृत्तिः, यत्रैकावच्छेदेन संयोगो विद्यते, तदा तत्रैवान्यावच्छेदेन तदभावोऽपि, परमाणु-निष्ठस्यापि संयोगस्य दिगादयोऽवच्छेदकाः कर्मजसंयोगोऽभिघातो नोदनश्च, आद्यः शब्दहेतुः, द्वितीयः शब्दाहेतुः । संयोगनाशको

विभक्तव्यवहारासाधारणकारणं वा गुणो विभागजविभा ाभेदेन त्रिविधः, पक्षिक्रियया पक्षितरुविभाग आद्यः, मल्लद्वयक्रियया मल्लद्वयविभागो द्वितीयः, तृतीयस्तु कारणमात्र विभागजन्यः, कारणाकारणविभागजन्यश्च, तत्र कपालद्वयविभागात् कपालाकाशविभागः प्रथमः, हस्ततरुविभागाच्छरीरतरुविभागो द्वितीय इति, संयोगविभागावनित्यावेव। परापरव्यवहारनिमित्ते परत्वापरत्वे, दैशिके कालिके च पृथवीजलतेजोवायुमनोवृत्तिनी। तत्र दैशिकपरत्वं मूर्त्तसंयोगभूयस्त्वज्ञानजन्यं दूरत्वमिति व्यपदिश्यते, दैशिकमपरत्वं मूर्त्तसंयोगाल्पीयस्त्वज्ञानजन्यमन्तिकत्वमिति व्यपदिश्यते, तयोराश्रयेण सह दिक् संयोगोऽसमवायिकारणम्। कालिकपरत्वं दिवाकरपरिस्पन्दभूयस्त्वज्ञानज्ञानजन्यं ज्येष्ठत्वमिति व्यपदिश्यते, दिवाकरपरिस्पन्दाल्पीयस्त्वज्ञानजन्यमपरत्वं कनिष्ठत्वमिति व्यपदिश्यते, तयोराश्रयेण सह कालसंयोगोऽसमवायिकारणम्, एषामपेक्षाबुद्धिनाशान्नाशो भवतीति। सर्वव्यवहारासाधारण कारणं बुद्धि र्ज्ञानम्, अनुभूतिस्मृतिभेदेन द्विविधम्, तत्र संस्कारमात्रजन्यं ज्ञानं स्मरणम्, यथा स घटः स देवदत्त इत्यादि, तत्र पूर्वानुभवः करणम्, स्मृतिभिन्नं ज्ञानमनुभवः, स प्रत्यक्षानुमितिभेदेन द्विविधः उपमितिशाब्दयोरनुमितावन्त र्भावात्, अत एवोपमानशब्दयो र्न प्रमाणान्तरत्वम्, तयो रनुमानप्रमाणान्तर्भावात्, प्रत्यक्षानुमिती च न्यायदर्शननिरूपणे निरूपिते एव, शब्दप्रमाणस्यानुमानगतार्थत्वमित्थम्, दण्डेन गामानयेत्यादिलौकिकपदानि यजेतेत्यादि वैदिकपदानि वा पतापर्यविषयस्मारितपदार्थसंसर्गप्रमापूर्वकाणि आकाङ्-

क्षातिमत्पदकदम्बत्वात्, घटमानयेत्यादि पदकदम्बकवत्, यद्वा एते मिथः संसर्गवन्तः योग्यतादिमत्पदोपस्थापितत्वात्, तादृश पदार्थवत्, दृष्टान्तरेण साध्यसिद्धिरिति । उपमानप्रमाणस्यानुमानगतार्थत्वमित्थम् गवयव्यक्तिप्रत्यक्षानन्तरं गवयपदं गवयत्वप्रवृत्तिनिमित्तकम्, यद्वा गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वादित्यनुमानेन पक्षधर्मताबलाद्गवयत्वप्रवृत्तिनिमित्तकं सिद्धयतीति ।

प्रमाभ्रमभेदेनापि ज्ञानस्य द्वैविध्यम्, तत्र तद्वति तत् प्रकारकं ज्ञानं प्रमा, यथा रजते इदं रजतमितिज्ञानम्, तदभाववति तत् प्रकारकं ज्ञानं भ्रमः, तस्य संशयविपर्ययभेदेन द्वैविध्यम्, तत्रैकस्मिन् धर्मिणि विरुद्ध तत् तदभावकोटि द्वयावगाहि ज्ञानं संशयः, यथाऽयं स्थाणुर्न्न वेति । तदभाववति तत् प्रकारको निश्चयो विपर्ययः, यथा शुक्ताविदं रजतमिति, तदभावाप्रकारकतत् प्रकारकज्ञानं निश्चयः, प्रमायां गुणः भ्रमे च दोषः कारणम्, संवादिप्रवृत्तिजनकत्वेन प्रामाण्यं विसंवादिप्रवृत्तिजनकत्वेन चाप्रामाण्यमनुमीयत इति परतोग्राह्यत्वमेव प्रामाण्याप्रामाण्ययोरिति । अन्येच्छानधीनेच्छाविषयो गुणः सुखं धर्मजन्यम् । अन्य द्वेषानधीनद्वेषविषयो गुणो दुःखम् अधर्मजन्यम् । इच्छाकामः, सा फलेच्छोपायेच्छाभेदेन द्विविधा, तत्र सुखविषयिणी दुःखाभावविषयिणीवेच्छा फलेच्छा, तत्र फलज्ञानं कारणम्, फलसाधनेच्छा उपायेच्छा, तत्रेष्ट साधनताज्ञानं कारणं, सैव कृतिसाध्यत्वप्रकारिकाचिकीर्षेत्यभिधीयते, तस्याश्च कृतिसाध्यताज्ञानमपिकारणम्, द्वेषः क्रोधः, स फलद्वेषोपायद्वेषाभ्यां द्विधा, तत्र फलद्वेषे फलज्ञानं कारणं, उपाय द्वेषे

द्विष्टसाधनताज्ञानंकारणम् । यत्नः प्रयत्नः, स च प्रवृत्ति निवृत्ति-जीवनयोनियत्नभेदेन त्रिविधः, तत्र बलवदनिष्टाननुबन्धीष्टसाधन-ताविषयककृतिसाध्यताविषयकज्ञानं चिकीर्षोपादानप्रत्यक्षं च प्रवृत्तौकारणम्, अत एव प्रवर्त्तकत्वानुरोधेन विधेरपिबलवदनिष्टा-ननुबन्धीष्ट साधनत्वमर्थः, निवृत्तिम्प्रति द्वेषद्वाराद्विष्टसाधनताज्ञानं कारणं, जीवनयोनियत्नस्तु शरीरे प्राणसञ्चारे कारणम् अतीन्द्रियश्च, तेन कार्येणानुमेयः । आद्यपतनासमवायिकारणं गुरुत्वं पृथिवीजलवृत्ति, तन्नित्यगतं नित्यम् अनित्यगतमनित्यम् । आद्यस्पन्दना समवायिकारणं द्रवत्वं पृथिवीजलतेजोवृत्ति, सांसिद्धिकनैमित्तिकभेदेन तद् द्विविधम्, तत्राद्यं जले, वह्नि-संयोगादिनिमित्तजन्यं द्वितीयं तु घृतादिपृथिवीषु सुवर्णादितेजस्सु च, जलपरमाणौ द्रवत्वं नित्यम्, अन्यत्रानित्यम् । चूर्णादिपिण्डी-भावहेतुर्गुणः स्नेहो जलमात्रवृत्तिः, नित्यगतोनित्योऽनित्यगत-स्त्वनित्यः, तैलाभ्यन्तरजले सप्रकृष्टत्वाद्दहनानुकूल्यंसम्पादयति । संस्कारस्त्रिविधो वेग-स्थितिस्थापक भावनाभेदात्, तत्र वेगः पृथि-वीजलतेजोवायुमनस्सुवर्त्तते, स कर्मजवेगजभेदाद् द्विविधः, तत्र शरादौनोदनजनितेन कर्मणा वेगो जन्यते, तेन च पूर्वकर्मना-शादुतरं कर्म, एवमुत्तरोत्तरमपि, यत्र वेगवताकपालेन जनिते घटे वेगो जन्यते स वेगजोवेग इति, स्थितिस्थापकः क्षितौ, केषाञ्चिन् मते पृथिव्यादि चतुष्टये, अतीन्द्रियोऽसौ, आकृष्टशाखादीनां यत् पूर्वदेशगमनं तत्र हेतुश्च, स उपेक्षानात्मकनिश्चयजन्यः, स्मरणे प्रत्यभिज्ञाने च कारणं, प्रत्यभिज्ञानं च संस्कारसहकृतेन्द्रियजन्यं

ज्ञानं प्रत्यक्षविशेष एव यथा सोऽयं घटः सोऽयं देवदत्त इत्यादि, चरमफलनाश्योऽयं, क्वचिद् रोगादिनाश्यः, क्वचित् कालादिनाश्यः, संस्कारमात्रं जन्यमेव। सर्वेषामैहिकपारत्रिकाणां सुखानामसाधारणकारणं धर्मोजीववृत्तिः, गङ्गास्नानादियागादिव्यापारः कर्मनाशाजलस्पर्शादिनाश्यश्च, तदुक्तमाचार्येण–

'चिरध्वस्तं फलायालं न कर्मातिशयं विना' इति। दुःखासाधारणकारणमधर्मो निषिद्धकर्मजन्यः प्रायश्चित्तादिनाश्यो जीववृत्तिः धर्माधर्मौ मिथ्याज्ञानजन्यवासनाजन्यौ तत्त्वज्ञानाद् विनश्यतः, भोगादपि विनश्यतः इति। श्रोत्रेन्द्रियग्राह्य गुणः शब्दः आकाशवृत्तिरव्याप्यवृत्तिश्च, स ध्वनिवर्णभेदेन द्विविधः, तत्र मृदङ्गादिमयो ध्वनिः, वायुकण्ठसंयोगादिजन्यः कादिर्वर्णः, कदम्बगोलकन्यायेन वीचीतरङ्गन्यायेन वा श्रोत्रदेशोत्पन्नस्य शब्दस्य ग्रहणं भवति न तु मृदङ्गादि देशोत्पन्नस्य, उत्पन्नः कोविनष्टः क इत्येवमुत्पादविनाशप्रतीत्या शब्दस्यानित्यत्वमेव, सोयं क इत्यादिप्रत्यभिज्ञानं तु तदेवौषधिमित्यादि प्रत्यभिज्ञानवत् साजात्यावलम्बनमिति। अत्र स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगा नवगुणा वायौ, रूपद्रवत्वसहिता एते एकादशगुणाः तेजसि, रसस्नेहगुरुत्वसहिता एते चतुर्दशगुणा जले, स्नेह हीना गन्धयुक्ता एते चतुर्दशगुणाः पृथिव्याम्, संख्यादिपञ्चकं बुद्ध्यादिषट्कं धर्माधर्मौ भावना चेत्येवं चतुर्दशगुणा जीवात्मनि, संख्यादिपञ्चकं दिक्कालयोः, सङ्ख्यादिपञ्चकं शब्दश्चेतिषड्गुणा आकाशे, संख्यादि पञ्चकं ज्ञानेच्छाप्रयत्नाश्चेत्येवमष्टौ गुणा ईश्वरे,

सङ्ख्यादिपञ्चकं परत्वापरत्वे वेगश्चेत्यष्टौ गुणा मनसि । बुद्ध्यादिषट्कं रूपादिचतुष्टयं स्नेहसांसिद्धिकद्रवत्वादृष्टभावनाशब्दा गुणाः, एतद् भिन्नास्सामान्यगुणा इति, अन्येऽपि गुणगत विशेषास्सूत्रभाष्यवृत्त्यादितो ज्ञेयाः ।

कर्मणि पञ्चेति, गुणभिन्नत्वे सत्यसमवायिकारणत्वं द्रव्यगुणभिन्नत्वे सति सामान्यवत्त्वं संयोगविभागोभयनिरूपितासमवायिकारणत्वं कर्मत्वजातित्त्वं वा कर्मणो लक्षणं, कर्मत्वजातिस्तु प्रत्यक्षसिद्धा, उक्त लक्षणलक्षितानि कर्माणि उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनभेदेन पञ्चप्रकाराणीत्यर्थः, तत्र ऊर्ध्वदेश संयोगानुकूलं कर्मोत्क्षेपणम् अधोदेशसंयोगानुकूलमपक्षेपणम्, अवयवानां परस्परसन्निकृष्टदेशसंयोगानुकूलं कर्माकुञ्चनं, विप्रकृष्टदेशसंयोगानुकूलं कर्म प्रसारणम्, एतच्चतुष्टभिन्नं कर्मगमनम्, भ्रमणरेचनस्यन्दनोर्ध्वज्वलनतिर्यग्गमनानां गमन एवान्तर्भावान्न कर्माधिक्यम् तदेतत्कर्मपञ्चकं पृथिवीजलतेजोवायुमनोवृत्ति, कर्मवत्त्वमेवैतेषां मूर्त्तत्वं न तु तज्जातिर्भूतत्वेन सह साङ्कर्यात्, भूतत्वं च बहिरिन्द्रिय ग्राह्यविशेषणगुणवत्त्वं तदाश्रयत्वात् पृथिव्यादीनि पञ्चभूतानि । सामान्यं त्रिविधं परिकीर्त्तितमिति, नित्यत्वे सत्यनेकसमवेतत्वं सामान्यस्य लक्षणम्, अनुगतप्रतीतिनियामकतया कार्यकारणभावावच्छेदकतया, शब्दप्रवृत्तिनिमित्ततया च सामान्यं सिध्यति, द्रव्यगुणकर्मसु द्रव्यं सत् गणः सन् कर्म सदिति यदियं सदित्यनुगतप्रतीतिस्तस्या विषयविधयानियामकमेकमवश्यमभ्युपेयं तदेव सत्त्वम्, द्रव्यत्वादिकं कारणतावच्छेदकतया

घटत्वादिकं च कार्यतावच्छेदकतया सिद्ध्यति, गुणत्वं चतुर्विंशति-गुणेषु गुणपदप्रवृत्तिनिमित्ततया सिद्ध्यतीति, व्यक्त्यभेद-तुल्यत्वसङ्करानवस्थारूपहान्यसम्बन्धाश्च जातिबाधकाः, तत्र एकव्यक्तिमात्रवृत्तित्वलक्षणव्यक्त्यभेदादाकाशत्वकालत्वदिक्त्वादीनि न सामान्यानि, स्वभिन्नजातिसमनियतत्वं जातिभेदस्य बाधकं तेन यदेव घटत्वं तदेव कलशत्वकुम्भत्वादि, परस्परात्यन्ताभावसामानाधिकरण्येसति सामानाधिकरण्यं साङ्कर्यं, तच्च जातित्वबाधकं, तेन पृथिवीत्वादिना साङ्कर्यादिन्द्रियत्वादिकं न जातिः, भूतत्व-मूर्त्तत्वयोरेकस्य जातित्वसाधकप्रमाणाभावे साङ्कर्यादुभयं न जातिः यदि च कर्मजनकतावच्छेदकतया मूर्त्तत्वंजातिरुपेयते तदा तत् साङ्कर्याद् भूतत्वं न जातिः, घटादिष्वनुगतप्रतीत्यादिबलाद् घटत्वादिजातीनां सिद्धौ घटत्वादिषु जातिर्जातिरित्यनुगतप्रतीत्या जातित्वस्य सकलजातिगतस्य सामान्यस्योपगमे तत् साधारण्येन जातिरित्यनुगतप्रतीति बलादन्यस्य सामान्यत्वस्य जातितयोपगमे तत्राप्युक्तदिशाजात्यन्तरस्य सामान्यत्वस्य प्रसक्त्यानवस्थानं स्यादतः सामान्यत्वं न जातिः, नित्यद्रव्याणां परमाण्वादीनां व्यावर्त्तकतया स्वतो व्यावृत्तानामनन्तानां विशेषाणां सिद्धौ तेषु विशेषत्वजातेरुपगमे जातिमतां किञ्चिद्रूपेणैवव्यावृत्तिरिति स्वतो-व्यावृत्तत्वस्य विशेषासाधारणरूपस्य हानिस्स्यादतो विशेषत्वं न जातिः, समवायसम्बन्धेन वृत्तित्वलक्षणसम्बन्धस्याभावस्वरूपासम्बन्धात् समवायाभावो न जाती, तदुक्तम् 'व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथाऽनवस्थितिः ।

रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः ॥ १ ॥' इति, तदेतत् सामान्यं परम्, अपरं, परापरञ्चेति त्रिविधं वैशेषिकैः परिकीर्त्तितम्,

तत्र सर्वसामान्यापेक्षयाऽधिकदेशवृत्तित्वरूपपरत्ववत्सत्त्वं द्रव्यगुणकर्मवृत्ति, सर्व सामान्यापेक्षया न्यूनदेशवृत्तित्वलक्षणापरत्ववद् घटत्वादि, द्रव्यत्वपृथिवीत्वादिकं तु घटत्वाद्यपेक्षयाऽधिकदेशवृत्तित्वात् सत्ताद्यपेक्षया न्यूनदेशवृत्तित्वात् परापरमिति ।

अनन्ताश्च विशेषाः स्युरिति, सद्भिन्नत्वे सति एकव्यक्तिमात्रसमवेतत्वं विशेषत्वम्, घटपटादीनां परस्परविरुद्ध घटत्वपटत्वादिमत्त्वाद् भेदः, द्व्यणुकादीनाञ्च विभिन्नावयवारब्धत्वाद्भेदः, परमाण्वादीनां च नित्य द्रव्याणां विभिन्नविशेषवत्त्वादेव परस्परं भेदः, विशेषाश्च स्वत एव व्यावृत्ताः, नित्यद्रव्याणामानन्त्यात् तद्गतानां विशेषाणामप्यानन्त्यमिति । समवायो न भेदभागिति, नित्यसम्बन्धत्वं समवायस्य लक्षणम्, अयुतसिद्धयोरवयवावयविनो र्गुणगुणिनोः क्रियाक्रियावतो र्जातिव्यक्त्यो र्नित्यद्रव्यविशेषयोश्च सम्बन्धे समवायः, न भेदभाग् अयं न भेदं विभिन्नप्रकारत्वं भजति, किन्तु लाघवादेक एव समवायः, गुणक्रियादिविशिष्टबुद्धि र्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वात् दण्डी पुरुषइति विशिष्टबुद्धिवदित्यनुमानेन लाघवादेकस्यैव समवायस्यसिद्धेः, सम्बन्धप्रत्यक्षे यावत् सम्बन्धिप्रत्यक्षस्य हेतुत्वात् समवायसम्बन्धिनामतीन्द्रियाणामपि परमाण्वादीनां सद्भावात् समवायो नाध्यक्षगोचर इति । अभावो द्विविध इति, द्रव्यादिषट्कान्योन्याभाववत्त्वमभावस्य लक्षणम्, संसर्गाभावान्योन्याभावभेदेन स द्विविधः,

तत्रान्योन्याभावभिन्नाभावः संसर्गाभावः, स प्रागभावध्वंसात्यन्ताभावभेदेन त्रिविधः, तत्र अनादि, सान्तः प्रागभावः, सादिरनन्तो ध्वंसः, एतौ स्वप्रतियोगिसमवायिकारणवर्त्तिनौ, कपाले घटो भविष्यति कपाले घटो नश्यतीति प्रतीतेः तादात्म्यान्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावोऽत्यन्ताभावोनित्यः, यथा भूतले संयोगेन घटो नास्तीति, संयोगसम्बन्धावच्छिन्न घटत्वावच्छिन्न घटनिष्ठ·प्रतियोगिताकात्यन्ताभाववद् भूतलमित्युक्तप्रतीतिपर्यवसानम्, येन सम्बन्धेन येन धर्मेण यत्र प्रतियोगीवर्त्तते तत्सम्बन्धावच्छिन्न तद्धर्मावच्छिन्न तन्निष्ठप्रतिगोगिताकाभावो न तत्र वर्त्तते तत्सम्बन्धावच्छिन्न तद्धर्मावच्छिन्न तन्निष्ठप्रतियोगिकाभावो न वर्त्तत इति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिना सममस्य विरोधः, नान्ये पदार्था मानगोचरा इति निरुक्तसप्तपदार्थभिन्नाः पदार्था प्रमाणविषया नेत्यर्थः । परिमाण्डल्यन्निपदार्थसाधर्म्यं कारणत्वं न पदार्थान्तरं, किन्त्वन्यथासिद्धिशून्यत्वे सति नियत पूर्ववर्त्तित्वं तत्, तत्रान्यथासिद्धयः पञ्च ग्रन्थातरे दर्शिताः, कारणत्वं त्रिविधं समवायिकारणत्वमसवायिकाणत्वं निमित्तकाणत्वं, चेति, यत्र कारणे यत् कार्यं समवायसम्बन्धेनोत्पद्यते तत् समवायिकारणं, अवयविनोऽवयवाः समवायिकारणं, यत्र द्रव्ये ये गुणा यानि च कर्माण्युत्पद्यन्ते तद्द्रव्यं तेषां गुणानां कर्मणाञ्च समवायिकारणं, समवायिकारणे समवाय स्वसमवायिसमवेतत्वान्यतरसम्बन्धेन वृत्तिकारणसमवायिकारणम्, ज्ञानादिकं न कस्याप्यसमवायिकारणमिति तद्भिन्नत्वमत्रदेयम्, भावकार्यमात्रस्य समवायिकारणं

द्रव्यमेव, गुणकर्मणोरेवासमवायिकारणम्, जन्यद्रव्यमात्रस्यासमवायिकारणमवयवसंयोगः, एवं पाकजरूप रसगन्धस्पर्शानां विलक्षणतेजः संयोगोऽसमवायिकारणं, आत्म विशेषगुणानामात्ममनस्संयोगोऽसमवायिकारणम्, नैमित्तिकद्रवत्वस्यासमवायिकारणं तेजः संयोगः इत्यादौ सर्वत्र समवायिकारणे समवायसम्बन्धेन वृत्तित्वादसमवायिकारणत्वम्, अवयवरूपादीनामवयविरूपादिम्प्रति स्वसमवायि समवेतत्व सम्बन्धेन समवायिकारणे वृत्तित्वादसमवायिकारणत्वं बोध्यम्, समवायिकारणत्वासमवायिकारणत्वभिन्नं कारणत्वं निमित्तकारणत्वम्, तदेतत् कारणत्वं कारणस्वरूपं कारणतावच्छेदकस्वरूपंवानातिरिक्तम्, एवं प्रतियोगित्वादिकमपि प्रतियोग्यादिस्वरूपमेव, सादृश्यमपितद्भिन्नत्वेसति तद्गत भूयोधर्मवत्त्वं धर्मविशेषस्वरूपमेव, नातिरिक्तं, दाहादिकम्प्रति उत्तेजकाभावविशिष्टप्रतिबन्धकाभावस्य कारणत्वादेव मण्यादिसमवधानेदाहानुत्पत्तेस्तदसमवधानेदाहोत्पत्तेश्च सम्भावान्न शक्तिर्दाहानुकूलाऽतिरिक्तासमस्ति, तमस्त्वालोकविशेषाभाव एवेति युक्तं नान्ये पदार्थामानगोचरा इति, एतन्मते विरोधासिद्धिव्यभिचारास्त्रय एव हेत्वाभासाः, तदुक्तम्—

"अप्रसिद्धोऽनप्रदेशोऽसन्प्रदेशोऽसन्सन्दिग्धश्चानयदेशः" अत एव पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वानि त्रीण्येवहेतुरूपाणीति ॥

वैशेषिकमतं सम्यग् सुशीलेन विभावितम् ॥
संक्षेपतोऽस्य विस्तारो ज्ञेयो भाष्यादितो बुधैः ॥१॥

॥ इति काणाददर्शनम् ॥

# 卐 ॥ अथ मीमांसादर्शनम् ॥ 卐

पूर्वोत्तरविभेदेन मीमांसाद्विविधामता ॥
आद्या कर्मप्रधानाऽन्त्या ज्ञानप्राधान्यमाश्रिता ॥१॥

पूर्वमीमांसोत्तरमीमांसाभेदेन मीमांसा द्विविधा, तत्र पूर्वमीमांसा कर्मप्रधाना, जैमिनिमुनिप्रणीता, उत्तरमीमांसा ज्ञानप्रधाना वेदव्यासेन सूत्रिता, तत्र पूर्वमीमांसायां धर्मविवेकायागादौ "अथातो धर्म जिज्ञासा ॥१॥" इति धर्मजिज्ञासांसूत्रयामास, वेदाध्यनान्नतरं धर्मविचारशास्त्रमिदमारम्भणोयमिति तदर्थः, धर्मश्च चोदनालक्षणोऽर्थोधर्म इति सूत्रे चोदनापदस्य वेदपरत्वाद् वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म इति यागादिरेव, वेदस्य सर्वस्य धर्मतात्पर्यकत्वेन धर्मप्रतिपादकत्वात्, यागादिश्च यजेत स्वर्गकाम इत्यादि वाक्येन स्वर्गमुद्दिश्य पुरुषं प्रति विधीयते, तथाहि यजेतेत्यत्रास्त्यंशद्वयं यजिधातुः प्रत्ययश्च, प्रत्ययेऽप्यस्त्यंशद्वयमाख्याततवं लिङ्त्वंच, तत्राख्याततवं दशलकारसाधारणं लिङ्त्वं पुनर्लिङ्मात्रे, उभाभ्यामप्यंशाभ्यां भावनैवोच्यते, भावनानामभवितु र्भवनानुकूलो भावयितु र्व्यापारविशेषः, सा द्विधा शाब्दीभावना आर्थीभावना चेति, तत्र पुरुषप्रवृत्त्यनुकूलो भावयितु र्व्यापारविशेषः शाब्दोभावना, सा च लिङंशेनोच्यते, लिङ्श्रवणऽयं मां प्रवर्त्तयति मत्प्रवृत्त्यनुकूलव्यापारवानिति प्रतीतेः, स च व्यापारविशेषो लौकिकवाक्ये पुरुषनिष्ठोऽभिप्रायविशेषः, वैदिकवाक्ये तु पुरुषाभावाल्लिङादिशब्दनिष्ठ एव, अत एव शाब्दीभावनेति व्यवह्रियते,

सा च भावनांशत्रयमपेक्षते साध्यं साधनमितिकर्त्तव्यतां च, किम्भावयेत् केन भावयेत् कथं भावयेदिति, तत्र किम्भावयेदित्याकाङ्क्षायां वक्ष्यमाणांशत्रयोपेता आर्थीभावना साध्यत्वेनान्वेति, एकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेः, केन भावयेदित्याकाङ्क्षायां लिङादिज्ञानं करणत्वेनान्वेति, तस्य च करणत्वं न भावनोत्पादकत्वेन, तत् पूर्वमपि तस्याः शब्दे सत्त्वात्, किन्तु भावनाज्ञापकत्वेन शब्दभावनाभाव्यनिर्वर्तकत्वेन वा, कथम्भावयेदित्याकाङ्क्षायामर्थवादज्ञाप्यप्राशस्त्यमिति कर्त्तव्यतात्वेनान्वेति, प्रयोजनेच्छाजनितक्रियाविषयव्यापार आर्थीभावना, सा चाख्यातत्वांशेनोच्यते आख्यातसामान्यस्य व्यापारवाचित्वात्, साप्यंशत्रयमपेक्षते साध्यं साधनमितिकर्त्तव्यतां च, किम्भावयेत् केन भावयेत् कथं भावयेदिति, तत्र किम्भावयेदित्याकाङ्क्षायां स्वर्गादिफलं साध्यत्वेनान्वेति, केन भावयेदित्याकाङ्क्षायां यागादिः करणत्वेनान्वेति, कथम्भावयेदित्याकाङ्क्षायां प्रयाजाद्यङ्गजातमितिकर्त्तव्यतात्वेनान्वेति, अपौरुषेयं वाक्यं वेदः, स च विधिमन्त्रनामधेयनिषेदार्थवादभेदात्पञ्चविधः, तत्राज्ञातार्थ ज्ञापको वेदभागो विधिः, स च तादृशप्रयोजनवदर्थविधानेनार्थवान् यादृशं चार्थं प्रमाणान्तरेणाप्राप्तं विधत्ते, यथा अग्निहोत्रं जुहुयात् स्वर्गकाम इति विधिः मानान्तरेणाप्राप्त स्वर्गप्रयोजनवद्धोमं विधत्ते, अग्निहोत्रहोमेन स्वर्गम्भावयेदिति वाक्यार्थबोधः, यत्र कर्ममानान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते, यथा दध्नाजुहोतीत्यत्र होमस्याग्निहोत्रं जुहुयादित्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानं दध्ना होमं

भावयेदिति । यत्र तूभयम प्राप्तं तत्र विशिष्टं विधत्ते, यथा सोमेन यजेतेत्यत्र सोमयागयोरप्राप्तत्वात् सोमविशिष्टयागविधानम्, सोम पदे मत्वर्थलक्षणया सोमवतायोगेनेष्टम्भावयेदिति वाक्यार्थबोधः ।

विधिश्चतुर्विधः उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगविधिश्चेति, तत्र कर्मस्वरूपमात्रबोधकोविधिरुत्पत्तिविधिः, यथाऽग्निहोत्रं जुहोतीति, अत्रविधौ कर्मणः करणत्वेनान्वयः, अग्निहोत्रहोमेनेष्टम्भावयेदिति । अङ्गप्रधानसम्बन्धबोधको विधि र्विनियोगविधिः, यथा दध्नाजुहोतीति, स हि तृतीयया प्रतिपन्नाङ्ग-भावस्य दध्नो होमसम्बन्धं विधत्ते दध्नाहोमं भावयेदिति, गुणविधौ च धात्वर्थस्य साध्यत्वेनान्वयः, क्वचिदाश्रयत्वेनापि, यथा दध्नेन्द्रि-यकामस्य जुहुयादित्यत्र दधिकरणत्वेनेन्द्रियं भावयेत्, तच्च किन्नि-ष्ठमित्याकाङ्क्षायां सन्निधिप्राप्तहोममाश्रयत्वेनान्वेति । एतस्य विधेः सहकारिभूतानि षट् प्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थान-समाख्यारूपाणि, एतत् सहकृतेनानेन विधिना परोद्देशप्रवृतकृति-साध्यत्वरूपं पारार्थ्यापरपर्यायं ज्ञाप्यते, तत्र निरपेक्षो रवः श्रुतिः सा च त्रिविधा विधात्री अभिधात्री विनियोक्त्रीच, तत्राद्या लिङाद्यात्मिका, द्वितीया व्रीह्यादि श्रुतिः, यस्य च शब्दस्य श्रवणा-देव सम्बन्धः प्रतीयते सा विनियोक्त्री, साऽपि त्रिविधा, विभक्ति-रूपा, एकाभिधानरूपा, एकपदरूपाचेति, तत्र विभक्तिश्रुत्याऽङ्गत्वं यथा–व्रीहिभि र्यजेतेति तृतीयाश्रुत्या व्रीहीणां यागाङ्गत्वम्, तदपि पुरोडाशप्रकृतितया, यथा पशोर्हृदयादिरूपहविः प्रकृतितया यागाङ्गत्वम्, अरुणया एकहायन्या गवा सोमं क्रीणातीत्यस्मिन्

वाक्ये अरुणस्यापि तृतीयाश्रुत्या क्रियाङ्गत्वम्, तदपि गोरूपद्रव्यपरिच्छेदद्वारा, न तु साक्षात्, अमूर्त्तत्वात्, व्रीहीन् प्रोक्षतीति प्रोक्षणस्य व्रीह्यङ्गत्वं द्वितीयाश्रुत्या, तच्च प्रोक्षणं न व्रीहिस्वरूपार्थम्, तस्य तेन विनाप्युपपत्तेः, किन्त्वपूर्वसाधनत्वप्रयुक्तम्, व्रीहीनप्रोक्ष्य यागानुष्ठानेऽपूर्वानुपपत्तेः, एवं सर्वेष्वङ्गेष्वपूर्वप्रयुक्तमङ्गत्व बोध्यम्, एवमिमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते इत्यत्र द्वितीयया श्रुत्या मन्त्रस्याश्वाभिधान्यङ्गत्वम्, यदा हवनीयेषु जुहोतीत्याहवनीयस्य होमाङ्गत्वं सप्तमीश्रुत्या। एवमन्योऽपि विभक्तिश्रुत्या विनियोगो ज्ञेयः, पशुना यजेतेत्याख्याताभिहितसंख्याया आर्थीभावनाङ्गत्वं समानाभिधानश्रुतेः, एकपदश्रुत्या च यागाङ्गत्वम्, कर्त्तृपरिच्छेदद्वाराभावनाङ्गत्वं कर्त्ताचाक्षेपलभ्य इति। सेयं श्रुतिर्लिङ्गादिभ्यः प्रवला, लिङ्गादिषु न प्रत्यक्षो विनियोजकः शब्दोऽस्ति, किन्तु कल्प्यः, यावच्चुतैर्विनियोजकः कल्प्यतेतावत् प्रत्यक्षया श्रुत्या विनियोगस्य कृतत्वेन तेषां कल्पकत्वशक्तेर्व्याहतत्वात्, अत एवैन्द्रना लिङ्गान्नेन्द्रोपस्थापनार्थत्वं, किन्तु ऐन्द्रचा गार्हपत्यमुपतिष्ठत इत्यत्र गार्हपत्यमिति द्वितीयाश्रुत्यागार्हपत्योपस्थापनार्थत्वम्। शब्दसामर्थ्यंलिङ्गम्, यदाहुः– 'सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयते' इति, सामर्थ्यंरूढिरेव, तेन समाख्यातो नाभेदः, यौगिकशब्दसमाख्यातो रूढ्यात्मकलिङ्ग शब्दस्य भिन्नत्वात्, तेन बर्हिर्देवसदनंदामीति मन्त्रस्य कुशलवनाङ्गत्वं, न तूलयादिलवनाङ्गत्वम्, तस्य बर्हिर्दामीतिलिङ्गात् तल्लवनं प्रकाशयितुं समर्थत्वात्, एवमन्यत्रापि लिङ्गाद्विनियोगो द्रष्टव्यः, तदिदं लिङ्गं वाक्या-

दिभ्यो बलवत्, अत एव स्योनन्ते सदनं कृणोमीति मन्त्रस्य पुरोडाससदनकरणाङ्गत्वं सदनं कृणोमीति लिङ्गात्, न तु वाक्यात् । समभिव्याहारो वाक्यम्, समभिव्याहारश्च साध्यत्वादिवाचकद्वितीयाद्यभावेऽपि वस्तुतः शेषशेषिवाचकपदयोः सहोच्चारणम्, यथा यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति, अत्र पर्णताजुह्वोः समभिव्याहारादेव पर्णताया जुहवङ्गत्वम् । सेयं पर्णताऽनारभ्याधीताऽपि सर्वप्रकृतिष्वेवान्वेति, न विकृतिषु, तत्र चोदकेनापि तत् प्राप्ति सम्भवात्पौनरुक्त्यापत्तेः, यत्र समग्राङ्गोपदेशः सा प्रकृतिः, यथा दर्शपूर्णमासादिः, तत् प्रकरणे सर्वाङ्गपाठात्, यत्र न सर्वाङ्गोपदेशः सा विकृतिः, यथा सौर्यादिः, तत्र कतिपयानामतिदेशेन प्राप्तत्वात्, अनारभ्य विधिः सामान्यविधिः, तदिदं वाक्यं प्रकरणादिभ्योबलवत्, अत एव इन्द्राग्नी इदं हविरित्यादे रेकवाक्यत्वाद्दर्शाङ्गत्वं, न तु प्रकरणाद्दर्शपूर्णमासाङ्गत्वम् । उभयाकाङ्क्षाप्रकरणम्, यथा प्रयाजादिषु समिधो यजतीत्यादौ वाक्ये फलविशेषस्यानिर्देशात् समिद्यागेन भावयेदिति बोधानन्तरं किमित्युपकार्याकाङ्क्षा, दर्शपूर्णमासवाक्येऽपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेदिति बोधानन्तरं कथमित्युपकारकाङ्क्षा, इत्थञ्चोभयथा प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम्, एतच्च प्रकरणं द्विविधं महाप्रकरणमवान्तरप्रकरणञ्चेति, मुख्यभावनासम्बन्धिप्रकरणं महाप्रकरणम्, अङ्गभावनासम्बन्धिप्रकरणमवान्तरप्रकरणमिति, एतद् ज्ञापकः सन्दशः, एकाङ्गानुवादेन विधीयमानयोरप्यङ्गयोरन्तरालविहितत्वं सन्दंशः । तदिदं

प्रकरणं क्रियाया एव साक्षाद् विनियोजकं, द्रव्यगुणयोस्तु तद् द्वारा, इदञ्च स्थानादिभ्यो बलवत्, अत एवाक्षैर्दिव्यति राजन्यमिति देवनादयो धर्मा अभिषेचनीयसन्निधौ पठिता अपि स्थानान्नतदङ्गं, किन्तु प्रकरणाद्राजसूयाङ्गमिति, देश सामान्यं स्थानम्, तद्द्विविधं पाठसादेशमनुष्ठानसादेश्यं चेति, स्थानं क्रमश्चेत्यनर्थान्तरम्। पाठसादेश्यमपि द्विविधं यथा सन्निधिपाठो यथासङ्ख्यपाठश्चेति, तत्रैन्द्रानमेकादशकपालंनिर्वपेत्, वैश्वानरं द्वादशकपालं निर्वपेदित्येवं क्रमविहितेषु इन्द्राग्नीरोचनादि वेत्यादीनां याज्यानुवाक्यमन्त्राणां यथासङ्ख्यं प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवंरूपो विनियोगो यथासङ्ख्य पाठात्, वैकृताङ्गानां प्राकृताङ्गानुवादे न विहितानां सन्दशपतितानां विकृत्यर्थत्वं सन्निधिपाठात्, पशुधर्माणामग्नीषोमीयार्थत्वमनुष्ठानसादेश्यात्, तच्च स्थानं समाख्यातः प्रबलम्, अत एव शुन्धनमन्त्रः सान्नाप्यपात्राङ्गं पाठसादेश्यात्, न तु पौरोडाशिकमिति समाख्ययापुरोडाशपात्राङ्गम्, समाख्या यौगिकः शब्दः, सा च द्विविधा वैदिकी लौकिकी च, तत्र होतुश्चमसभक्षणाङ्गत्वं होतृचमस इति वैदिकसमाख्यया, अध्वर्योस्तत् तत् पदार्थाङ्गत्वं लौकिकया आध्वर्यवमिति समाख्यया, इति।

तदेवं निरूपितानि सङ्क्षेपतः श्रुत्यादीनि षट् प्रमाणानि। एतत् सहकृतेन विनियोगविधिना सभिदादिभिरूपकृत्यदर्शपूर्णमासाभ्यां यजेतेत्येवंरूपेण यानि नियोज्यन्ते तान्यङ्गानि द्विविधानि सिद्धरूपाणि क्रियारूपाणि चेति, तत्र सिद्धानि जातिद्रव्यसङ्ख्यादीनि, तानि च दृष्टार्थान्येव, क्रियारूपाणि च द्विविधानि, गुण-

कर्माणि प्रधानकर्माणि च, एतान्येव सन्निपत्योपकारकाणि आरादुपकारकाणि चोच्यन्ते, कर्माङ्गद्रव्याद्युद्देशेन विधीयमानं कर्म सन्निपत्योपकारकम्, यथाऽवघातप्रोक्षणादि। द्रव्याद्यनुद्दिश्य केवलं विधीयमानमारादुपकारकं, यथा प्रयाजादि, आरादुपकारकं च परमापूर्वोत्पत्तावेवोपयुज्यते, सन्निपत्योपकारकं तु द्रव्यदेवतासंस्कारद्वारायागस्वरूपेऽप्युपयुज्यते। प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः, सचाऽङ्गवाक्यैकवाक्यतापन्नः प्रधानविधिरेव, सहि साङ्गं प्रधानमनुष्ठापयन् विलम्बे प्रमाणाभावादविलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते, प्रयोगविधिरेव स्वविधेयप्रयोगभावसिध्यर्थं नियतक्रममपि पदार्थविशेषणतया विधत्ते, तत्र क्रमोनामवितितिविशेषः, पौर्वापर्यरूपो वा, तत्र षट् प्रमाणानि। श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि विस्तरेणान्यत्रोपवर्णितानि। कर्मजन्यफलस्वाम्यबोधको विधि रधिकारविधिः, स च यजेत स्वर्गकाम इत्यादिरूपः। प्रयोगसमवेतार्थस्मारकामन्त्राः, तेषां च तादृशार्थस्मारकत्वेनैवार्थवत्त्वं, न तु तदुच्चारणमदृष्टार्थं सम्भवति दृष्टफलकत्वे अदृष्टफलकल्पनाया अन्याय्यत्वात्। न चैव सति वैयर्थ्यम्, मन्त्रैरेव स्मर्त्तव्यमिति नियम विध्याश्रयणात्, नानासाधनसाध्यक्रियायामेकसाधनप्राप्तावप्राप्तस्यापर साधनस्य प्रापको विधिर्नियमविधिः, तदुक्तत्—

'विधिरत्यन्तमप्राप्तौ, नियमः पाक्षिके सति।
तत्र चान्यत्र प्राप्तौ, परिसङ्ख्येति गीयते ॥१॥ इति।

नामधेयानां च विधेयार्थपरिच्छेदकतयाऽर्थवत्त्वम् यथा उद्भिदा यजेत पशुकाम इत्यत्रोद्भिच्छब्दो नामधेयम्, तेन च

विधेयार्थे परिच्छेदः क्रियेत। पुरुषस्य निवर्त्तकं वाक्यं निषेधः, निषेधवाक्यानामनर्थहेतुक्रियानिवर्त्तकत्वेनैवार्थवत्त्वात्। प्राशस्त्यनिन्दान्यतरपरंवाकयमर्थवादः, तस्य च लक्षणया प्रयोजनवदर्थपर्यवसानम्, तथाहि अर्थवादवाकयं हि स्वार्थप्रतिपादने प्रयोजनाभावाद्विधेयनिषेध्ययोः प्राशस्त्यनिन्दितत्वे लक्षणया प्रतिपादयति,स्वार्थमात्रपरत्वे आनर्थकच्यप्रसङ्गात्, आम्नायस्य हि-क्रियार्थत्वात्, न चेष्टापत्तिः, स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिना सकलवेदाध्ययनं कर्त्तव्यमिति बोधयता सर्ववेदस्य प्रयोजनवदर्थ-पर्यवसायित्वं सूचयतो पात्तत्वेनानर्थकच्यानुपपत्तेः, स द्विविधो विधिशेषो निषेधशेषश्चेति, त वायव्यं श्वतमालभेत भूतिकाम इत्यादिविधिशेषस्य वायुर्वैक्षेपिष्ठादेवतेत्यादे विधेयार्थप्राशस्त्य-बोधकतयाऽर्थवत्त्वम्, बर्हिषि रजतं न देयमित्यादिनिषेधशेषस्य सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमित्यादेर्निषेधस्य निन्दितत्व-बोधकतयाऽर्थवत्त्वम्, स पुनस्त्रिधा, तदुक्तम्—

'विरोधे गुणवादः स्यादनुवादोऽवधारिते।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधामतः ॥१॥' इति।

अस्यार्थः प्रमाणान्तरविरोधे सत्यर्थवादो गुणवादः, यथाऽऽदित्यो यूप इत्यादि, यूपे आदित्याभेदस्य प्रत्यक्षबाधितत्वादादित्यवदुज्जवलत्वरूपगुणोऽनेन लक्षणया प्रतिपाद्यते, प्रमाणान्तरावगतार्थ-बोधकोऽनुवादः, यथाऽग्निर्हिमस्य भेषजमित्यत्र हिमविरोधित्व-स्याग्नौ प्रत्यक्षावगतत्वात्, प्रमाणान्तरविरोधतत् प्राप्तिरहितार्थ-बोधको वादो भूतार्थवादः, यथेन्द्रो वृत्राय वज्रमुदयच्छदित्यादि।

तदित्थं कर्मप्रधानत्वं पूर्वमीमांसाया उपदर्शितम्, अत्र प्राभाकराः प्रत्यक्षानुमानोपमानागमार्थापत्तयः पञ्च प्रमाणानि मन्यन्ते, भाट्टाः पुनरनुपलब्धिरप्यधिकं प्रमाणामिति षट् प्रमाणानि स्वीकुर्वन्ति, सर्वज्ञं न कञ्चनमुरीकुर्वन्ति । सर्वज्ञो दृश्यते तावन् नेदानीमस्मदादिभिः । दृष्टो न चैकदेशोऽस्तिलिङ्गं योवाऽनुमापयेत् ॥ १ ॥ इत्यादिपद्यसन्दर्भेण भट्टेन सर्वज्ञखण्डनमाविष्कृतमिति प्रभाकरमते भ्रमात्मकं ज्ञानं नास्ति शुक्तिरजतयोरतत्प्रत्यक्षस्मरणयोर्भेदाख्यातिरेव, ज्ञानं च स्वप्रकाशं प्रामाण्य च स्वाश्रयेणैव गृह्यत इति स्वतो ग्राह्यम् पदानामितरान्वितजातावेवशक्तिः तत्रान्वये कुब्जशक्तिः, द्वारमित्यादौ न पिधेहीत्यादिपदाध्यारः किन्त्वर्थाध्याहारादेवान्वयबोधः, कारकं च सर्वं क्रिययैवान्वेति, नीलं घटमानयेत्यादौ नीलकर्मकत्वादेरानयनादिक्रियया सहैव पूर्वमन्वयबोधः, नीलघटाभेदान्वयबोधस्तु पाष्टिकः, नित्यकर्मणां पण्डापूर्वमेव फलम्, द्रव्यगुणकर्मसामान्यसंख्यासमवायसादृश्यशक्तयोऽष्टौ पदार्थाः, अभावस्तु पदार्थान्तरं न भवति, किन्तु तत् तदधिकरणज्ञानमेव, तदुक्तं "दृष्टस्तावदयं घटोऽत्र निपतन् दृष्टस्तथा मुद्गरो, दृष्टा कर्परसंहतिः परमितोऽभावो न दृष्टोऽपरः । तेनाभाव इति श्रुतिः क्वनिहिता किंवाऽत्र तत् कारणं, स्वाधीनाकलशस्य केवलमियं दृष्टा कपालावली ॥१॥" इति अन्यत्रापि

"गुरुर्धियमभावस्य स्थाने स्थानेऽभिषिक्तवान् । प्रसिद्ध एव लोकेऽस्मिन् बुद्धबन्धुः प्रभाकरः ॥१॥" इति प्रभाकरस्योपहासः कृतः, अन्विताभिधानवादश्चेति ।

भट्टमते ज्ञानमतीन्द्रियं, ज्ञानजन्यज्ञातता प्रत्यक्षा, तल्लिङ्ग-कानुमानं यथा ज्ञानस्य ग्राहकं तथा तद्गतप्रामाण्यस्यापीति प्रामाण्यं स्वतो ग्राह्यं, जातावेवशक्तिः व्यक्तयस्त्वाक्षेपलभ्याः, यत्र च नैकमपि पदं तत्राप्यन्वयबोधः, पदार्था एवान्वयबोधञ्जनयन्ति, अत एव 'पश्यतः श्वेतमारूपं हेषाशब्दञ्च शृणवतः। खुरविक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः ॥१॥' इति, पदाध्याहार एवाभिमतः, तेन द्वारमित्यादौ पिधेहीत्यादिक्रियापदाध्याहार आवश्यकः, अभिहिताः पदार्था अन्वयबोधञ्जनयन्तीत्यभिहितान्वयवादः, द्रव्यगुणकर्मसामान्यरूपाश्चत्वारः पदार्थाः, अभावस्त्वधिकरणस्व-रूपएवेति, मुरारिमिश्रमतेऽनुव्यवसाये न ज्ञानं तद् गत प्रामाण्यञ्च गृह्यत इति प्रामाण्यं स्वतोग्राह्यमिति पूर्वमीमांसामतसंक्षेपः। अथोत्तरमीमांसा एतन्मते सच्चिदानन्दाद्वय ब्रह्मैव परमार्थसत्, अज्ञानमविद्यामायादिशब्दवाच्यं सदसद्भ्यामनिर्वचनीयं सत्त्व-रजस्तमोगुणात्मकं ज्ञानविरोधिभावात्मकं ब्रह्मविषयकं च, समष्टिरूपं व्यष्टिरूपं च, अजामेकामित्यादिश्रुतेः समष्टिरूपमेकं, सत्त्वप्रधानसमष्टिरूपाविद्योपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वा-दिगुणकं, अन्तर्यामिजगत्कारणमीश्वर इति च व्यपदिश्यते, अस्येवं समष्टिः सकलकारणत्वात् कारणशरीरं आनन्दमय कोशः सुषुप्ति-रिति, व्यष्टिरूपञ्च तदनेकं, इन्द्रोमायाभिः पुरुरूपईयते इत्यादि श्रुतेः, व्यष्टिरूपाचाविद्यामलिनसत्त्वप्रधाना, तदुपहितं चैतन्य मल्पज्ञत्वानीश्वरत्वादिगुणकमज्ञ इत्युच्यते, प्राज्ञोऽयं, अस्येयमहङ्का-रादिकारणत्वात् कारणशरीरमानन्दमयकोशः सुषुप्तिः स्थूलसूक्ष्म-शरीरलयस्थानञ्च। अनयो र्व्यष्टि समष्टयो र्वनवृक्षयोरिवाभेदः,

एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरिवाभेदः, एष सर्वेश्वर इति श्रुतेः, अनयोरज्ञानतदुपहितचैतन्ययोराधारभूतमनुपहितचैतन्यं तुरीयम्, 'शिवमद्वैतं चतुर्थं मन्यन्ते' इति श्रुतेः, इदमेव तुरीयं शुद्धं चैतन्यमज्ञानादितदुपहितचैतन्याभ्यामविविक्तं सत् 'सर्वं ब्रह्मैव' इत्यादेः 'तत्त्वमसि' इत्यादे र्वा महावाक्यस्य वाच्यं, विविक्तं सल्लक्ष्यमिति चोच्यते, इदञ्चाज्ञानमावरणविक्षेपशक्तिद्वयवत्, तत्रावरणशक्तिराच्छादनसामर्थ्यम्, अनयाऽऽवृतस्यात्मनः कर्त्तृत्वादिकं रज्जोस्सर्पत्वमिव, विक्षेपशक्तिश्च यथा रज्जवज्ञानं स्वावृतरज्जौ सर्पादिकमुत्पादयति, एवमज्ञानमपि स्वावृतात्मनि गगनादिप्रपञ्चमुत्पादयति येन तादृशसामर्थ्यम्, तदुक्तम् 'विक्षेपशक्तिर्लिङ्गादि-ब्रह्माण्डान्तं जगत्सृजेत्' इति, शक्तिद्वयवज्ञानोपहितचैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतया चोपादानं भवति, ततस्तमः प्रधानशक्तिमदज्ञानोपहितचैतन्यादाकाशम्, आकाशाद् वायुः, वायोरग्निः, अग्ने रापः, अद्भ्यः पृथिवी चोत्पद्यते, "एतस्मादाकाशः सम्भूतः" इत्यादिश्रुतेः, एतेषु जाड्याधिकचदर्शनादेतत्कारणस्य तमः प्राधान्यम्, सत्त्वरजस्तमांस्यपि कारणगुणक्रमेणैतेष्वाकाशादिषूत्पद्यन्ते, एतान्येव पञ्चभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यते, एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते, सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि, अवयवाज्ञानेन्द्रियपञ्चकं बुद्धिमनसोकर्मन्द्रियपञ्चकं वायुपञ्चकञ्चेति, श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि ज्ञानेन्द्रियाणि, एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक् पृथगुत्पद्यन्ते,

बुद्धिर्निश्चयात्मिकान्त करणवृत्तिः, सङ्कल्पविकल्पात्मिकान्त करणवृत्ति र्मनः, एतयोरेव चित्ताहङ्कारयोरन्तर्भावः, एते च गगनादिगत सात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यते । एषां प्रकाशात्मकत्वात् सात्त्विकांशकार्यत्वम्, इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता सती विज्ञानमयकोशो भवति, अयं कर्त्तृत्वभोक्तृत्वाभिमानित्वेन लोकद्वयगामी व्यावहारिको जीव इत्युच्यते, मनस्तुकर्मेन्द्रियैस्सह मनोमयकोशः ।

कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थानि, एतान्याकाशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक् पृथगुत्पद्यन्ते, वायवः प्राणापानोदानसमानव्यानाः, एते चाकाशादिगतरजोंशेभ्यो मिलितेभ्य उत्पद्यन्ते, इदं प्राणादिपञ्चक कर्मेन्द्रियसहितं प्राणमयकोश उच्यते, अस्य क्रियात्मकत्वेन रजोंशकार्यम्, एषु कोशेषु विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः, मनोमय इच्छाशक्तिमान् कर्त्तृरूपः, प्राणमयः क्रियाशक्तिमान् कार्यरूपः, एतत् कोशत्रयं मिलितं सूक्ष्मशरीरमुच्यते, अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद् वा समष्टिः, अनेकबुद्धिविषयतया वृक्षवज्जलवद् वाव्यष्टिः, समष्ट्युपहितं चैतन्यं सूत्रात्माहिरण्यगर्भः प्राण इति चोच्यते, सर्वत्रानुस्यूतत्वाज्ज्ञानक्रियाशक्तिमदुपहितत्वाच्चास्यैषा समष्टिः, स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात् स्वप्नोऽत एव स्थूलप्रपञ्चलस्थानम्, एतद् व्यष्ट्युपहितं चैतन्यं तैजसः, तेजोमयान्तः करणोपहितत्वात्, अस्यापीयं व्यष्टिः, स्थूलशरीरापेक्षया सूक्ष्मत्वादिहेतोरेव सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात् स्वप्नः स्थूलशरीर-

लयस्थानम्, एतौ सूत्रात्मतैजसाविदानीं मनोवृत्तिभिः सूक्ष्मविषया-ननुभवतः, "प्रविविक्तभुक् तैजसः" इति श्रुतेः, अत्रापि व्यष्टि-समष्टयोस्तदुपहितसूत्रात्मतैजसयो र्वनवृक्षवत्तदवच्छिन्नाकाशवच्चाभेदः, एवं सूक्ष्मशरीरोत्पत्तिः,स्थूलभूतानि च पञ्चीकृतानि, पञ्चकरणन्त्वाकाशादिपञ्चकमेकैकं द्विधाविभज्यसमं तेषु दशसु भागेषु प्राथमिकान् पञ्चभागान् प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां चतुर्णां भागानां स्वस्वद्वितीयभागपरित्यागेन भागान्तरेषु संयोजनम्, त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणत्वान्नास्या प्रामाण्यम्, पञ्चानां पञ्चात्मकत्वे तुल्येऽपि स्वार्धभागेतराष्टमभागाभ्यां वैशिष्टयात् तद्व्यपदेशः इत्याकाशादीनां नियतव्यपदेशव्यवस्था। तदानीमाकाशे शब्दोऽभिव्यज्यते, वायौ शब्दस्पर्शौ, अग्नौ शब्दस्पर्शरूपाणि, अप्सु शब्दस्पर्शरूपरसाः, पृथिव्यां शब्दस्पर्शरूपरसगन्धाः, एतेभ्यः पञ्चीकृतेभ्यः चतुर्दशानां लोकानां तदन्तर्गतानां स्थूलशरीराणाञ्चोत्पत्तिः, शरीराणि मनुष्यपक्षियूकावृक्षादीनां जरायुजाण्डजस्वेदजोद्भिज्जाख्यानि, अत्रापि चतुर्विधस्थूलशरीरमेकानेकबुद्धिविषयतया समष्टिर्व्यष्टिश्च, एतत् समष्टयुपहितं चैतन्यं वैश्वानर इति विराडिति चोच्यते, अस्यैषा स्थूलशरीरमन्नविकारत्वादन्नमयकोशः, स्थूलभोगायतनत्वाज्जागरश्च, एतद्व्यष्टयुपहितं चैतन्यं विश्वः, अस्याप्येषा स्थूलशरीरमन्नविकारत्वादिहेतोरन्नमयकोशो जाग्रदित्युच्यते, तदेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन क्रमाच्छब्दस्पर्शरूपरसगन्धानग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमान्नियन्त्रि-

तेन वागादीन्द्रियपञ्चकेन क्रमाद्वचनादानगमनविसर्गानन्दांश्चन्द्राच्युतचतुर्मुखशङ्करैः क्रमान्नियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताख्येनान्तरिन्द्रियचतुष्केण क्रमात् सङ्कल्पनिश्चयाहङ्कार्यरचित्तांश्च स्थूलविषयाननुभवतः, "जागरितस्थानोबहिः प्राज्ञ इत्यादिश्रुतेः, अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितयो विश्ववैश्वानरयोश्च पूर्ववदभेदः, एवं पञ्चीकृतेभ्यो भूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः। एषां स्थूलसूक्ष्मकारणप्रपञ्चानामपि समष्टिरेको महान् प्रपञ्चो भवति, एतदुपहितं वैश्वानरादीश्वरपर्यन्तं चैतन्यमपि पूर्ववदेकमेव, अयमर्थाध्यारोपः, एवं प्रत्यगात्मनि चार्वाकाद्यभिमतः स्थूलशरीराद्यध्यारोपोऽपि द्रष्टव्यः। अथापवादो नाम रज्जुविवर्त्तसर्वस्य रज्जुमात्रत्ववद्वस्तुविवर्त्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्, तथाहि भोगायतनचतुर्विधशरीर-भोग्यरूपान्नादि-तदाश्रयचतुर्दशभुवन-तदाश्रयब्रह्माण्डादि सर्वं कारणीभूतपञ्चीकृतभूतमात्रं भवति, शब्दादिविषयसहितानिपञ्चीकृतभूतजातानि-सूक्ष्मशरीरजातं चैतत् सर्वं कारणरूपापञ्चीकृतभूतमात्रं भवति, एतानि सत्त्वादिगुणसहितान्यपञ्चीकृतान्युत्पत्तिव्युत्क्रमेणतत्कारणभूताज्ञानोपहितचैतन्यमात्रं भवति, एतदज्ञानमज्ञानोपहितचैतन्यं चेश्वरादिकमेतदाधारभूतानुपहितचैतन्यतुरीयब्रह्मसमापन्नं भवति, आभ्यामध्यारोपापवादाभ्यां तत्त्वं पदार्थावपि शोधितौ स्तः, अज्ञानादिसमष्टितदुपहितसर्वज्ञत्वादिविशिष्टचैतन्यतदनुपहितचैतन्यलक्षणत्रयस्य तप्तावः पिण्डवदेकत्वेनावभासमानस्य तत् पदवाच्यार्थत्वात्, अज्ञानादिव्यष्टितदुपहितासर्वज्ञत्वादिविशिष्टतदनुप-

हितचैतन्यलक्षणत्रयस्य च प्रागवदेकीभूतस्य त्वंपदवाच्यार्थत्वात्, एतदुपहिताधारानुपहितप्रत्यगानन्दतुरीयचैतन्यस्य च तत्त्वं पद-लक्ष्यार्थत्वात्, अत्र तत्त्वमसीति वाक्यं सम्बन्धत्रयेणाखण्डार्थं बोधयति, सम्बन्धत्रयं नामपदयोः समानाधिकरण्यं, पदार्थयो विशेषणविशेष्यभावः, पदार्थप्रत्यगात्मलक्षणयो र्लक्ष्यलक्षणभावश्च, तदुक्तं–"सामानाधिकरण्यं च, विशेषण विशेष्यता ।

लक्ष्यलक्षणसम्बन्धः, पदार्थप्रत्यगात्मनाम् ॥१॥ इति,

तत्र समानाधिकरण्यसम्बन्धस्तावद्यथा–सोयं देवदत्त इति वाक्ये तत् कालविशिष्टदेवदत्तवाचकशब्दस्यैतत्कालविशिष्ट वाचकायं शब्दस्य चैकस्मिन् पिण्डे तात्पर्यसम्बन्धः, तथा तत्त्व-मसीतिवाक्ये परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्ष-त्वादिविशिष्टचैतन्यवाचकत्वंपदस्य चैकस्मिन्नर्थे तात्पर्यसम्बन्धः, विशेषणविशेष्यभावस्तु यथा तत्र स शब्दार्थंतत्काल विशिष्टदेवदत्तस्यायं पदार्थैतत्कालविशिष्टदेवदत्तस्य चान्योन्य-भेदव्यावर्त्तकतया, तथाऽत्रापि वाक्ये तत् पदार्थपरोक्षत्वादि-विशिष्टचैतन्यस्यत्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्य-भेदव्यावर्त्तकतयाद्रष्टव्यः। लक्ष्यलक्षणभावस्तु यथा तत्र स शब्दायं शब्दयोस्तदर्थयो र्वाविरुद्धतत् कालैतत् कालविशिष्टपरित्यागेना-विरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावस्तथाऽत्रापि तत्त्वम्पदयोस्तद-र्थयो र्वा परोक्षत्वापरोक्षत्वाविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः, इयमेव भागलक्षणेत्युच्यते, अस्मिन् वाक्ये नीलमुत्पलमिति वाक्य इव वाक्यार्थो न सङ्गच्छते, तत्र गुण-

द्रव्यवाचिनो नीलोत्पलपदयोश्शुक्लपटादिव्यावर्तकतयाऽन्योन्य-विशेषणविशेष्यभावसंसर्गस्यान्यतरस्य तदैक्यस्य वा वाक्यार्थ-त्वोपपत्तावप्यत्र तत् पदार्थपरोक्षत्वादिविशिष्टचैतन्यत्वं पदार्था-परोक्षत्वादिविशिष्टचैतन्ययोरन्यव्यावर्त्तकतया विशेषणविशेष्यभा-वसंसर्गस्य विशिष्टैक्यस्य वा प्रत्यक्षादिप्रमाणविरोधेन वाक्यार्थ-त्वानुपपत्तेः, तदिहलक्षणाऽऽवश्यकी, सा च गङ्गायां घोष इत्यत्रेव न जहती, तत्र गङ्गाघोषयोराधाराधेयभावानुपपत्त्या वाक्यार्थ-बाधात् तं परित्यज्य तत् सम्बन्धितीरलक्षणाया युक्तत्वेऽप्यत्र परोक्षापरोक्षचैतन्यैकत्वस्य वाक्यार्थस्य भागमात्रे विरोधाद-विरुद्धभागपरित्यागेनान्यलक्षणाया अयुक्तत्वात्, न च गङ्गापदं स्वार्थपरित्यागेन तीरपदार्थमिव प्रकृते तत्पदं त्वं पदं वा स्वार्थं-परित्यागेन त्वं पदार्थं तत् पदार्थं वा लक्षयत्विति कुतो न जहल्ल-क्षणेति वाच्यम्, तत्र तीरपदाश्रवणेन तदर्थप्रतीतौ लक्षणया तत् प्रतीत्यपेक्षयामपि प्रकृते तत्त्वं पदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात्, नापि शोणो धावतीतिवदजहल्लक्षणाप्यत्र संभवति, तत्र शोणगुणगमन-लक्षणय वाक्यार्थस्य विरुद्धत्वात् तदपरित्यागेन तत् सम्बन्धि यत् किञ्चिल्लक्षणायामपि विरोधापरिहारात्, न च तत् पदं त्वं पदं वा स्ववाच्यार्थविरुद्धांशं परित्यज्यां शान्तरसहितं तत् पदार्थं त्वंपदार्थं-वा लक्षयतु कुतः प्रकारान्तरेण भागलक्षणाङ्गीकार इति वाच्यम्, एकेन पदेन स्वार्थान्तरोभयलक्षणाया असम्भवात्, पदान्तरेण तदर्थ प्रतीते लक्षणया पुनः प्रतीत्यपेक्षाया अभावाच्च, तस्माद्यथा सोऽयं

देवदत्त इति वाकचं तदर्थोवा तत् कालैतत्कालविशिष्टदेवदत्त-लक्षणस्य वाकर्चार्थस्यांशे विरोधाद् विरुद्धतत्कालैतत्कालविशिष्टांशं परित्यज्याविरुद्धदेवदत्तांशमात्रेलक्षयति, तथा तत्त्वमसीति वाकचं तदर्थो वा परोक्षत्वापरोक्षत्वविशिष्टचैतन्यैकयलक्षणस्य वाकयार्थस्यांशे विरुद्धत्वाद्विरुद्धं परोक्षत्वापरोक्षत्वांशं परित्यज्याविरुद्धं चिदंशमात्रं लक्षयतीत्यभ्युपेयम्, एवं तत्त्वमसीति वाकयार्थे बोधितेऽहंब्रह्मास्मीति वाकयादधिकारिणोऽहं नित्यशुद्ध-बुद्धमुक्तसत्यस्वभावपरमानन्दाद्वयंब्रह्मास्मीत्यत्यखण्डाकाराकारिता चित्तवृत्तिसदेति, सातुचित्प्रतिबिम्बसहिता सतीप्रत्यगभिन्नमज्ञातं परब्रह्मविषयीकृत्यतद्गताज्ञानमेव बाधते, तदा पटकारणतन्तुदाहे पटदाहवदखिलकारणेऽज्ञाने बाधिते तत् कार्यस्याखिलस्य बाधितत्वात् तदन्तर्भूताऽखण्डाकारकारिता चित्तवृत्तिरपि बाधिता भवति, तत् प्रतिबिम्बितं चतन्यमप्यादित्यप्रभया तदवभासनासमर्थदीपप्रभावत् स्वयं प्रकाशमानप्रत्यगभिन्न परब्रह्मावभासनानर्हतया तेनाभिभूतंसत् स्वोपाधिभूताखण्डवृत्ते र्बाधितत्वाद्दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत् प्रत्यगभिन्नं परब्रह्ममात्रं भवति, एवं सति "मनसैवानुद्रष्टव्यं" यन्मनसानमनुते' इत्यनयोरविरोधः, वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वप्रतिषेधात्, तदुक्तम्-"फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् ॥ ब्रह्मण्यज्ञान नाशायवृत्तिव्याप्तिरपेक्षिता ॥१॥" इति, "स्वयं प्रकाशमानत्वान्नाभास उपयुज्यते" इति च घटादिजडपदार्थाकाराकारितचित्त-वृत्तिस्तदज्ञातघटादिविषयीकरणेन तदज्ञाननिरसन पुरस्सरं

स्वगतचिदाभासेन जडं घटादिकमपि भासयति, दीपप्रभामण्डलमिव तमःस्थं घटादिकं विषयीकृत्य तद्गतमोनिरसपूर्वं स्वप्रभयाघटादिकमित्यस्ति विशेषः, एतदखण्डचिदेकाकारवृत्तेः शमादिगुणानांचाभ्यासादेवस्वरूपविश्रान्तिर्भवति, न तु सकृज्ज्ञानमात्रात्। तदुक्तं वसिष्ठेन "न यावत्सममभ्यस्तौ ज्ञानसत्पुरुषक्रमौ। एकोऽपिनैतयोस्तावत् पुरुषस्येह सिध्यति ॥ १ ॥" इति, यावद्यावदन्तर्मुखः सन्नात्मतत्त्वं पश्यति तावत् तावच्छमादिमान् न भवति 'यावद्यावदन्तर्मुखः सन् शमादिमान् भवति तावत् तावदात्मतत्त्वमीक्षते' इत्यनुभवसिद्धत्वान्निर्विकल्पचिदेदाकाकारान्तः करणवृत्त्यावृत्तिलक्षणज्ञानाभ्यासेन सहैव सत्पुरुषक्रमसंज्ञितं शमाद्युपेतात्मविचारमावर्त्तयेदित्येतदर्थः, शमादयः-"शम-दमोपरति-तितिक्षा-समाधानश्रद्धाः' तत्र शमः श्रवणादिव्यतिरिक्तविषयेभ्यो मनोविनिग्रहः, दमो बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्त्तनम्। उपरति विहितानां कर्मणां समाधिव्याक्षेपकत्वे विधिना परित्यागः। तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता। निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्। गुरुवेदादिवाक्येषु विश्वासः श्रद्धा। श्रवण-मनन-निदिध्यासन समाध्यनुष्ठानानि आत्मविचारः, श्रवणं नाम षड्भिर्लिङ्गैरशेषवेदान्तानाम द्वितीयवस्तुनि तात्पर्यावधारणम्, लिङ्गानि तु उपक्रमोपसहाराभ्यासापूर्वताफलार्थवादोपपत्त्याख्यानि, प्रकरणप्रतिपाद्यस्य तदाद्यन्तयो रूपपादनमुपक्रमोपसंहारौ, यथा छान्दोग्ये षष्ठे प्रकरणे "प्रतिपाद्यस्याद्वितीयवस्तुन एकमेवाद्वितीयमित्यादावेतदात्म्यमित्यन्ते च

प्रतिपादनम्"। प्रकरणप्रतिपाद्यस्य तन्मध्ये पौनः पुन्येन प्रतिपादनमभ्यासः, यथा तत्रैव "अद्वितीयवस्तुनस्तत्त्वमसीति नवकृत्वः प्रतिपादनम्" प्रकरणप्रतिपाद्यस्य प्रमाणान्तराविषयीकरणम्। फलन्तु प्रकरणप्रतिपाद्यार्थज्ञानस्य तदनुष्ठानस्य वा तत्र श्रूयमाणं प्रयोजनम्, यथा तत्र "आचार्यवान् पुरुषोवेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ च सम्पत्स्ये" इति अद्वितीयवस्तु ज्ञानस्य तत् प्राप्तिः प्रयोजनं श्रूयते। प्रकरणप्रतिपाद्यस्य प्रशंसनमर्थवादः, यथा तत्र "येनाश्रुतं श्रुतं भवति, अमतं मतं, अविज्ञातं विज्ञातम्" इत्यद्वितीयवस्तुप्रशंसनम्। प्रकरणप्रतिपाद्यार्थसाधने तत्र श्रूयमाणा युक्तिरुपपत्तिः, यथा तत्र "यथा सौम्य एकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारम्भवणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वं युक्तिः श्रूयते॥ मननं तु श्रुतस्याद्वितीयवस्तुनो वेदान्तानुगुणयुक्तिभिरनवरतमनुचिन्तनम्॥ विजातीयदेहादिप्रत्ययतिरस्कारेणाद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनम्। समाधिर्द्विविधः सविकल्पको निर्विकल्पकश्च, आद्यो ज्ञातृज्ञानादिविकल्पलयानपेक्षतयाऽद्वितीये वस्तुनि तदाकारकारितया वृत्तेरवस्थानं, मृन्मयगजादिभानेऽपि मृज्ज्ञानवद् द्वैतभानेऽप्यद्वैतवस्तुभानाभ्युपगमः, तदुक्तमभिनीये—

"दृशि स्वरूपं गगनोपमं वरं, यत् तद् विभातं त्वजमेकमक्षरम्॥
अलेपकं सर्वगतं यदद्वयं, तदेव चाहं सतत विमुक्तः॥१॥" इति।

अन्यस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाऽद्वितीयवस्तुनि तदाकारा-

कारिताया वृत्ते रतितरामेकीभावेनावस्थानम्, तदा जलाकारा कारित लवणानवभासे जलमात्रावभासवद द्वितीयवस्त्वाकारा-कारितचित्तवृत्त्य नवभासेऽद्वितीयवस्तुमात्रमवभासते, ततश्चास्य सुषुप्तेनर्भेदः, उभयत्र वृत्त्यभाने समानेऽपि तद् वृत्ति सद्भावा-सद्भावमात्रेण तयो र्भेदोपपत्तेः, अस्याङ्गानि "यमनियमासन-प्राणायामप्रत्याहारधारणाध्यानसमाधयः" तत्र "अहिंसासत्यास्तेय-ब्रह्मचर्यापरिग्रहाः यमाः" 'शौच-सन्तोष-तपः स्वाध्यायेश्वरप्रणि-धानानि नियमाः।' पद्मकस्वस्तिकादीन्यासनानि, रेचक-कुम्भक-पूरकाः प्राणायामाः, इन्द्रियाणां स्वविषयेभ्यो निवर्त्तनं प्रत्याहारः, अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा। तत्रैव विच्छिद्यविच्छि-द्यान्तन्तरिन्द्रियवृत्तिप्रवाहो ध्यानम्। समाधिस्तु सविकल्प एव। अस्य निर्विकल्पस्याङ्गिनो लय-विक्षेप-कषाय-रसास्वादलक्षणाश्च-त्वारो विघ्ना भवन्ति, लयस्तावदखण्डवस्त्वनवलम्बनेन चित्तवृत्ते र्निद्रा, तदवलम्बनेन चित्तवृत्त रन्यावलम्बनं विक्षेपः, लयविक्षेपा-भावेऽपि चित्तवृत्ते रागादिवासनया स्तब्धोभावादखण्डवस्त्वलम्बनं कषायः, समाध्यारम्भसमये व्युत्थाने वासविकल्पकानन्दास्वादनं रसास्वादः। एतद्विघ्नचतुष्टयरहितं चित्तं निर्वातदीपवदचलं सदखण्डचैतन्यमात्रं यदाऽवतिष्ठते तदा निर्विघ्नसमाधिरित्युच्यते, तदुक्तं–"लये संबोधयेच्चित्तं विक्षेपं समयेत् पुनः। सकषायं विजा-नीयात् समाध्याप्तं न चालयेत्॥१॥ नास्वादयेद्रसं तत्र निःसंज्ञप्रज्ञया भवेत्॥" इति, "यथा दीपो निवातस्थोनेङ्गतेसोपमास्मृता" इति च, उक्तस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा तत् कार्यं

सञ्चित कर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलसम्बन्धरहितो व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेणाध्यादिभाजनेनेन्द्रियेणाशनाया पिपासाशोकमोहभाजनेनान्तः करणेन पूर्वपूर्ववासनया क्रियमाणानि भुञ्जानोऽपि च ज्ञानाविरुद्धारब्ध फलानि पश्यन्नपि न पश्यन्तीन्द्रजालवत् 'स चक्षुरचक्षुरिवसकर्णोऽकर्णः' इत्यादिश्रुतेः ईदृशश्च ब्रह्मणो जीवन्मुक्त इत्युच्यते, अस्य ज्ञानात् पूर्वं विद्यमानानामाहारविहारादीनामनुवृत्तिवच्छुभवासनानामेवानुवृत्ति र्भवति, शुभाशुभयोरौदास्यं वा, तदुक्तं-

"बुद्धाद्वैतसतत्त्वस्य, यथेष्टाचरणं यदि ।
शुनां तत्त्वदृशां चैवकोभेदोऽशुचिभक्षण ॥१॥" इति,

तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः सद्‌गुणाश्चासङ्कालरवदनुवर्त्तन्ते, तदुक्तं-

"उत्पन्ना त्मावबोधस्य अद्वेष्टृत्वादयो गुणाः ।
अशेषतो भवन्त्यस्य नतुसाधनरूपिणः ॥१॥" इति,

किं बहुना अयं देहमात्रामात्रार्थी सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नन्तः करणाभासादीनामवभासकः सँस्तदवसाने प्रत्यगानन्दपरब्रह्मणि प्राणेलीनेऽज्ञानतत्कार्यसंस्काराणामपि विनाशात् परं कैवल्यमानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डं ब्रह्मावतिष्ठते, "न तस्य प्राणा उत्क्रामन्ति अतत्रैव समवलीयन्ते विमुक्तश्च विमुच्यते' इति श्रुतेरिति । एतन् मते त्रिविधं सत्त्वं पारमार्थिकं व्यावहारिकं, प्रातीतिकञ्च, आद्यं ब्रह्मणस्त्रिकालाबाध्यत्वात्, द्वितीयं मूलाविद्या तत् कार्याणां, तृतीयं शुक्तयज्ञानादिकार्याणां

शुक्ति रजतादीनां प्रमाणानि च प्रत्यक्षानुमानोपमानागमार्थापत्त्य-नुपलब्ध्याख्यानि, प्रामाण्यं चतेषां स्वतोग्राह्यमप्रामाण्यञ्च परतः, वेदश्चापौरुषेयः, अनिर्वचनीयतावादो दृष्टिसृष्टिवादादयो बहुभेदा अन्यत्रोपदर्शिता इत्युत्तरमीमांसा संक्षेपः ।।

श्रीमल्लावण्यसूरीणां प्रशिष्येण सुधीमता ।।
सुशीलेन सुशीलेन मीमांसाद्वयमीरितम् ।।१।।

सुशीलसूरिणा नाम्ना, षट्दर्शनस्य वर्णने ।
मिमांसादर्शनं प्रोक्त-मिमं संक्षेपतोऽत्र हि ।।२।।

।। इति पूर्वोत्तरमीमांसादर्शनम् ।।

卐

#卐 ॥ अथ बौद्धदर्शनम् ॥ 卐

सर्वदर्शनसिद्धान्तविज्ञलावण्यसूरितः ॥
प्राप्तज्ञानलवो बौद्धं दर्शनं वच्मि साम्प्रतम् ॥१॥

चतुर्णामार्यसत्यानां, दुःखादीनां प्रदर्शकम् ॥
दर्शनं सर्वभावानां क्षणिकत्वसमर्थकम् ॥२॥

अर्थक्रियाकारितैव, सत्ता नाक्षणिकाश्रिता ॥
कुर्वद्रूपत्वमात्रेण हेतुतानान्यधर्मतः ॥३॥

प्रत्यक्षमनुमानञ्च, मानं द्वेधा नचापरम् ॥
कल्पनापोढमभ्रान्तं, प्रत्यक्षं निर्विकल्पकम् ॥४॥

त्रिरूपलिङ्गजनितमनुमानं तु लिङ्गिनः ॥
द्वावेवावयवौ नान्ये, नामजात्यादयो मताः ॥५॥

चतुर्णां चतुः संख्यकानाम्, आर्यसत्यानाम् आर्यसत्यसंज्ञकानां, दुःखादीनां दुःख-समुदय-मार्ग-निरोधरूपाणां, प्रदर्शकं प्रकर्षेण ज्ञापकं, सर्वभावानां सर्वपदार्थानां, क्षणिकत्वसमर्थकं क्षणिकत्व-साधकयुक्तिप्रकरकरम्बितं, दर्शनं बौद्धदर्शनम् ।

अत्र विज्ञान-वेदना-संज्ञा-संस्कार-रूप-स्कन्धभेदेन पञ्चस्कन्धा दुःखम्, तत्र सर्वक्षणिकत्वज्ञानं विज्ञानस्कन्धः, तदुक्तं-'यत्सत् तत् क्षणिकं यथा जलधरः सन्तश्च भावा इमे, सत्ताशक्तिरिहार्थकर्मणि मिते सिद्धेषु सिद्धाश्च (न) सा ॥

नाप्येकं त्रिविधाऽन्यदापिपरकृत्नं वक्रिया वा भवेद्,
द्वेधाऽपिक्षणभङ्गसङ्गतिरितः, साध्यैव विश्राम्यति ॥१॥ इति,

पूर्वभवपुण्यपापपरिणामबद्धासुखदुःखानुभवरूपो वेदना स्कन्धः, तथा च भिक्षुर्भिक्षामटंश्चरण कण्टके लग्ने प्राह–

"इत एकनवते कल्पे, शक्त्या मे पुरुषो हतः ॥
तेन कर्म विपाकेन, पादे विद्धोऽस्मिभिक्षवः ॥१॥' इति,

संज्ञास्कन्धोनाम नामस्कन्धः, सर्वमिदं सांसारिकं सचेतनाचेतनस्वरूपं व्यवहरणं संज्ञामात्रं नाममात्रम्, नात्रकलत्रपुत्रमित्रभ्रात्रादिसम्बन्धो घटपटादिपदार्थसार्थो वा पारमार्थिकः, तथा च तत् सूत्रं "तानीमानि भिक्षवः संज्ञामात्रं व्यवहारमात्रं सवृतिमात्रम्, अतीतोऽद्धा, अनागतोऽद्धा, स हेतुको विनाशः, सहेतुको विनाशः, आकाशं, पुद्गलाः" इति ॥

इहभवपरभवविषयः सन्तानः पदार्थंनिरीक्षणप्रबुद्धपूर्वभवानुभूतसंस्कारस्य प्रमातुः 'स एवायं देवदत्तः' 'सैवेयं दीपकलिका' इत्याद्याकारेण ज्ञानोत्पत्तिः संस्कारस्कन्धः, तदुक्तं–

"यस्मिन्नेवहि सन्ताने, आहिता कर्मवासना ॥
फलं तत्रैव सन्धत्ते, कार्पासे रक्तता यथा ॥१॥" इति,

रूपरसगन्धस्पर्शाणुप्रचयो रूपस्कन्धः, बोद्धमते ह्यवयविनां घटादीनां युक्तिजालैरपाकृतत्वात् परमाणव तात्त्विकाः, यथैकस्य कोशस्य दूरेऽप्रत्यक्षत्वेऽपि तत् समूहस्य प्रत्यक्षत्वं, तथैकपरमाणोरप्रत्यक्षत्वेऽपि तत् समूहस्य प्रत्यक्षत्वं, घटादेः परमाप्रचय-

रूपत्वेऽपि एको महान्धान्यराशिरितिवदेको महान् घट इति प्रत्ययोपपत्तिः, अदृश्यपरमाणुपुञ्जैर्दृश्यपरमाणुपुञ्जस्योत्पत्त्याप्रत्यक्षत्वमुपपद्यते । इति दुःखनामधेयमार्यसत्यम्, आत्मानात्मीयस्वभावाख्यो रागद्वेषमोहानां गणस्समस्तो यतो लोके समुदेति तत् समुदयनामार्यसत्यम् ॥

विश्वत्रयविवरवर्त्तमानानां घटपटादीनां द्वितीयादिक्षणेषु स एवायं स एवायमित्याद्युल्लेखेन ये संस्काराज्ञानसन्ताना उत्पद्यन्ते ते क्षणिकाः, इत्येवं क्षणिकाः सर्वसंस्कारा इत्याकारिकावासना मार्गनामार्यसत्यम् । सर्वक्षणिकत्व-सर्वनैरात्म्यवासनारूपो निरोधोनामार्यसत्यम्, तदुक्तं–"चित्तमेव संसारो रागादिक्लेशवासितं ॥ तदेवतैर्विनिर्मुक्तं, भवान्त इति कथ्यते ॥१॥" इति

निरुपप्लवचित्तसन्तानोऽपवर्ग इति निष्कर्षः । एतत् तत्त्वसंलग्नानि द्विविधानि द्वादशायतनानि तद्यथा-स्पर्शनादीनि पञ्चेन्द्रियाणि स्पर्शाद्याः पञ्चविषयाः चित्तं धर्मस्यायतनं चैतस्थानमित्येवं द्वादशायतनानि । तथा जाति-जरा-मरण-भवो-पादान-तृष्णा-वेदना-स्पर्श-षडायतननाम-रूप-विज्ञान-संस्कारा-विद्या-रूपाणि द्वादशायतनानीति । अर्थक्रियेति, एतन्मते अर्थक्रियाकारित्वमेवसत्त्वम्, तच्च क्रमयौगपद्याभ्यां व्याप्तं, अक्षणिके च क्रमेणार्थक्रियाकारित्वं न संभवति, यद्यदायत्समर्थं तत् तदातत्करोत्येवेति नियमेन प्रथमक्षण एव स्वाखिलकार्यसमर्थत्वात् स्वाखिलकार्याण्युत्पादयेत् कारणमिति द्वितीयक्षणे करणीयाभावान्नकुर्यात् किमपीति, यदि प्रथमक्षणे यत् किञ्चित् कार्यं प्रत्येव समर्थं कारणं, तदानीं

कार्यान्तरम्प्रत्यसमर्थमिति तदानीं न द्वितीयं कार्यं करोति द्वितीयक्षणे पुनस्तत्कार्यम्प्रतिसामर्थ्यात् तत् करोतीत्येवं क्रमेण क्रार्यकारित्वमुपपद्यतेऽक्षणिक इति, तदा सामर्थ्यासमर्थ्यलक्षण-विरुद्धधर्माध्यासात् तयो र्भेद एवेति यस्य प्रथमक्षणे यत्कार्यकारित्वं तदन्यस्यैव द्वितीयक्षणे तदन्यकार्यकारित्वमिति नैकस्य क्रमेण कार्यकारित्वसम्भवः, स्वयमसमर्थस्य न सहकार्यपेक्षणेनापि सामर्थ्यसम्भवः, समर्थस्य पुनः किं पुनः सहकार्यंपेक्षयेति सहकारि-समवधानासमवधानाभ्यामपि न करणाकरणसंभवः, युगपत् सकल-कार्यकारित्वे च यद्यत्कार्यं करणीयं तत् सर्वं प्रथमक्षण एव संवृत्तमिति द्वितीयक्षणे कार्यकारित्वलक्षणं सत्त्वन्तस्य न स्यादित्यक्षणिकात् क्रमयौगपद्यलक्षणव्यापकनिवृत्त्या निवर्त्तत एवार्थक्रियाकारितालक्षणासत्ता क्षणिक एवावतिष्ठते, नन्वेवम-ङ्कुरम्प्रति बीजत्वेन कारणत्वं न स्यात् बीजत्वस्य कुशूलस्थाबीजेऽपि-सत्तया ततोऽङ्कुकार्यानुत्पादादित्यत आह कुर्वद्रूपत्वेति अङ्कुरम्प्रति अङ्कुरकुर्वद्रूपत्वत्वेनैव बीजस्य कारणत्वं सहकारि मध्यमध्या-सीनमेवबीजमङ्कुरकुर्वद्रूपमिति ततोऽङ्कुरमुत्पद्यते, नान्यधर्मतः बीजत्वादिधर्मेण बीजादीनां नाङ्कुरादिकं प्रतिजनकत्वं, तेन कुशूलस्थ बीजादितोऽङ्कुराद्यभावेऽपि न क्षतिः । प्रत्यक्षमिति, एतन्मते प्रत्यक्षमनुमानञ्चेत्येवं प्रमाणं, द्वेधा द्विप्रकारकम्, अपरमुपमानादिकं न प्रमाणं, उपमानस्य शब्दार्थयो श्शक्तिरूप-सम्बन्धग्राहकत्वेनैव प्रामाण्यमुपेयते, न चेच्छाविशेषरूपायाः शक्तेः संसर्गतासम्भव, इति तद् ग्राहकतयोपमानप्रमाणकल्पन-

मप्युक्तम् । तादात्म्यतदुत्पत्त्योरेव वास्तविकी संसर्गता, शब्दस्यार्थे न समं तादात्म्यतदुत्पत्त्योरभावान्न कश्चित् सम्बन्धस्तदभावाच्च नार्थबोधजनकत्वं शब्दस्य, तदुक्तं—

विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः ।
कार्यकारणता तेषां नार्थं शब्दाः स्पृशन्त्यमी ॥१॥ इति,

कल्पनापोढमभ्रान्तमिति लक्षणं, प्रत्यक्षमिति लक्ष्यम्, निर्विकल्पकमिति तत् स्पष्टीकरणम्, शब्दसंसर्गवती प्रतीतिः कल्पनातया रहितं, भ्रान्तिरहितं च ज्ञानं प्रत्यक्षं, तन्निर्विकल्पकम्, सविकल्पकन्तु न प्रत्यक्षं, तद् विषयतयाऽभिमतानां सामान्यावयव्यादीनामभावात्, तत् खण्डनयुक्तयोऽन्यत्रोपदर्शिताः ।

त्रिरूपेति, पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वैतद्रूपत्रयवद्धेतुजनितं यत् साध्यस्य ज्ञानं तदनुमानमित्यर्थः, पर्वतोवह्निमान् धूमादित्यादौ धूमस्य पर्वतरूपपक्षवृत्तित्वमहानसरूपसपक्षवृत्तित्व-ह्रदरूपविपक्षावृत्तित्वैतद्रूपत्रययोगाद् वह्निरूपसाध्यव्याप्यत्वेन तज्ज्ञानात् पर्वतो वह्निमानितिज्ञानमनुमानम्, एतस्य विकल्पात्मकत्वात् साक्षात् स्वलक्षणरूपार्थसम्बन्धाभावेऽपि परम्परया स्वलक्षणरूपार्थसम्बन्धादेव प्रामाण्यमिति बोध्यम्, द्वावेवावयवाविति, यो यो धूमवान् स वह्निमान् यथा महानसमिति साधर्म्योदाहरणं, यो न वह्निमान् स न धूमवान् यथा ह्रद इति वैधर्म्योदाहरणम्, धूमवांश्चायमित्युपनयः इत्येवमुदाहरणोपनयावेवावयवौ बौद्धसम्मतौ, नामजात्यादयोऽन्येपदार्था न बौद्धसम्मताः, जात्यादीनां

तदभिमतखण्डनमुक्तयोऽन्यत्रोपवर्णिताः इति, बौद्धास्सौत्रान्तिक-वैभाषिक-योगाचार-माध्यमिकभेदेन चत्वारः, तत्र सौत्रान्तिकः स्वलक्षणात्मकं क्षणिकं बाह्यमर्थं स्वीकरोति किन्तु नित्यमसावप्रत्यक्ष एव, ज्ञानाकारान्यथानुपपत्त्या तु सकल्प्यते, संवादित्व प्रामाणमर्थप्रमाकत्वञ्च संवादः, साकार ज्ञानमेव प्रमाण, स्वसंविदितञ्चत्, निर्विकल्पकञ्च तत् संवेदनं, निर्विकल्पकस्य च स्वानुरूप स विकल्पकोत्पादनेन प्रामाण्यं, तदुक्तं "यत्रैव जनयेदेनां तत्रैवास्य प्रमाणता ॥' इति, तेन क्षणक्षयस्वर्गप्रापणशक्त्यादे र्निर्विकल्पकस्य प्रत्यक्षस्य भावेऽपि स्वानुरूपविकल्पाजननान्न प्रामाण्यम् अत एवार्थक्रियाकारित्वादिलिङ्गेन क्षणिकत्वस्यानुमानं तत्र प्रमाणमिति, नैरात्म्यज्ञानं मुक्तिकारणं, यतो नैरात्म्यभावनातो ज्ञानसन्तानोच्छेदलक्षणो मोक्षो भवतीति, वैभाषिकमते ज्ञानं निराकारमेव, बाह्यार्थज्ञानयोरेककालीनसामग्रीद्वयसद्भावतो युगपदेवोत्पत्ति स्तत एव तयो र्विषयविषायिभावः, क्षणिकत्वाद्यभ्युपगमस्तु सौत्रान्तिकवत् ।

योगाचारमते साकारविज्ञानमात्रमेव तत्त्वं तस्यैवाकारविशेषाः घटपटादयः, न तु बाह्योऽर्थः समस्ति, चैत्रमैत्रादयो विज्ञानसन्तानरूपा एव, प्रवृत्तिविज्ञानसन्तानालयविज्ञानसन्तानभेदेन विज्ञानसन्तानो द्विविधः, तत्र घटपटाद्याकारविज्ञानसन्तानः प्रवृत्तिविज्ञान सन्तानः, अहमहमित्याकारज्ञानसन्तान आलयविज्ञान आत्मस्थानीयः सुषुप्तावप्यनुवर्त्तते, स एव सर्ववासनाधारभूतः, तद् विशुद्धिरेवापवर्ग इति ।

माध्यमिकमते तु सर्वं शून्यमिति, शुद्धां संविदं माध्यमिकोऽभ्युपगच्छतीति केचित्। एतन्मतचतुष्टयप्रतिपादकं प्राचां पद्यमिदम्

"अर्थोज्ञानसमन्वितो मतिमता वैभाषिकेणोच्यते,
प्रत्यक्षो न हि बाह्यवस्तुविसरः सौत्रान्तिकैराश्रितः ॥
योगाचारमतानुगैरभिमता साकारबुद्धिः परा,
मन्यन्ते वत मध्यमा कृतधियः स्वस्थां परां संविदम् ॥१॥"

सुशीलसूरिणा नाम्ना, षड्दर्शनस्य दर्पणे ॥
संक्षेपतोऽत्रप्रोक्तं वै, प्रसिद्धं बौद्धदर्शनम् ॥१॥

॥ इति बौद्धदर्शनम् ॥



# प्रशस्तिः

## [ उपजातिवृत्तम् ]

श्री आदिनाथं जिनशान्तिनाथं,
श्रीनेमिनाथं प्रभुपार्श्वनाथम् ।
देवाधिदेवं विभुवर्द्धमानं,
स्तुवे सदाऽहं जिनपञ्चकं वै ॥१॥

### [ अनुष्टुब्-वृत्तम् ]

श्रीवीरस्य जिनेन्द्रस्य, शासनाधिपतेः प्रभोः ।
विजयते सदा विश्वे, पट्टं धर्मधुरन्धरम् ॥२॥

तत्र स्वामी सुधर्माख्यो, गणीन्द्रः श्रुतकेवली ।
निर्ग्रन्थनामकं गच्छ-मतनोद् भुवि निर्मलम् ॥३॥

कोटिशः सूरिमन्त्रस्य, जापात् सुस्थितसूरिणा ।
कोटिगच्छ मतिस्वच्छं, प्रख्यातं जगतीतले ॥४॥

चन्द्रं चन्द्रोज्ज्वलं भूयः, सद्यशोरश्मिशोभितः ।
गच्छं चाऽनुचकार श्री चन्द्रसूरीश्वरो महान् ॥५॥

समन्ताद् वनवासीति, सामन्तभद्रसूरिपः ।
स्वच्छं गच्छं वितेने च, तदनु भद्रकृद् भुवि ॥६॥

सर्वदेवाख्यसूरीशः, सर्वश्रेयस्करं कलम् ।
वटगच्छं पवित्रं च, विशालं तदनु व्यधात् ॥७॥

श्रीमेदपाटभूपाप्त-महातपापदे भुँवि ।
श्रीजगच्चन्द्रसूरीशै-स्तपागच्छ-प्रवर्त्तितः ॥८॥

परम्परागते स्वच्छे, तपागच्छेऽत्र भूतले ।
यवनाकबरे लेश-प्रतिबोधकरा वराः ॥९॥

धीर-वीरत्व-हीरत्व-गभीरत्वादिभूषिताः ।
जगद्गुरुवराः ख्याताः, सञ्जाता हीरसूरयः ॥१०॥

प्रतापि-सेनसूरीशैर्दक्षैः श्रीदेवसूरिभिः ।
वादीभसिंहकल्पैः श्री-सिंहसूरीश्वरैः क्रमात् ॥११॥

उल्लासिते तपोगच्छे, वृद्धिविजयकारकाः ।
श्रीवृद्धिविजया जाता, वृद्धिचन्द्राख्यख्यातिकाः ॥१२॥

तेषाञ्च शान्तमूर्त्तीनां, पादाब्ज-मधुपोपमाः ।
सर्वशासनसम्राजो, विभ्राजो ज्ञानरश्मिभिः ॥१३॥

सत्तीर्थोद्धारकाः प्रौढाः, सर्वतन्त्र-स्वतन्त्रकाः ।
सूरिपञ्चकप्रस्थान-पञ्चका राधकाः किल ॥१४॥

सद्ब्रह्मचारिणः श्रीमन्नेमिसूरीश्वरा वराः ।
क्षमाधिरार्चिता जाता-स्तत्पट्टाम्बरभास्कराः ॥१५॥

सप्तलक्षाधिकश्लोक-मितस्य संस्कृतस्य च ।
साहित्यस्य सुकर्त्तारः, कृतीशा ब्रह्मचारिणः ॥१६॥

शान्ताः साहित्यसम्राजो, विभ्राजो ज्ञानज्योतिभिः ।
ख्याता व्याकरणे वाच-स्पतयः कविरत्नकाः ॥१७॥

शास्त्रविशारदा जाता, लावण्यसूरिशेखराः ।
तेषां पट्टधरा मुख्याः, ख्याताः शास्त्रविशारदाः ॥१८॥

कविदिवाकरा दक्षाः, सद्व्याकरणरत्नकाः ।
दक्षसूरीश्वरा जाताः, सरला ब्रह्मचारिणः ॥१९॥

पट्टधरेण तेषाञ्च, सुशीलसूरिणा किल ।
राजस्थाने हि प्रख्याते, मेदपाटे प्रदेशके ॥२०॥

श्रीउदयपुरे ब्रङ्गे, दीक्षाभूमौ निजस्य वै ।
श्रीसङ्घस्य हि विज्ञप्त्या, वर्षास्थितिं प्रकुर्वता ॥२१॥

ग्रहाक्षिगगनाक्षि [२०२९] श्री वैक्रमे वत्सरे वरे ।
संक्षिप्तं संस्कृतं हि 'षड्-दर्शनदर्पणं' कृतम् । ॥२२॥

यावन्मेरु-स्वयम्भू-श्री-पुष्पदन्त-महीस्थिताः ।
भूयात् तावदिदं विश्वे, स्वपरहितकारकम् ॥२३॥

॥ श्रीरस्तु भद्रं भवतु श्रीसङ्घस्य ॥

# श्रीसुशीलसूरीश्वराष्टकम् ।

रचयिता–बीकानेर निवासी शा० नेमिचन्दजी पुंगलिया (तेरापन्थी)

[ अनुष्टुब्–वृत्तम् ]

श्रीमतां पूज्य-पादानां, बीकानेरपुरे शुभे ।
आगमनमपूर्वं वै, धन्यं पुण्यं शुभं सदा ॥१॥
दीक्षितो जनको यस्य, दीक्षितो ज्येष्ठ-सोदरः ।
दीक्षिता भगिनी लघ्वी, सुशीलो दीक्षितः स्वयम् ॥२॥
नाम्ना तथा स्वभावेन, सुशीलः शोभते महान् ।
सरलात्मा शील-सम्पन्नः, स्तुत्यो नित्यं नवैः स्तवैः ॥३॥
सूरीशः शान्तमूर्त्तिश्च, जैनधर्मदिवाकरः ।
अनेकानां च ग्रन्थानां, निर्माता स्वयमेव हि ॥४॥
साधकः सिद्धिमार्गाणां, भव्यानां भवतारकः ।
वारको दुष्टदोषाणां, सर्वेषां सुखकारकः ॥५॥
चत्वारिंशत्तमो भव्यो दीक्षा–स्मृति–महोत्सवः ।
भक्तिपूर्वं समायोजि, सङ्घेनाऽत्र प्रमोदतः ॥६॥
सुखपूर्वं चिरायुः स्यात्–कुर्वंत्–धर्मप्रभावनाम् ।
अङ्गीकरोतु सर्वेषां, कामनां दोषशामकम् ॥७॥
अष्टकं गुरुवर्याणां, गुणानां गुम्फितं मया ।
नेमिचन्द्रेण जैनेन, केवलं सिद्धि–हेतवे ॥८॥

# शुद्धि-पत्रम्

| अशुद्धं | शुद्धम् | पृष्ठे | पंक्तौ |
|---|---|---|---|
| सूरिश्वर– | सूरीश्वर– | १ | ४ |
| साङ्ख्यं–– | सांख्यं– | २ | १८ |
| प्रत्यक्ष– | प्रत्यक्षं– | ८ | ५ |
| सव्यवहारो– | संव्यवहारो– | ९ | २ |
| तत्वालङ्कार- | तत्त्वालोकालंकार- | ९ | २२ |
| काङ्क्षण– | काङ्क्षण– | ९ | १ |
| विज्ञिष्टा– | विशिष्टा– | १० | ६ |
| अर्हनेव– | अर्हन्नेव– | १० | १७ |
| एवाय– | एवायं– | १२ | २ |
| सदशासदंशौ- | सदंशासदंशौ- | १४ | ६ |
| सहृति– | संहृति– | १५ | ६ |
| निशेषांश– | निश्शेषांश | १९ | ५ |
| ऽनयाः– | नयाः– | २० | २ |
| प्राध्यनेन– | प्राधान्येन– | २० | ९ |
| व्मय– | व्यय– | २५ | ६ |
| सत्व– | सत्वं– | २५ | ६ |
| रसङ्ख्येय– | रसंख्येय– | २५ | १६ |
| संसगजत्वा– | संसर्गजत्वा– | २६ | १६ |
| बाध्यम्– | बोध्यम्– | २६ | १६ |
| द्ब्यशीति- | द्व्यशीतिः– | २६ | ११ |

३१ पृष्ठे सप्तमपङ्क्तितः परं देयं–
व्याख्यातुं क्रियते यत्नः कापिलं दर्शनं पुनः

| अशुद्धं | शुद्धम् | पृष्ठे | पंक्तौ |
|---|---|---|---|
| कुटस्थः– | कूटस्थः– | ३४ | १ |
| घमि– | धर्मि– | ३५ | १ |
| वचित्र्य– | वैचित्र्य– | ३६ | ४ |
| कुवर्द– | कुर्वद्– | ३७ | १७ |
| वराग्भ्यां– | वैराग्याभ्यां– | ४४ | ९ |
| पञ्चभेदे– | पञ्चमभेदे– | ४५ | ३ |
| वत्यर्थानां– | वृत्त्यर्थानां– | ४५ | ९ |
| चित्तविक्षेप– | चित्तविक्षेपः | ४७ | २ |
| प्रच्छदन– | प्रच्छर्दन– | ४७ | ५ |
| रिद– | रिदं– | ४७ | २२ |
| मवलनव– | मवलम्ब– | ४८ | १४ |
| ससिद्धा– | स्वसिद्धान्तानु– | ४९ | १० |
| द्रष्टदृश्ययोः– | द्रष्ट्दृश्ययोः– | ४९ | २० |
| संयम– | संयमः– | ५३ | ४ |
| हृदयै– | हृदये– | ५४ | ११ |
| ज्जवलनम्– | ज्ज्वलनम्– | ५४ | १८ |
| स्थान्युपनिमन्त्रणेत्यादिः– | | ५५ | ८ |
| प्रतिबन्धक– | प्रतिबन्धकः- | ५६ | १३ |

| अशुद्धं | शुद्धम् | पृष्ठे | पंक्तौ |
|---|---|---|---|
| तदसंखयेया– | तदसख्येय– | ५९ | १४ |
| पष्ठश्च– | षष्ठश्च– | ६३ | २२ |
| जतिमत्वं– | जातिमत्वं– | ६७ | १० |
| साङ्ख्मत– | सांख्यमत– | ६७ | १२ |
| शरीराम्भ– | शरीरारम्भ– | ६७ | १९ |
| वुद्धारम्भ– | वुद्ध्यारम्भ– | ६७ | २१ |
| अनभव– | अनुभव– | ६८ | १० |
| व्यभीचारी– | व्यभिचारी– | ७२ | २१ |
| वादीना– | वादिना– | ७४ | १७ |
| वाविन:– | वादिन:– | ७४ | १९ |
| दुषणाभि– | दूषणाभि– | ८० | ८ |
| चतुर्विशति– | चतुर्विंशति– | ८० | १४ |
| सशया– | संशया– | ८४ | १९ |
| षड्पूपा– | षडपूपा– | ८७ | ५ |
| भावे– | भवि– | ८८ | १७ |
| सप्तत्वं– | सप्ततत्वं– | ८९ | ४ |
| स्युरसमवायो- | स्युस्समवायो- | ९० | १ |
| न्यूवृत्तित्वात्- | न्यूनवृत्तित्वात्- | ९० | १० |
| जात:कर्ता– | जगत:कर्ता– | ९२ | ६ |
| द्वषयत्न– | द्वेषयत्न– | ९२ | २२ |
| पतापर्य– | तात्पर्य– | ९५ | २२ |
| क्षातिमत्– | क्षादिमत्– | ९६ | १ |
| मिथ:संसर्गवन्त:– | | ९६ | २ |
| कर्मणिपञ्च– | कर्माणिपञ्च– | ९९ | ५ |
| गण:सन्– | गुण:सन्– | ९९ | २० |
| अथातौ– | अथातो– | १०४ | ७ |
| वेदाध्ययान्नतरं- | वेदाध्ययनानन्तरं | १०४ | ८ |
| नथाहि– | तथाहि– | १०४ | १२ |
| निषेदार्थ– | निषेधार्थं– | १०५ | १६ |
| अग्निहोत्र– | अग्निहोत्र– | १०५ | १९ |
| तूभगम– | तूभयम्– | १०६ | १ |
| किन्तवपूर्व– | किन्त्वपूर्व– | १०७ | ४ |
| वाकयम्– | वाक्यम् | १०८ | ३ |
| जुहबङ्गत्वं– | जुह्वङ्गत्वं | १०८ | ६ |
| वाकयेऽपि– | वाक्येऽपि– | १०८ | १७ |
| दिव्यति– | दीव्यति– | १०९ | २ |
| सादेश– | सादेश्य– | १०९ | ५ |
| नुवादे न– | नुवादेन– | १०९ | १० |
| सन्दशपतिनां- | सन्दंशपतितानां- | १०९ | ११ |
| एतान्नयेव- | एतान्येव– | ११० | १ |
| वाकयैव– | वाक्यैक– | ११० | ७ |
| वाकय– | वाक्यं– | १११ | ३ |
| श्वत– | श्वेत– | १११ | १० |
| दुज्जवलत्व– | दुज्ज्वलत्व | १११ | १९ |
| प्रमाणामिति- | प्रमाणमिति | ११२ | ३ |
| प्रामाण्य च- | प्रामाण्यञ्च- | ११२ | ८ |
| पदार्थां– | पदार्था– | ११३ | ४ |
| शृणवत:– | शृण्वत:– | ११३ | ५ |

| अशुद्धं | शुद्धम् | पृष्ठे | पंक्तौ |
|---|---|---|---|
| व्यसायेन | व्यवसायेन | ११३ | १० |
| समष्टयोः | समष्ट्योः | ११३ | २३ |
| रज्जवज्ञानं | रज्ज्वज्ञानं | ११४ | ६ |
| तदुक्तम् | तदुक्तम् | ११४ | १० |
| ज्ञानोपहित | दज्ञानोपहित | ११४ | १२ |
| पञ्चकश्चति | पञ्चकञ्चेति | ११४ | २१ |
| कान्तकरण | कान्तःकरण | ११५ | १ |
| समष्टयु | समष्ट्यु | ११५ | १५ |
| लस्थानम् | लयस्थानम् | ११५ | १६ |
| द्वयष्टयु | व्यष्ट्यु | ११५ | १५ |
| वाकयार्थस्य | वाक्यार्थस्य | ११७ | ६ |
| लक्षणय | लक्षणया | ११७ | १७ |
| तद्भावः | तद्भायः | ११७ | २१ |
| चैतन्यैकय | चैतन्यैक्य | १२० | २१ |
| वाकयार्थं | वाक्यार्थं | १२० | ५ |
| वाकयार्थे | वाक्यार्थे | १२० | ७ |
| वाकयाद | वाक्याद | १२० | ७ |
| चतन्य | चैतन्य | १२० | १३ |
| तद्गतमो निरस | तद्गततमोनिरसन | १२१ | २ |
| वाकयेषु | वाक्येषु | १२१ | १६ |
| सहाराभ्यां | संहाराभ्यां | १२१ | १८ |
| तदाद्यन्तया | तदाद्यन्तयो | १२१ | २० |
| रूप पादन | रूप पादन | १२१ | २१ |
| सतत | सततं | १२२ | २१ |
| तत्रव | तत्रैव | १२३ | १० |
| चित्तवृत | चितवृते | १२३ | १४ |
| भक्षण | भक्षणे | १२४ | १० |
| अद्वेष्टत्वादयो | अद्वेष्टृत्वादयो | १२४ | १३ |
| उत्क्रामन्त्रि | उत्क्रामन्ति | १२४ | १६ |
| मिमं | मिदं | १२५ | ८ |
| मात्रण | मात्रेण | १२६ | ७ |
| द्वधा | द्वेधा | १२६ | ८ |
| वद्धा | वद्धः | १२७ | ३ |
| परमा प्रचय | परमाणु प्रचय | १२७ | २१ |
| परमाणव | परमाणवः | १२७ | १६ |
| कोशस्य | केशस्य | १२७ | २० |
| गणस्मस्तो | गणः समस्तो | १२८ | ४ |
| भद्र एवेति | भेद एवेति | १२९ | ४ |
| कुसूलस्था | कुसूलस्थ | १२९ | १३ |
| ततोऽङ्कुकार्या | ततोऽङ्कुरकार्या | १२९ | १४ |
| कल्पना नया | कल्पना तया | १३० | ७ |
| संवादित्व | संवादित्व | १३१ | ४ |
| प्रामाण | प्रमाणं | १३१ | ५ |
| संविदितश्चत् | संविदितश्चतत् | १३१ | ६ |
| विषय विषायि | विषयविषयि | १३,११४ | |
| चन्द्रोजवलं | चन्द्रोज्ज्वलं | १३३ | १४ |
| स्तपागच्छ | स्तपागच्छः | १३४ | ६ |
| दोष शामक | दोष शामिकाम् | १३६ | १७ |

卐 प्रकाशित होने वाले ग्रन्थों की नामावलि 卐

[१] सुशीलनाममाला
( संस्कृत कोष )

[२] सुशील लेख संग्रह
( विभाग पहला )

[३] मदिरा पानno निषेध

[४] प्रभु महावीर जीवन सौरभ
( द्वितीयावृत्तिः )

॥ श्री पार्श्वनाथाय नमः ॥

**श्री जैनधर्मदिवाकर, तीर्थप्रभावक, मरुधरदेशोद्धारक राजस्थान दीपक प्रशान्तमूर्ति प० पू० आचार्यदेव श्रीमद् विजय-सुशील सूरीश्वरजी म० सा० की सेवा में समर्पित**

# ❋ अभिनन्दन-पत्र ❋

हे ! परमशासन प्रभावक पूज्य आचार्यदेव !

राजस्थान की शुष्क तथा दुर्गम भूमि में विचरण करना व अज्ञानांधकार तले दबे जीवों के जीवन पथ को ज्ञानालोक से आलोकित करना कितना दुष्कर कार्य है। १५ वर्षो से आपको इसी प्रदेश में विभिन्न धर्म प्रभावना करना और धर्म प्रकाश से इस प्रदेश को आलोकित करना कठिन परीक्षा है। आपका जोधपुर चातुर्मास अपनी एक विशेषता रखता है। गत २५ वर्षों बाद इस नगर में महान् आगमशास्त्र पूज्य श्री भगवतीसूत्र और भावनाधिकार में श्री विक्रम चरित्र के श्रवण का लाभ यहां के श्रीसंघ को प्राप्त हुए है। इसके साथ ही अनेक कार्य जो यह प्रथम वार ही आपकी निश्रा में यहां हुए हैं।

आपकी निश्रा में ही पू० साध्वी सिद्धशीला श्री म० सा० की बडी दीक्षा, उत्साही पू० बालमुनि श्री जिनोतम वि० म० सा० एवं पू० पांच साध्वीजी म० के श्री उत्तराध्ययन सूत्र के योग, पू० मु० श्री अरिहंत वि० मा० सा० एवं पू० साध्वीजी पुष्पा श्री जी म० सा० की अठ्ठाई, श्री नमस्कार महामन्त्र के नवदिन के एकासणें श्री गौतमस्वामी गणधर

महाराज का छठ, दीपकतप, पंचरंगीतप श्री शंखेश्वर पार्श्वनाथ के अट्ठम, अक्षय-निधितप, प्रथम वार श्री अर्हद् अभिषेक पूजन तथा श्री वीशस्थानक महा पूजन आदि यहां हुए हैं।

आपकी ही पावन निश्रा में प्रथम बार 'छरी' पाल संघ जोधपुर-गांगांणी का निकला तथा उस प्रसंग पर दूसरा संघ एक महानुभाव ने निकालने की वहां घोषणा की वास्तव में यह एक बहुत ही महत्व पूर्ण कार्य हुआ है।

हे प्रकाश पुञ्ज !

जोधपुर में आज से चार वर्ष पूर्व आपका आगमन जैसलमेर प्रतिष्ठा के बाद हुआ था। श्री संघ का सौभाग्य था कि आपकी निश्रा में श्री भैरूबाग पार्श्वनाथ जैन तीर्थ में ११ जिनबिम्ब की प्रतिष्ठा का भव्य समारोह सम्पन्न हो सका।

आपकी अनवरत साधना का ही यह प्रतिफल है कि हम यहां एकत्र हुए हैं और शासन प्रभावना पूर्वक शानदार प्रतिष्ठा महोत्सव सम्पन्न हो पाया है। वर्षों से इस जैन क्रिया भवन में मन्दिरजी की आवश्यकता व कमी हमें खटक रही थी वह पूरी हो गई है। उसके प्रेरणास्त्रोत आप ही रहे हैं। आपके स्नेह, कृपा और ज्ञान के समक्ष कोई भी संकीर्णता बाधा बन कर नहीं आती। आपके व्यक्तित्व का प्रभाव जैन एवं जैनेतर समाज के व्यक्तियों पर समान रूप से परिलक्षित होता है। आपके प्रभावशाली व्यक्तित्व की अनेक ऐसी विशेषतायें है जो समक्ष किसी भी श्रद्धालु को विनत प्रणत होने के लिये विवश कर

देती है। इस प्रतिष्ठा समापन के साथ ही आपके वरद हस्त से समय बाद श्री मुताजी के मन्दिर की प्रतिष्ठा कार्य होने वाला है।

हे अनन्य साधक !

आपके चिन्तन प्रधान प्रवचन, सौम्य व्यक्तित्व, मधुर वाणी, गम्भीर प्रकृति और स्नेहसिक्त व्यवहार जैन समाज के रूखे सूखे जीवन को शान्ति, शीतलता और नवजीवन प्रदान करते है। आपका जोधपुर चातुर्मास श्री जैन संघ के इतिहास में स्वर्णाक्षरों में लिखा जावेगा। ऐसा ऐतिहासिक चातुर्मास यहां पहले कभी नहीं हुआ है।

हे धर्मनिष्ठ तपोधन !

आपको जन्म के साथ ही धर्म की वसियत कौटुम्बिक परम्परा के साथ में मिली थी। आपका सम्पूर्ण परिवार ही प्रवज्या के परमपावन पथ पर अग्रसर होकर जैनशासन को अलंकृत करने में सफल रहा है। उसी क्रम में राज थान के सुप्रसिद्ध झीलों व फव्वारों के नगर उदयपुर में वि० सं० १९८८ मार्गशीर्ष कृष्णा २ को स्व० साहित्य सम्राट् शास्त्र विशारद् प पू० आचार्य भगवान् श्रीमद विजयलावण्य सूरिश्वरजी म० सा० के पावन कर कमलों से दीक्षा ग्रहण की। अपने परम गुरुदेव व प्रगुरुदेव की पावन निश्रा में आपने जैन व जैनेतर दर्शन ग्रन्थों का निष्ठा पूर्वक अध्ययन किया व जैन आगमों का विधि पूर्वक योग और अभ्यास किया।

आपने आज दिन तक ६० छोटे बड़े ग्रन्थों का निर्माण व संपादन कार्य किया। वर्तमान में भी आपने साहित्य का सर्जन किया है, वह प्रेस में है तथा शीघ्र ही प्रकाशित हो रहा है।

हे शिल्प कला प्रेमी !

शिल्प कला के आप अनन्य उपासक रहे हैं। श्री जैसलमेर तीर्थ, कापरडाजी तीर्थ, मुछाला महावीर तीर्थ, बामणवाडजी तीर्थ, जावाल में श्री महावीर कीर्तिस्तम्भ, नाडोल में सिद्धचक्र मन्दिर, पावापुरी मन्दिर व खीमेल में भी पावापुरी मन्दिर, पाली में भव्य मन्दिर आपके शिल्प प्रेमी होने का परिचय देते हैं। आप श्री ने राजस्थान में करीब ३२ प्रतिष्ठायें, ११ उपरान्त छरीपाल संघ कराये हैं।

हे शासन रत्न !

आज आपको शासन रत्न की उपाधि से विभूषित कर समाज ने अपने आपको धन्य माना है। हम जोधपुर श्री जैन संघ के लोग श्रद्धा के साथ आपके समक्ष नमन करते हैं। हमारा कौटिशः वन्दन हो।

अन्त में—

आपसे सादर सविनय विनती है कि इस शुष्क भूमि में विचरण कर अपने सदुपदेशों से धर्म सरिता की बाढ़ लाकर इसे नव पल्लवित करें।

शासन देव आपको दीर्घायु करें।

स्थान—**जोधपुर (क्रिया भवन)**
श्री वीर सं० २५०२
विक्रम सं० २०३२
मार्गशीर्ष शुक्ल ११ मौन एकादशी,
रविवार–दिनांक १४-१२-७५।

हम हैं आपके अभिनन्दनकर्त्ता
**श्री जैन संघ, जोधपुर (राज.)**

परमशासनप्रभावक

# पूज्यपाद आचार्यदेव श्रीमद्विजय-सुशीलसूरीश्वरजी म० सा०

## के वरद् हस्ते की गई अञ्जनशलाका तथा प्रतिष्ठादि की क्रमशः नोंध

*[ वि० सं० १९९९ से २०३२ तक की ]*

(१) वि० सं० १९९९ वैशाख शुक्ला-६
अन्दोर [मारवाड़] राजस्थान।
अन्दोर ग्राम के जिन मन्दिर में मूल नायक श्रीपार्श्वनाथ-आदि जिनबिम्बों की प्रतिष्ठा।

(२) वि० सं० २०२० ज्येष्ठ शुक्ला-
गूढा बालोतान् [मारवाड़] राजस्थान।
गूढा ग्राम में श्री ऋषभदेव भगवान् के चरण पादुका की प्रतिष्ठा दादावाड़ी में।

(३) वि० सं० २०२२ वैशाख शुक्ला-५
सादड़ी (मारवाड़)-राजस्थान।
सादड़ी में श्री चिन्तामणि पार्श्वनाथ जिन मन्दिर में तथा नूतन बनी हुई चोवीश देरी में १५१ जिनबिम्बों की प्रतिष्ठा।

(४) वि० सं० २०२२ वैशाख शुक्ला-८
मुछाला महावीर तीर्थ (मारवाड़) राजस्थान।
श्रीमुछाला महावीर तीर्थ में ५१ जिनबिम्बों की प्रतिष्ठा।

(५) वि० सं० २०२२ ज्येष्ठ (वैशाख) कृष्णा-६
धरणी (मारवाड़)-राजस्थान।
धरणी ग्राम में श्री आदिनाथजिन मन्दिर में दो भगवान की प्रतिष्ठा।

(६) वि० सं० २०२२ ज्येष्ठ शुक्ला-३
खुडाला (मारवाड़) राजस्थान।
खुडाला में श्रीमान् मुकुन्दचंदजी के गृहमन्दिर की प्रतिष्ठा।

(७) वि० सं० २०२२ ज्येष्ठ शुक्ला-६
खीमेल (मारवाड़) राजस्थान।
खीमेल में श्री नगीबाई बावनजिनालय के विभाग में सहस्रफणा श्रीपार्श्वनाथादिजिनबिम्बों की अञ्जनशलाका।
वि० सं० २०२३ वैशाख शुक्ला-१०
श्री नूतन समवसरण जिन मन्दिर में चौमुखी सहस्रफणा श्री पार्श्वनाथादिजिन बिम्बों की प्रतिष्ठा।

(८) वि० सं० २०२३ ज्येष्ठ शुक्ला-३
श्री कापरडाजी तीर्थ (मारवाड़) राजस्थान।
श्री कापरडाजी में श्री नूतन समवसरण जिन मन्दिर में श्री ऋषभादि चार जिनबिम्बों की प्रतिष्ठा।

(९) वि० सं० २०२३ आषाढ (ज्येष्ठ) कृष्णा-१३
कोलरतीर्थ (मारवाड़) राजस्थान।
कोलर में प्राचीन श्री ऋषभदेवजिन मन्दिर के शिखर पर नूतन दण्ड स्थापन तथा ध्वजारोपण।

(१०) वि० सं० २०२३ अषाढ शुक्ला–१३
सिरोही (मारवाड़) राजस्थान।
सिरोही में जीर्णोद्धार किये हुए प्राचीन श्री शान्तिनाथ जिन मन्दिर में मूलनायक श्री शान्तिनाथ भगवान् आदि जिनबिम्बों की प्रतिष्ठा।

(११) वि० सं० २०२५ ज्येष्ठ (वैशाख) कृष्णा–६
पाटण, उत्तर गुजरात।
पाटण के मणीयाती पाडा में आमूलचूल जीर्णोद्धार किये हुए श्री ऋषभजिन मन्दिर में मूलनायक श्री ऋषभदेव भगवान् आदि जिन बिम्बों की प्रतिष्ठा।

(१२) वि० सं० २०२६ वैशाख शुक्ला–११
मणोरा (मारवाड़) राजस्थान।
मणोरा के जिन मन्दिर में श्री ऋषभदेव भगवान् की प्रतिष्ठा।

(१३) वि० सं० २०२७ फाल्गुन शुक्ला–४
श्री जैसलमेरतीर्थ (मारवाड़) राजस्थान।
श्री महावीर भवन के जिनमन्दिर में श्रीधर्मनाथ भगवान् आदि जिनबिम्बों की प्रतिष्ठा।

(१४) वि० सं० २०२७ फाल्गुन शुक्ला–४
श्री जैसलमेर नगर के प्राचीन श्री शीतलनाथजिन मंदिर में मूलनायक श्री शीतलनाथ भगवान् आदि जिनबिम्बों की प्रतिष्ठा।

(१५) वि० सं० २०२७ फाल्गुन शुक्ला–४
श्री जैसलमेर नगर के प्राचीन श्री पार्श्वनाथजिन मन्दिर में मूलनायक श्री पार्श्वनाथ भगवान् आदि जिनबिम्बों की प्रतिष्ठा।

(१६) वि० सं० २०२७ वैशाख शुक्ला–८
जोधपुर (मारवाड़) राजस्थान।
श्री भेरुबाग तीर्थ में श्री सीमन्धरस्वामी-युगमन्धर स्वामी बाहुस्वामी-सुबाहुस्वामी आदि ११ जिन बिम्बों की प्रतिष्ठा।

(१७) वि० सं० २०२७ ज्येष्ठ शुक्ला–१०
नांदाणातीर्थ (मारवाड़) राजस्थान।
श्री नांदाणा तीर्थ के दो मंजिल के जिन मन्दिर में निचे में नूतन मूलनायक श्री मुनिसुव्रत स्वामी जिन बिम्बों की तथा उपर में प्राचीन मूलनायक श्री शान्तिनाथ भगवान् की प्रतिष्ठा।

(१८) वि० सं० २०२८ वैशाख शुक्ला–५
रानी स्टेशन पर आमूलचूल जीर्णोद्धार किये हुए दो मंजिल के श्री शान्तिनाथ जिन मन्दिर में मूल नायक श्री शान्तिनाथ भगवान् आदि १२ जिनबिम्बों की प्रतिष्ठा।

(१९) वि० सं० २०२९ मागशर शुक्ला–१०
लकडवास (मेवाड़) राजस्थान।
लकड़वास ग्राम का मन्दिर में मूलनायक श्री शान्तिनाथ भगवान् आदि जिनबिम्बों की प्रतिष्ठा।

(२०) वि० सं० २०२९ माघ शुक्ला–५ (वसन्त पंचमी)
बिलाड़ा (मारवाड़) राजस्थान।
बिलाड़ा नगर में अञ्जनशलाका तथा मूलनायक श्रीविमल-नाथ भगवान् आदि जिनबिम्बों की प्रतिष्ठा।

(२१) वि० सं० २०२६ माघ शुक्ला-१३
बडीरूपाहेली (मारवाड़) राजस्थान।
बडीरूपाहेली ग्राम में जिन मन्दिर में श्री पार्श्वनाथ भगवान् आदि जिनबिम्बों की प्रतिष्ठा।

(२२) वि० सं० २०२६ वैशाख शुक्ला-३ (अक्षय तृतीया)
उदयपुर (मेवाड़) राजस्थान।
उदयपुर नगर के चौगानजी के सब जिन मन्दिरों पर धजा-दंड चढाये। आवती चौवीशी के प्रथम तीर्थंकर श्री पद्मनाभ भगवान् के अग्यारह में श्री शतबलगणधर भगवंत की मूर्त्ति तथा स्व० प० पू० शासनसम्राट् श्रीमद्-विजयनेमिसूरीश्वरजी म. की विशालकाय मूर्त्ति की प्रतिष्ठा।

(२३) वि० सं० २०२६ वैशाख शुक्ला-१५
उदयपुर (मेवाड़) राजस्थान।
उदयपुर नगर के भोपालपुरा में श्रीमान् छोगालालजी परकाजी सिरोहीया के गृहमन्दिर में श्रीपार्श्वनाथ भगवान् आदि जिन बिम्बों की प्रतिष्ठा।

(२४) वि० सं० २०२६ ज्येष्ठ शुक्ला-४
गुडली (मेवाड़) राजस्थान)
गुडली ग्राम में जिन मन्दिर में मूलनायक श्री आदीश्वर भगवान् आदि जिनबिम्बों की प्रतिष्ठा।

(२५) वि० सं० २०३० मार्गशीर्ष शुक्ला-५
उदयपुर (मेवाड़) राजस्थान।

उदयपुर नगर में हाथीपोल श्री जैन धर्मशाला के नूतन जिन मन्दिर में मूल नायक श्री वासुपूज्य स्वामी की तथा दो श्री पार्श्वनाथ जिन बिम्बों की प्रतिष्ठा।

(२६) वि० सं० २०३० वैशाख शुक्ला–७
शिवगंज (मारवाड़) राजस्थान।
शिवगंज नगर में श्रीमान संतुष्टिनामक श्री मुनिसुव्रतस्वामी जिन प्रसाद में श्री शंखेश्वर-जीरावला-अंतरीक्ष-नागेश्वर-चिन्तामणि-पार्श्वनाथ जिनबिम्बों को, श्री पुंडरीकस्वामी तथा श्रीसुधर्मास्वामी की एवं श्री पद्मावतीदेवी की प्रतिष्ठा।

(२७) वि० सं० २०३० ज्येष्ठ (वैशाख) कृष्णा–२
जावाल (मारवाड़) राजस्थान।
जावाल ग्राम की अम्बाजी की वाड़ी में मूल नायक श्री ऋषभदेव जिन मन्दिर के शिखर पर नूतन दण्ड धजा सहित चढाये।

शासन् सम्राट् गुरु मन्दिर में स्व० प० पू० आ० श्रीमद्-विजयोदयसूरीश्वरजी म. सा. की मूर्त्ति, स्व. प. पू० आ० श्री मद्‌विजयलावण्यसूरीश्वरजी म० सा० की मूर्त्ति, तथा स्व० पू० मुनिराज श्री चन्द्रप्रभविजयजी म० सा० की मूर्त्ति इन तीनों मूर्त्तियों की प्रतिष्ठा।

(२८) वि० सं० २०३० आषाढ (ज्येष्ठ) कृष्णा–७।
खीमेल (मारवाड़) राजस्थान।
खीमेल ग्राम में श्री शान्तिनाथ जिन मन्दिर में शासनदेवी श्री चक्रेश्वरीदेवी की प्रतिष्ठा।

(२६) वि० सं० २०३० अषाढ शुक्ला–३
कोसेलाव (मारवाड़) राजस्थान।
कोसेलाव ग्राम में श्री मुनिसुव्रतस्वामी जिन मन्दिर के घुमट पर इंडा-कलश की स्थापना।

(३०) वि० सं० २०३१ फाल्गुन (माघ) कृष्णा–३
पाली (मारवाड़) राजस्थान।
पाली नगर में दो मंजिल के त्रीशखरी श्री शान्तिनाथजिन मन्दिर में प्राचीन श्री शान्तिनाथ भगवान् आदि जिन बिम्बों की प्रतिष्ठा।

(३१) वि० सं० २०३१ वैशाख शुक्ला–१३
गुडा-एन्दला (मारवाड़) राजस्थान।
गुडा-एन्दला ग्राम में जिन मन्दिर में श्री सुविधिनाथ तथा श्री कुन्थुनाथ भगवान् की मूर्त्ति की एवं नूतन छत्रो में श्री ऋषभदेव भगवान् के चरण पादुका की प्रतिष्ठा।

(३२) वि० सं० २०३१ ज्येष्ठ शुक्ला–३
लुणावा (मारवाड़) राजस्थान।
लुणावा ग्राम में नूतन श्री वासुपूज्यस्वामी जिन मन्दिर में मूलनायक श्री वासुपूज्य स्वामी भगवान आदि जिन बिम्बों की प्रतिष्ठा।

(३३) वि० सं० २०३२ मार्गशीर्ष शुक्ला–१० दिनाङ्क १३-१२-७५।
जोधपुर (मारवाड़) राजस्थान।
जोधपुर नगर में तपागच्छीय श्री जैन धर्म क्रिया भवन में नूतन श्री शाश्वत जिन समवसरण मन्दिर में ऋषभानन-

चन्द्रानन-वारिषेण-वर्द्धमान ये चारों शाश्वत जिनबिम्बों की, श्री वासुपूज्यस्वामी तथा पार्श्वनाथ जिनबिम्बों की प्रतिष्ठा।

(३४) वि० सं० २०३२ मिगसर शुक्ला–१० दिनांक १३-१२-७५।
जोधपुर (मारवाड़) राजस्थान।
जोधपुर नगर में श्री तपागच्छ उपासरा खेतरपालो चोतरा के जिन मन्दिर में नूतनपरिकर युक्त श्री पार्श्वनाथ जिन बिम्ब की प्रतिष्ठा।

(३५) वि० सं० २०३२ माघ शुक्ला–७ दिनाङ्क ७-२-७६।
जोधपुर (मारवाड़) राजस्थान।
जोधपुर नगर में नागोरी दरवाजा के बाहर मुहताजी का श्री पार्श्वनाथ जिन मन्दिर में प्राचीन मूलनायक श्री पार्श्वनाथ भगवान्‌आदि नव जिन बिम्बों की प्रतिष्ठा।

(३६) वि० सं० २०३२ फाल्गुन शुक्ला २ दिनाङ्क ३-३-७६।
खीमेल में श्री नूतन पावापुरी मन्दिर में श्री महावीर स्वामी जिन बिम्ब की, श्री गौतमस्वामी तथा श्री सुधर्मा-स्वामी आदि की प्रतिष्ठा।

अध्यात्मयोगी

पूज्य श्री आनन्दघनजी महाराज रचित

# श्रीनमिनाथजिनस्तवन

[ राग—आशावरी ]

( घन घन सम्प्रति साचो राजा.........ए देशी । )

षट् दरिसण जिन अंग भणी जे, न्यास षडङ्ग जो साधे रे ।
नमिजिनवरना चरण उपासक, षट् दरिसण आराधे रे ।।
षट् दरिसण० [१]

जिन सुर पादप पाय वखाणुं, साङ्ख्य जोग दोय भेदे रे ।
आतमसत्ता विवरण करतां, लहो दुग अङ्ग अखेदे रे ।।
षट् दरिसण० [२]

भेद अभेद सौगत मीमांसक, जिनवर दोय कर भारी रे ।
लोकालोक अवलम्बन भजीए, गुरुगमथी अवधारी रे ।।
षट् दरिसण० [३]

लोकायतिक कुख जिनवरनी, अंश विचारी जो कीजे रे ।
तत्त्व विचारसु धारस धारा, गुरुगम विण केम पीजे रे ।।
षट् दरिसण० [४]

जैन जिनेश्वर वर उत्तम अङ्ग, अन्तरङ्ग बहिरङ्गे रे।
अक्षर न्यासधरा आराधक, आराधे घरी सङ्गे रे।।
षट् दरिसण० [५]

जिनवरमां सघळां दरिसण छे, दर्शने जिनवर भजना रे।
सागरमां सघळी तटिनी सही, तटिनीमां सागर भजना रे।।
षट् दरिसण० [६]

जिन स्वरूप थइ जिन आराधे, ते सही जिनवर होवे रे।
भृङ्गी इलिकाने चटकावे, ते भृङ्गी जग जोवे रे।।
षट् दरिसण० [७]

चूर्णी भाष्य सूत्र निर्युक्ति, वृत्ति परंपर अनुभव रे।
समय पुरुषनां अङ्ग कह्यां ए, जे छेदे ते दुर्भव रे।
षट् सरिसण० [८]

मुद्रा बीज धारणा अक्षर, न्यास अरथ विनियोगे रे।
जे ध्यावे ते नवि वंची जे, क्रिया अवंचक भोगे रे।।
षट् दरिसण० [९]

श्रुत अनुसार विचारी बोलुं, सुगुरु तथावधि न मिले रे।
किरिया करी नवि साधी शकीए, ए विषवाद चित्त सघळे रे।
षट् दरिसण० [१०]

ते माटे उभा कर जोडी, जिनवर आगल कहीए रे।
समय चरण सेवा शुद्ध देजो, जेम आनन्दघन लहीए रे।।
षट् दरिसण० [११]



मुद्रकः–प्रकाश प्रिण्टर्स, जालोरी गेट, जोधपुर (राजस्थान)